द्रो० वमज्जाः पिशिताशनिवाश्रुवन्वपांविलुंपंतिहसंतिगांतिचप्रकर्षमाणाः कुणपान्यनेकशः शरीरसंघातवहोघस्तजनार्
५६ थोडुपाकुंजरशैलसंकटा मनुष्यशीर्षोपलमांसकर्दमाप्रविद्धनानाविधशस्त्रमालिनी भयावहावैतरणीवदुस्तराप्रव
र्तितायोधवरैस्तदानदी उवाहमध्येनरराजिरेभृशंभयावहाजीवमृतप्रवाहिनी पिबंतिचाश्नंतिचयत्रदुर्दृशाः पिशा
चसंघानर्दंतिभैरवाः सुनंदिताः प्राणभृतांक्षयंकराः समानभक्ष्याः श्वसृगालपक्षिणः तथातदायोधनमुग्रदर्श
नंनिशामुखेपितृपतिराष्ट्रवर्द्धनं निरीक्ष्यमाणाः शनकैर्जहुर्नराः समुत्थितारुंडकबंधसंकुलं अपेतविध्वस्तमहा
र्हभूषणंनिपातितंतत्रशक्रसमंमहाबलं रणेभिमन्युंददृशुस्तदाजनायज्ञेहुतंहव्यमिवपावकं॥ ॥इतिश्रीद्रोण
पर्वण्यभिमन्युवधःसमाप्तस्तृतीयोयुद्धदिवसः संजयउवाच हतेतस्मिन्महावीर्येसौभद्रेरथयूथपे विमुक्त
रथसन्नाहाःसर्वेनिक्षिप्तकार्मुकाः उपोपविष्टाराजानंपरिवार्ययुधिष्ठिरं तदेवयुद्धंध्यायंतःसौभद्रगतमानसाः
ततोयुधिष्ठिरोराजाविललापसुदुःखितः अभिमन्यौहतेवीरेभ्रातुःपुत्रेमहारथे द्रोणानीकमसंबाधंममप्रिय
चिकीर्षया भित्वाव्यूहंप्रविष्टोसौगोमध्यमिवकेसरी यस्यशूरामहेष्वासाःप्रत्यनीकगतारणे प्रभग्नाविनिवर्त्तन्ते
कृतास्त्रायुद्धदुर्मदाः अत्यंतशत्रुरस्माकंयेनदुःशासनःशरैः क्षिप्रंह्यभिमुखःसंख्येविसंज्ञोविमुखीकृतः
सतीर्त्वादुस्तरंवीरोद्रोणानीकमहार्णवं प्राप्यदौःशासनिंकार्ष्णिःप्राप्तोवैवस्वतक्षयं कथंद्रक्ष्यामिकौंतेयं
सौभद्रेनिहतेर्जुनं सुभद्रांवामहाभागांप्रियंपुत्रमपश्यतीं किंस्विद्वयमपेतार्थमश्लिष्टमसमंजसं तावुभौप्र
तिवक्ष्यामोहृषीकेशधनंजयौ अहमेवसुभद्रायाःकेशवार्जुनयोरपि प्रियकामोजयाकांक्षीकृतवानिदमप्रियं श्रीराम०
५६

नलुब्धोबुध्यतेदोषान लोभान्मोहाच्चवर्त्तते मधुलिप्सुर्हिनापश्यंप्रपातमहमीदृशं योहिभोज्येपुरस्कार्योयानेषुश ५
नेषुच भूषणेषुचसोस्माभिर्बालोयुधिपुरस्कृतः कथंहिबालस्तरुणोयुद्धानामविशारदः सदश्वइवसंबा
धेविषमेक्षेममर्हति नोचेद्धिवयमप्येनंमहीमनुशयीमहि बीभत्सोःकोपदीप्तस्यदग्धाःकृपणचक्षुषा अलु
ब्धोमतिमानधीमानक्षमावानरूपवानबलीवपुष्मानमानकृद्वीरःप्रियःसत्यपराक्रमः यस्यश्लाघंतिविबुधाःक
र्म्माण्यूर्जितकर्म्मणः निवातकवचानजघ्नेकालकेयांश्चवीर्यवान महेंद्रशत्रवोयेनहिरण्यपुरवासिनः अ
क्ष्णोर्निमेषमात्रेणपौलोमाःसगणाहताः परेभ्योप्यभयार्थिभ्योयोदाताभयंविभुः तस्यास्माभिर्नशकित
स्त्रातुमप्यात्मजोबली भयंतुसुमहत्प्राप्तंधार्त्तराष्ट्रान्महद्बलात पार्थःपुत्रवधात्क्रुद्धःकौरवानशोषयिष्यति
क्षुद्रःक्षुद्रसहायश्चस्वपक्षक्षयकारकः व्यक्तंदुर्योधनोदृष्ट्वाशोचनहास्यतिजीवितं नमेजयःप्रीतिकरोनरा
ज्यंनचामरत्वंनसुरैःसलोकता इमंसमीक्ष्याप्रतिवीर्यपौरुषंनिपातितंदेववरात्मजात्मजंग॥ ॥इतिद्रोणप
र्वण्यभिमन्युवधे संजयउवाच अथैनंविलपंतंवैकुंतीपुत्रंयुधिष्ठिरं कृष्णद्वैपायनस्तत्रआजगाममहानृषिः अर्च्च
यित्वायथान्यायमुपविष्टंयुधिष्ठिरः अब्रवीच्छोकसंतप्तोभ्रातुःपुत्रवधेनच अधर्मयुक्तैर्बहुभिःपरिवार्यमहारथैः
युध्यमानोमहेष्वासैःसौभद्रोनिहतोरणे बालश्चाबालबुद्धिश्चसौभद्रःपरवीरहा अनुपायेनसंग्रामेयुध्यमानोवि
शेषतः मयाप्रोक्तःससंग्रामेद्वारंसंजनयस्वनः प्रविष्टेप्यंतरेतस्मिन्सैंधवेनास्मवारिताः ननुनामसमंयुद्धमे
ष्टव्यंयुद्धजीविभिः इदंचैवासमंयुद्धमीदृशंयत्कृतंपरैः तेनास्मिभृशसंतप्तः शोकबाष्पसमाकुलः शमंनैवा

धिग्गछामिचिंतयानः पुनःपुनः संजयउवाच तंतथाविलपंतंवैशोकव्याकुलमानसं उवाचभगवान्व्यासोयुधिष्ठिरमिदं
वचः व्यासउवाच युधिष्ठिरमहाप्राज्ञसर्वशास्त्रविशारद व्यसनेषुनमुह्यंतित्वादृशाभरतर्षभ स्वर्गमेषगतःशूरःश
त्रून्हत्वाबहून्नरो अकालसदृशंकमेहत्वावैपुरुषोत्तमः अनतिक्रमणीयोवैविधिरेषयुधिष्ठिर देवदानवगंधर्वान्
मृत्युर्हरतिभारत युधिष्ठिरउ० इमेवैपृथिवीपालाःशेरतेपृथिवीतले निहताःपृतनामध्येमृतसंज्ञामहाबलाः नागा
युतबलाश्चान्येवायुवेगबलास्तथा तएतेनिहताःसंख्येतुल्यरूपानरैर्नराः नैषांपश्यामिहंतारंप्राणिनांसंयुगेक्वचि
त् विक्रमेणोपसंपन्नास्तपोबलसमन्विताः जेतव्यमितिचान्योन्यंयेषांनित्यंहृदिस्थितं अथचेमेहताःप्राज्ञाःशे
रतेविगतायुषः मृताइतिचशब्दोयंवर्ततेचततोर्थवत् इमेमृतामहीपालाःप्रायशोभीमविक्रमाः निश्चेष्टानिरभी
मानाःशूराःशत्रुवशंगताः राजपुत्राश्चसंरब्धावैश्वानरमुखंगताः अत्रमेसंशयःप्राप्तःकुतःसंज्ञामृताइति क
स्यमृत्युःकुतोमृत्युःकथंसंहरतेप्रजाः हरत्यमरसंकाशंतन्मेब्रूहिपितामह संजयउवाच तंतथापरिपृछंतंकुंतीपुत्रं
युधिष्ठिरं आश्वासनमिदंवाक्यमुवाचभगवानृषिः व्यासउवाच अत्राप्युदाहरंतीममितिहासंपुरातनं
अकंपनस्यकथितंनारदेनपुरानृप सचापिराजाराजेंद्रपुत्रव्यसनमुत्तमं अप्रसह्यतमंलोकेप्राप्तवानिति
मेमतिः तदहंसंप्रवक्ष्यामिमृत्योःप्रभवमुत्तमं ततस्त्वंमोक्ष्यसेदुःखात्स्नेहबंधनसंश्रयात् समस्तपापराशि
घ्नंशृणुकीर्तयतोमम धन्यमाख्यानमायुष्यंशोकघ्नंपुष्टिवर्द्धनं पवित्रमरिसंघघ्नंमंगलानांचमंगलं यथै
ववेदाध्ययनमुपाख्यानमिदंतथा श्रवणीयंमहाराजप्रातर्नित्यंनृपोत्तमैः पुत्रानायुष्मतोराज्यमीहमानैः श्रीराम०

श्रियंतथा पुराकृतयुगेतातआसीद्राजाह्यकंपनः सशत्रुवशमापन्नोमध्येसंग्राममूर्द्धनि तस्यपुत्रोहरिर्नामनारायणसमोब
ले श्रीमान्कृतास्त्रोमेधावीयुधिशक्रोपमोबली सशत्रुभिःपरिवृतोबहुधारणमूर्द्धनि व्यस्यन्बाणसहस्राणियोधे
षुचगजेषुच सकर्मदुष्करंकृत्वासंग्रामेशत्रुतापनः शत्रुभिर्निहतःसंख्येपृतनायांयुधिष्ठिर सराजाप्रेतकृत्यानितस्य
कृत्वाशुचान्वितःशोचन्नहनिरात्रौचनालभत्सुखमात्मनः तस्यशोकंविदित्वातुपुत्रव्यसनसंभवं आजगामाथदेवर्षि
र्नारदोस्यसमीपतः सतुराजामहाभागोदृष्ट्वादेवर्षिसत्तमं पूजयित्वायथान्यायंकथामकथयत्तदा तस्यसर्वंसमा
चष्टयथावृत्तंनरेश्वरः शत्रुभिर्विजयंसंख्येपुत्रस्यचवधंतथा ममपुत्रोमहावीर्यइंद्रविष्णुसमद्युतिः शत्रुभिर्ब
हुभिःसंख्येपराक्रम्यहतोबली कएषमृत्युर्भगवन् किंवीर्यबलपौरुषः एतदिच्छामितत्त्वेनश्रोतुंमतिमतांवर
तस्यतद्वचनंश्रुत्वानारदोवरदःप्रभुः आख्यानमिदमाचष्टपुत्रशोकापहंमहत् नारदउवाच शृणुराजन्महाबा
हो आख्यानंबहुविस्तरं यथावृत्तंश्रुतंचैवमयापिवसुधाधिप प्रजासृष्ट्वातदाब्रह्माआदिसर्गेपितामहः असं
हृतंमहातेजादृष्ट्वाजगदिदंप्रभुः तस्यचिंतासमुत्पन्नासंहारंप्रतिपार्थिव चिंतयन्नह्यसौवेदसंहारंवसुधाधिप
तस्यरोषान्महाराजखेभ्योग्निरुदतिष्ठत तेनसर्वादिशोव्याप्ताःसांतर्देशादिधक्षता ततोदिवंभुवंचैवज्वालामा
लासमाकुलं चराचरंजगत्सर्वंददाहभगवान्प्रभुः ततोहतानिभूतानिचराणिस्थावराणिच महताक्रोधवेगेनत्रास
यन्निववीर्यवान् ततोहरोजटीस्थाणुर्निशाचरपतिःशिवः जगामशरणंदेवंब्रह्माणंपरमेष्ठिनं तस्मिन्नाप
तितेस्थाणौप्रजानांहितकाम्यया अब्रवीत्परमोदेवोज्वलन्निवमहामुनिः किंकुर्मःकामंकामार्हकामाज्जा

द्रो० तोस्मिपुत्रक करिष्यामिप्रियंसर्वंब्रूहिस्थाणोयदिच्छसि॥ ॥इतिद्रोणपर्वणि॥ स्थाणुरुवाच प्रजासर्गनिमित्तो
५८ हियत्नोपलब्धस्त्वयाविभो त्वयासृष्टाश्चवृद्धाश्चभूतग्रामाःपृथग्विधाः तास्तवेहपुनःक्रोधात्प्रजादह्यंतिसर्वशः ता
दृष्ट्वाममकारुण्यंप्रसीदभगवन्प्रभो ब्रह्मोवाच संहर्तुंनचमेकामोएतदेवंभवेदिति पृथिव्याहितकामंतुततोमां
मन्युराविशत् इयंहिमांसदादेवीभारार्तासमचूचुदत् संहारार्थंमहादेवभारेणाभिहतासती ततोहंनाधिगच्छा
मितयोबहुविधंतदा [redacted]
संहारमप्रमेयस्यततोमांमन्युराविशत् रुद्रउवाच संहारार्थंप्रसीदस्वमारुषोवसुधाधिप माप्रजाःस्था
वराश्चैवजंगमाश्चव्यनीनशत् तवप्रसादाद्भगवन्निदंवर्त्तेत्रिधाजगत् अनागतमतीतंचयच्चसंप्रतिवर्त्तते भग
वान्क्रोधसंदीप्तःक्रोधादग्निंसमासृजत् सदहन्पर्श्मकूटानिद्रुमांश्चसरितस्तथा पल्वलानिचसर्वाणिसर्वंचै
वतृणोलपाः स्थावरंजंगमंचैवनिःशेषंकुरुतेजगत् प्रसीदभगवन्सत्वंरोषोनस्याद्वरोमम सर्वेहिसृष्टानश्यं
तितवदेवकथंचन तस्मान्निवर्त्ततांतेजस्त्वय्येवेहप्रलीयतां तत्पश्यदेवसुभृशंप्रजानांहितकाम्यया यथेमेप्राणि
नःसर्वेनिवर्त्तेरंस्तथाकुरु अभावंनेहगच्छेयुरुत्सन्नजननाःप्रजाः आदिदेवनियुक्तोस्मित्वयालोकेषुलोककृत् मा
विनश्येज्जगन्नाथजगत्स्थावरजंगमं प्रसादाभिमुखंदेवंतस्मादेवंब्रवीम्यहं नारदउवाच श्रुत्वाहिवचनंदेवः प्र
जानांहितकारणे तेजःसंधारयामासपुनरेवांतरात्मनि ततोग्निमुपसंहृत्यभगवांल्लोकसत्कृतः प्रवृत्तिंचनि
वृत्तिंचकल्पयामासवैप्रभुः उपसंहरतस्तस्यतमग्निंरोषजंतथा प्रादुर्बभूवविश्वेभ्योगोभ्योनारीमहात्मनः
कृष्णारक्तातथापिंगारक्तजिह्वास्यलोचना कुंडलाभ्यांवराजेंद्रतप्ताभ्यांतप्तभूषणासानिःसृत्य श्रीराम० ५८

तथा खेभ्यो दक्षिणां दिशमाश्रिताः स्मयमाना च सावेक्ष्य देवौ विश्वेश्वरावुभौ तस्माद्रूपतदा देवो लोकादिनिधनेश्वर
ः मृत्यो हृतिमहिष्या तु जहि चेमाः प्रजा इति त्वं हि संहारबुध्याथ प्रादुर्भूतारुषो मम तस्मात्संहर सर्वास्त्वं प्रजाः
सजडपंडिताः मम त्वं हि नियोगेन ततः श्रेयो ह्यवाप्स्यसि एवमुक्ता तु सा तेन मृत्युः कमललोचना दध्यौ चात्य
र्थमबला प्ररुरोद च सुस्वरं पाणिभ्यां प्रतिजग्राह तान्यश्रूणि पितामहः सर्वभूतहितार्थाय तां चाप्यनुनयत्त
दा॥ ॥इति द्रोणपर्वणि मृत्युप्रजापतिसंवादे नारद उवाच विनीय दुःखमबलात्मन्येव प्रजापतिं उवाच
प्रांजलिर्भूत्वा लतेवावर्जिता पुनः मृत्युवाच त्वया सृष्टा कथं नारी ईदृशी वदतां वर क्रूरं कर्माहितं कुर्यां तद्
वकिमु जानती बिभेम्यहमधर्माद्धि प्रसीद भगवन्प्रभो प्रियान्पुत्रान्वयस्यांश्च भ्रातॄन्मातॄन्पितॄन्पतीन्
अपध्यास्यंति मे देव मृतेभ्यो बिभेम्यहं कृपणानां हि रुदतां ये पतंत्यश्रुबिंदवः तेभ्योहं भगवान्भीता श
रणं त्वाहमागता यमस्य भवनं देव गच्छेयं न सुरोत्तम कोपेन विनयोपेताम् क्रूंदयेन खेनच एतदिच्छाम्यहं
कामं त्वत्तो लोकपितामह इच्छेयं त्वत्प्रसादाद्धि तपस्तप्तुं प्रजेश्वर प्रदिशेमं वरं देव त्वं मह्यं भगवन्प्रभो त्वया
ह्युक्ता गमिष्यामि धेनुकाश्रममुत्तमं तत्र तप्स्ये तपस्तीव्रं तवैवाराधने रता नहि शक्ष्यामि देवेश [redacted] प्राणा
न्प्राणभृतां प्रियान् हर्तुं विलपमानानामधर्मादभिरक्ष मां ब्रह्मोवाच मृत्यो संकल्पितासि त्वं प्रजासंहारहेतु
ना गच्छ संहर सर्वास्त्वं प्रजा मा ते विचारणा भवितात्वेतदेवं हि नैतज्जात्वन्यथा भवेत् भव त्वनिंदिता लोके कुरुष्व व
चनं मम नारद उवाच एवमुक्ताभवत्प्रीता प्रांजलिर्भगवन्मुखी संहारे नाकरोद्बुद्धिं प्रजानां हितकाम्यया तूक्ष्मा

द्रो॰ ५७

मासीत्तदा देवः प्रजानामीश्वरेश्वरः प्रसादं चागमात्क्षिप्रमात्मनैव प्रजापतिः स्मयमानश्च देवेशो लोकान्सर्वानवेक्ष्य
च लोकांस्त्वासन्यथापूर्वं दृष्टा तेनापमन्युना निवृत्ते रोषे तस्मिंस्तु भगवत्यपराजिते सा कन्यापि जगामाथ समी
पं तस्य धीमतः अपसृत्या प्रतिश्रुत्य प्रजासंहरणं तदा त्वरमाणा च राजेंद्र मृत्युर्धैनुकमभ्यगात् सा तत्र परमं ती
व्रं चचार व्रतमुत्तमं सा तदा ह्येकपादेन तस्थौ पद्मानि षोडश पंचाब्दानि तु कारुण्यात्प्रजानां तु हितैषिणी इंद्रियाणींद्रिया
र्थेभ्यः प्रियेभ्यः संनिवर्त्य सा ततस्त्वेकेन पादेन पुनरप्यन्यानि सप्त वै तस्थौ पद्मानि षट्चैव सप्त चैकं च पार्थिव ततः पद्मा
युतं तात मृगैः सह चचार सा पुनर्गत्वा ततो नंदां पुण्यां शीतामलोदकां अप्सु वर्षसहस्राणि चचार नियमं पुनः पंचगंगेषु
सा पुण्या कन्या वेतसकेषु च तपोविशेषैर्बहुभिः कर्षयद्देहमात्मनः ततो गत्वा तु सा गंगां महामेरुं च केवलं तस्थौ चा
श्मेव निश्चेष्टा प्राणायामपरायणा पुनर्हिमवतो मूर्ध्नि यत्र देवाः पुरायजन् तत्रांगुष्ठेन सा तस्थौ निखर्वं परमा शुभा
पुष्करेष्वथ गोकर्णे नैमिषे मलये तथा अपाकर्षत्स्वकं देहं नियमैर्मनसः प्रियैः अनन्यदेवता नित्यं दृढभ
क्ता पितामहे तस्थौ पितामहं चैव तोषयामास धर्मतः ततस्तामब्रवीत्प्रीतो लोकानां प्रभवोव्ययः सौम्येन मनसा
राजन्प्रीतः प्रीतमनास्तदा मृत्यो किमिदमत्यंतं तपांसि चरसीति ह ततोब्रवीत्पुनर्मृत्युर्भगवंतं पितामहं नाहं हन्यां प्रजा दे
व स्वस्थाश्चाक्रोशतीस्तथा एतदिच्छामि सर्वेश त्वत्तो वरमहं प्रभो अधर्मभयभीतास्मि ततोहं तपआस्थिता भीतायास्तु
महाभाग प्रयच्छाभयमव्ययं आर्त्तां चानागसीं नारीं याचामि भव मे गतिः तामब्रवीत्ततो देवो भूतभव्यभविष्यवित् अध
र्मो नास्ति ते मृत्यो संहरंत्या इमाः प्रजाः मया चोक्तं मृषा भद्रे भविता न कथंचन तस्मात्संहर कल्याणि प्रजाः सर्वाश्चतुर्विधाः श्रीराम॰

५७

धर्मः सनातनश्च त्वां सर्वथा याचयिष्यति लोकपालो यमश्चैव सहाया व्याधयस्तथा अहं च विबुधाश्चैव पुनर्दास्याम ते वरं
यथा त्वमेनसा मुक्ता विरजाः ख्यातिमेष्यसि सैवमुक्ता महाराज कृतांजलिरिदं विभुं पुनरेवाब्रवीद्वाक्यं प्रसाद्य शिरसा तत
दा यद्येवमेतत्कर्तव्यं मया न स्याद्धि नाप्रभो तवाज्ञा मूर्ध्नि मे न्यस्ता यत्ते वक्ष्यामि तच्छृणु लोभः क्रोधोऽभ्यसूयेर्ष्या द्रोहो
मोहश्च देहिनां अह्रीश्चान्योन्यपरुषा देहं भिंद्युः पृथग्विधाः ब्रह्मोवाच तथा भविष्यते मृत्यो साधु संहर मो प्रजाः अ
धर्मस्ते न भविता नापध्यास्याम्यहं शुभे यान्यश्रुबिंदूनि करे समाहृते ते व्याधयः प्राणिनामात्मजाताः ते मारयिष्यं
ति नरान्गतासून्नाधर्मस्ते भविता मास्म भैषीः नाधर्मस्ते भविता प्राणिनां वै त्वं वै धर्मस्त्वं हि धर्मस्य वैषा धर्म्या मृत्यो
धर्मनित्या धरित्री तस्मात्प्राणान्सर्वथेमान्नियच्छ सर्वेषां वै प्राणिनां कामरोषौ संत्यज्यातः संहरस्वेह जीवान् एवं
धर्मस्त्वां भविष्यत्यनंतो मिथ्यावृत्तान्मारयिष्यत्यधर्मः तेनात्मानं पावयस्वात्मनो वै त्वं पेनात्मानं मज्जयिष्यं
त्यसत्वाः तस्मात्कामं रोषमप्यागतं त्वं संत्यज्यातः संहरस्वेह जीवान् नारद उवाच सा वै भीता मृत्युसंज्ञोपदेशाच्छा
पाद्भीता वाढमित्यब्रवीत्तं सा च प्राणं प्राणिनामंतकाले कामक्रोधौ त्यज्य हरत्यसक्ता मृत्युस्तेषां व्याधयस्तत्प्रसू
ता व्याधी रोगो युज्यते येन जंतुः सर्वेषां च प्राणिनां प्राणभीते तस्माच्छोकं मा कृथा निःफलं त्वं सर्वे देवाः प्राणिनां प्रा
यणांते गत्वा दत्ताः संनिवृत्तास्तथैव एवं सर्वे प्राणिनामाभ्युगत्वा हत्वा देवा मर्त्यवद्राजसिंह वायुर्भीमो भीमनादो
महौजा भेत्ता देहान्प्राणिनां सर्वगोऽसौ नैवावृत्तिं नैव वृत्तिं कदाचित्प्राप्नोत्युग्रोऽनंततेजा विशिष्टः सर्वे देवा मर्त्यसं
ज्ञा विशिष्टास्तस्मात्पुत्रं मा शुचो राजसिंह स्वर्गं प्राप्तो मोदते ते तनूजो नित्यं रम्यान्वीरलोकानवाप्य त्यक्त्वा दुःखं सं

द्रो०
६०

गतः पुण्यकृद्भिरेषाम् तस्तु दैवदिष्टा प्रजानां प्राप्ते काले संहरिस्त्रीय यथावत्स्वयं कृतान्स्ताराहरात्मजानां आत्मानं वै प्रा
शिनो घ्नंति सर्वेनेनं मृत्युर्दैव पाशि हि नास्ति तस्मान्मृतान्नानुशोचंति धीरा मृत्युं ज्ञात्वा निश्चयं ब्रह्मसृष्टं दृष्टं सृ
ष्टिं देवकृप्तां विदित्वा पुत्रान्नष्टान् शोकमाशु त्यजस्व द्वैपायन उवाच एतच्छ्रुत्वार्थवद्वाक्यं नारदेन प्रकाशि
त उवाचाकंपनो राजा सखायं नारदं तदा व्यपेतशोकः प्रीतोस्मि भगवन्नृषिसत्तम श्रुत्वेतिहासं त्वत्तस्तु कृ
तार्थोस्म्यभिवादये तथोक्तो नारदस्तेन राज्ञा कृषिवरोत्तमः जगाम नंदनं शीघ्रं देवर्षिरमितात्मवान् पुण्य
पश्चात्सर्वं(स्वर्ग्यं यैवं धन्यमायुष्यमेव च अस्येतिहासस्य तदा श्रवणाच्छ्रावणात्तदा एतदर्थपदं श्रुत्वा तदा राजा युधिष्ठिरः
क्षत्रधर्मं च विज्ञाय शूराणां च परां गतिं संप्राप्तोसौ महावीर्यैः स्वर्गलोकं महारथः अभिमन्युः परान्हत्वा
सर्व प्रमुखे धन्विनां युध्यमानो महेष्वासो हतः सोभिमुखो रणे असिना गदया शक्त्या धनुषा च महारथः विर
जाः सोमसूनुः स पुनस्तत्र प्रलीयते तस्मात्परां धृतिं कृत्वा भ्रातृभिः सह पांडव अप्रमत्तः सुसंनद्धः शीघ्रं
योद्धुमुपाक्रम द्रोणपर्वणि प्रजापतिमृत्युसंवादः संजय उवाच श्रुत्वा मृत्युसमुत्पत्तिं कर्माण्यनुपमानि च
धर्मराजः पुनर्वाक्यं प्रसाद्येनमथाब्रवीत् युधिष्ठिर उवाच गुरवः पुण्यकर्माणः शक्रप्रतिमविक्रमाः स्थाने रा
जर्षयो ब्रह्मन्ननघाः सत्यवादिनः भूय एव तु मां तथ्यैर्वचोभिरभिबृंहय राजर्षीणां पुराणानां समाश्वासय कर्मभिः
कियंत्यो दक्षिणा दत्ताः कैश्च दत्ता महात्मभिः राजर्षिभिः पुण्यकृद्भिस्तद्भवान्प्रब्रवीतु मे व्यास उवाच श्वैत्यस्य
नृपतेः पुत्रः संजयो नाम नामतः सखायौ तस्य वै चास्तां पर्वतनारदौ तौ कदाचिद्गृहं तस्य प्रविष्टौ तद्दि
दृक्षया विधिवच्चार्चितौ तेन प्रीतौ तत्रोषतुः सुखं तं कदाचित्सुखासीनं ताभ्यां सह शुचिस्मिता दुहिताभ्या। श्रीराम०

६०

गमत्कन्या संजयस्य वरवर्णिनी तयाभिवादितः कन्यामभ्यनंदद्यथाविधि तल्लिंगाभिराशीर्भिरिष्टाभिरभितः स्थिता तां
निरीक्ष्याब्रवीद्वाक्यं पर्वतः प्रहसन्निव कस्येयं चंचलापांगी सर्वलक्षणसंमता उताहो भाः स्विदर्कस्य ज्वलनस्य शि
खा त्वियं श्रीर्ह्रीः कीर्तिर्धृतिः पुष्टिः सिद्धिश्चंद्रमसः प्रभा एवं ब्रुवाणं देवर्षिं नृपतिः संजयोब्रवीत ममेयं भगव
कन्या मत्तो वरमभीप्सति नारदस्त्वब्रवीदेनं देहि मह्यमिमां नृप भार्यार्थं सुमहच्छ्रेयः प्राप्तुं चेदिच्छसे नृप ददा
नीत्येव संहृष्टः संजयः प्राह नारदं पर्वतस्तु ससंक्रुद्धो नारदं वाक्यमब्रवीत हृदयेन मया पूर्वं वृता वै वृतवानसि
यस्माद्वृता त्वया विप्र मागाः स्वर्गं यथेप्सया एवमुक्तो नारदस्तं प्रत्युवाचोत्तरं वचः मनोवाग्बुद्धिसंभाषादत्ता
श्चोदकपूर्वकं पाणिग्रहणमंत्राश्च प्रथितं वरलक्षणं नत्वेषा निश्चिता निष्ठा निष्ठा सप्तपदी सतां अनुत्पन्ने
व कार्यार्थे मां त्वं व्याहृतवानसि तस्मात्त्वमपि न स्वर्गं गमिष्यसि मया विना अन्योन्यमेवं शप्त्वा वै तस्थतुस्त
त्र तौ तदा अथ सोपि नृपो विप्रान्पानाच्छादनभोजनैः पुत्रकामः परं शक्त्या यत्नाच्चोपाचरच्छुचिः तस्य प्रसन्ना
विप्रेंद्राः कदाचित्पुत्रमीप्सवः तपःस्वाध्यायनिरता वेदवेदांगपारगाः सहिता नारदं प्राहुर्देह्यस्मै पुत्रमीप्सितं
तथेत्युक्ता द्विजैरुक्तः संजयं नारदोब्रवीत तुभ्यं प्रसन्ना राजर्षे पुत्रमीप्संति ब्राह्मणाः वरं वृणीष्व भद्रं ते यादृशं पु
त्रमीप्सितं तथोक्तः प्रांजली राजा पुत्रं वव्रे गुणान्वितं यशस्विनं कीर्तिमंतं तेजस्विनमरिंदम यस्य मूत्रं पुरीषं च क्लेदः
स्वेदश्च कांचनं सुवर्णष्ठीविरित्येवं तस्य नामाभवत्कृतं तस्मिन्वरप्रदानेन प्रवर्द्धत्यमितं धनं कारयामास नृपतिः

सौवर्णसर्वमेवाभीष्टं गृहप्राकारदुर्गाणि ब्राह्मणावसथान्यपि शय्यासनानि यानानि स्थालीपिठरभाजनं तस्य राज्ञोऽपि य
द्वेश्म बाह्यश्चोपस्कराश्च ये सर्वं तत्कांचनमयं कालेन परिवर्द्धितं अथ दस्युगणाः श्रुत्वा दृष्ट्वा चैनं तथाविधं संभू
य तस्य नृपतेः समारब्धाश्चिकीर्षितुं केचित्तत्राब्रुवन्राज्ञः पुत्रं गृह्णीम वै स्वयं सोऽस्याकरः कांचनस्य तत्र यत्नं वरा
महे ततस्ते दस्यवो लुब्धाः प्रविश्य नृपतेर्गृहं राजपुत्रं ततो जह्रुः सुवर्णष्ठीविनं बलात् गृहीत्वैनमनुपायज्ञा नी
त्वारण्यमचेतसः हत्वा विशस्य चाप्येनं लब्धा वसु न किंचन तस्य प्राणैर्विमुक्तस्य नष्टं तद्वरदं वसु दस्यवश्च
न तदाप्योन्यं जघ्नुर्मूर्खा विचेतसः हत्वा परस्परं नष्टाः कुमारं चाद्भुतं भुवि असंभाव्यं गता घोरं नरकं दुष्टकारिणः
तं दृष्ट्वा निहतं पुत्रं वरदत्तं महातपाः विललाप सुदुःखार्त्तो बहुधा करुणं नृपः विलपंतं निशम्याथ पुत्रशोकहतं नृ
पं प्रत्यदृश्यत देवर्षिर्नारदस्तस्य सन्निधौ उवाच चैनं दुःखार्त्तं विलपंतमचेतसं संजयं नारदोऽभ्येत्य तन्निबोध युधिष्ठि
र कामानामवितृप्तस्त्वं संजयेह मरिष्यसि यस्यावेतेवयं गेहे उषिता ब्रह्मवादिनः आविक्षितं मरुत्तं वै मृतं संजय
शुश्रुम संवर्तो याजयामास स्पर्द्धया वै बृहस्पतेः अस्मै राजर्षये प्रादाद्धनं स भगवान्प्रभुः हैमं हिमवतः पादं यियक्षो
र्विधेः सर्वे यस्य सेंद्रा मरुद्गणा बृहस्पतिपुरोगमाः देवा विश्वसृजः पार्श्वे यजनाते समासते यज्ञवाटस्य सौवर्णाः स
र्वे वास्य परिच्छदाः यस्य सर्वं तदा ह्यन्नं मनोभिप्रायगं शुचि कामतो बुभुजुर्विप्राः सर्वे चान्नार्थिनो द्विजाः पयो दधि घृतं क्षौ
द्रं भक्ष्यं भोज्यं च शोभनं यस्य यज्ञेषु सर्वेषु वासांस्याभरणानि च ईप्सितान्युपतिष्ठंते प्रसृष्टा वेदपारगान् मरुतः प ५५
रिवेष्टारो मरुत्तस्याभवन् गृहे आविक्षितस्य राजर्षेर्विश्वेदेवाः सभासदः यस्य वीर्यवतो राज्ञः सुवृष्ट्या सस्यसंपदः

हविर्भिस्तर्पिता येन सम्यक्कॢप्तैर्दिवौकसः ऋषीणां च पितॄणां च देवानां सुखजीविनां ब्रह्मचर्य्यक्रतिमुखैः सर्वै
र्दानैश्च संपदा शयनासनयानानि स्वर्णराशीश्च हस्त्यश्वाः तत्सर्वं समभिज्ञं विप्रेंद्रे विप्रेभ्य दक्षया सोनुध्यात
सुशक्रेण प्रजाहृत्वा निरामयाः श्रद्दधानो जितान्लोकान्गतः पुण्यकृतोक्षयान् सपुत्रजः सपामात्यः सदा
रापत्यबांधवः यौवनेन सहस्राक्षं मत्तो राजमर्त्यशान्त सचेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं
मापुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येत्यव्याहरत्॥ ॥इति द्रोणपर्वणि षोडशराजन्यो
पाख्याने नारद उवाच सुहोत्रं नाम राजानं मृतं संजय शुश्रुम एकवीरमशक्यं तममरैरभिवीक्षितुं यः प्राप्य
राज्यं धर्मेणऋत्विग्ब्रह्मपुरोहितान् अपृच्छदात्मनः श्रेयः पृष्ट्वा तेषां मते स्थितः प्रजानां पालनं धर्मो दानमि
ज्याहिषज्जयः एतत्सुहोत्रो विज्ञाय धर्मेणौच्छद्धनागमं धर्मेणाराधयन्देवान्वाणैः शत्रून्जयंस्तथा सर्वा
णपिवभूतानि स्वगुणैरप्यरंजयत् यो भुंक्ते मां वसुमतीं म्लेच्छाटविकवर्जितां यस्मै ववर्ष पर्जन्यो हिरण्यं परि
वत्सरान् हैरण्यास्तत्रवाहिन्यः स्वैरिण्यो व्यवहन्पुरा ग्राहान्कर्कटकांश्चैव मत्स्यांश्च विविधान्बहून् कामान्व
र्षति पर्जन्यो रूप्याणि विविधानि च सौवर्णान्यप्रमेयानि वाप्यश्च क्रोशसंमिताः सहस्रं वामनान्कुब्जान्नक्रान्म
करकच्छपान् सौवर्णान्विहितान्दृष्ट्वा ततो स्मयत वै तदा तत्सुवर्णमपर्यन्तं राजर्षिः कुरुजांगले ईजानो वितते यज्ञे
ब्राह्मणेभ्यो ह्यमन्यत सोश्वमेधसहस्रेण राजसूयशतेन च पुण्यैः क्षत्रिययज्ञैश्च प्रभूतवरदक्षिणैः काम्यनैमित्तिका
जस्त्रोरिष्टां गतिमवाप्तवान् स चेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः अयज्वा

नमदाक्षिणममिश्वैत्येतिव्याहरन् द्रोणपर्वणिषोडशराजकीये नारदउवाच राजानंपौरवंवीरंमृतंसंजयशुश्रुम
सहस्रंयःसहस्राणांश्वेतानश्वानवासृजत् तस्याश्वमेधराजर्षेर्देशाद्देशात्समेयुषां शिक्षाक्षरविधिज्ञानांनासी
त्संख्याविपश्चितां वेदविद्याव्रतस्नाताबदान्याःप्रियदर्शनाः सुभिक्षाच्छादनगृहाः सुशय्यासनवाहनाः नटनर्त्त
कगंधर्वैःपूर्णकैर्वर्द्धमानकैः नित्योद्योगैश्चक्रीडद्भिस्तत्रस्मपरिहर्षिताः यज्ञेयज्ञेयथाकालंदक्षिणाःसोऽप्यकालय
त् द्विपादशसहस्राख्याःप्रमदाःकांचनप्रभाः सध्वजाःसपताकाश्चरथाहेममयास्तथा यःसहस्रंसहस्राणिक
न्याहेमविभूषिताः धुर्येजाश्वगजारूढाःस्वगृहक्षेत्रगोशताः शतंशतसहस्राणिस्वर्णमालीमहात्मनां गवां
सहस्रानुचरान्दक्षिणामत्यकालयत् हेमशृंगीरौप्यखुराःसवत्साःकांस्यदोहनाः दासीदासखरोष्ट्रांश्चप्रादाद्राजा
विकंबहु रत्नानांविविधानांचविविधांश्चान्नपर्वतान् तस्मिन्संविततेयज्ञेदक्षिणामत्यकालयत् तत्रास्यगाथा
गायंतीयेपुराणविदोजनाः अंगस्ययजमानस्यस्वधर्माधिगताःशुभाः गुणोत्तराःक्रतवस्तस्यासन्सार्वकामि
काः सचेन्ममारसंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यंमापुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वै
त्येतिव्याहरन्॥ ॥इतिद्रोणपर्वणिषोडशराजिके नारदउवाच शिबिमौशीनरंचापिमृतंसंजयशुश्रुम यइमांपृ
थिवीसर्वांचर्मवत्परिवेष्टयत् सशैलद्वीपार्णववनां रथघोषेणनादयन् सशिविर्वैरिपून्नित्यंमुख्यान्निघ्नन्सपत्नजि
त् तेनयज्ञैर्बहुविधैरिष्टंपर्याप्तदक्षिणैः सराजावीर्यवान्धीमानवाप्यवसुपुष्कलं सर्वमूर्द्धाभिषिक्तानांसंमं
तःसोभवद्युधि अयजंश्चाश्वमेधैर्योविजित्यपृथिवीमिमां निरर्गलैर्बहुफलैर्निष्ककोटिसहस्र
दः हस्त्यश्वपशुभिर्धान्यैर्मृगैर्गोजाविभिस्तथा विविधांपृथिवींपुण्यांशिबिर्ब्राह्मणसात्करोत् या

वंश्योवर्षतोधारायावद्योदिविताराकाः यावंतः सिकता गांग्योयावन्मेरोर्महोपलाः उदन्वतिच यावंति रत्नानि प्राणिनोपि
च तावतीरददद्गा वै शिविरौशीनरोध्वरे नोद्यंतारं धुरं तस्य किंचिदन्यं प्रजापतिः भूतं भव्यं भवंतं वा नाध्यगच्छन्नरोत्तमं
तस्यासन् विविधा यज्ञाः सर्वकामैः समन्विताः हेमयूपासनगृहा हेमप्राकारतोरणाः शुचि स्वाद्वन्नपानं च ब्राह्मणाः प्र
युतायुताः नानाभक्ष्यैः प्रियकथाः पयोदधिमहाह्रदाः तस्यासन्नद्यतवरदिष्टुनद्यः शुभ्राऽन्नपर्वताः पिबत स्नात खा
दध्वमिति यत्रोचते जनाः यस्मै प्रादाद्वरं रुद्रस्तुष्टः पुण्येन कर्मणा अक्षयं ददतो वित्तं श्रद्धा कीर्तिस्तथा क्रिया य
थोक्तमेव भूतानां प्रियत्वं स्वर्गमुत्तमं एतान् लब्ध्वा वरानिष्टान् शिबिः काले दिवंगतः स चेन्ममार संजय चतुर्भद्रत
रस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन् ॥ ॥ द्रोणपर्वणि षो
डशराजिके नारद उवाच रामं दाशरथिं चैव मृतं संजय शुश्रुम यं प्रजा अन्वमोदंत पिता पुत्रानिवौरसान् अ
संख्येया गुणा यस्मिन्नासन्नमिततेजसि यश्चतुर्दश वर्षाणि निदेशात्पितुरच्युतः वने वनिता यया सार्द्धमवसल्लक्ष्म
णाग्रजः जघान च जनस्थाने राक्षसान्मनुजर्षभः तपस्विनां रक्षणार्थं सहस्राणि चतुर्दश तत्रैव वसतस्तस्य रावणो
नाम राक्षसः जहार भार्यां वैदेहीं संमोह्यैनं सहानुजं तमागस्कारिणं रामः पौलस्त्यमजितं परैः जघान समरे क्रुद्धः
पुरेव त्र्यंबकोंधकं सुरासुरैरवध्यं तं देवब्राह्मणकंटकं जघान स महाबाहुः पौलस्त्यं सगणं रणे सप्रजानुग्रहं कृ
त्वा त्रिदशैरभिपूजितः व्याप्य कृत्स्नं जगत्कीर्त्या सुरर्षिगणसेवितः संप्राप्य विविधं राज्यं सर्वभूतानुकंपक
ः आजहार महायज्ञं प्रजाधर्मेण पालयन् निरर्गलं सजारूथ्यमश्वमेधशतं विभुः आजहार सुरेशस्य

द्रो० हविषामुदमाहरत् अन्यैश्चविविधैर्यज्ञैरीजेबहुगुणैर्नृपः क्षुत्पिपासेजयद्रामः सर्वरोगांश्चदेहिनां सततंगुणसंप
६३ न्नोदीप्यमानः स्वतेजसा अतिसर्वाणिभूतानिरामोदाशरथिर्बभौ ऋषीणांदेवतानांचमानुषाणांचसर्वशः
पृथिव्यांसहवासोभूद्रामेराज्यंप्रशासति नाहीयततदाप्राणः प्राणिनांनतदन्यथा प्राणापानसमानश्चरामेराज्यं
प्रशासतिपर्यदीप्यततेजांसितदानर्थाश्चनाभवन् दीर्घायुषः प्रजाः सर्वाः युवानम्रियतेतदा वेदैश्चतुर्भिः संप्रीता
प्राप्नुवंतिदिवौकसः हव्यंकव्यंचविविधंनिष्पूर्त्तंहुतमेवच अदंशमशकादेशानष्टव्यालसरीसृपाः नाप्सु
प्राणभृतांमृत्युर्नाकालेज्वलनोदहत् अधर्मरुचयोलुब्धामूर्खावानभवंस्तदा शिष्टेष्टयज्ञकर्माणः सर्ववर्णास्त
दाभवन् स्वधांपूजांचरक्षोभिर्जनस्थानेप्रणाशिते प्रादान्निहत्यरक्षांसिपितृदेवेभ्यईश्वरः सहस्रपुत्राः पुरुषा
दशवर्षशतायुषः नचज्येष्ठाः कनिष्ठेभ्यस्तदाश्राद्धान्यकारयन् श्यामोयुवालोहिताक्षोमत्तमातंगविक्रमः आ
जानबाहुः सुभुजः सिंहस्कंधोमहाबलः दशवर्षसहस्राणिदशवर्षशतानिच सर्वभूतमनःकांतोरामोराज्यमका
रयत् रामोरामोरामइतिप्रजानामभवत्कथा रामाद्रामंजगदभूद्रामेराज्यंप्रशासति चतुर्विधाः प्रजारामः
स्वर्गंनीत्वादिवंगतः आत्मानंसंप्रतिष्ठाप्यराजवंशमिहाष्टधा सचेन्ममारसंजयचतुर्भद्रतरस्त्वया पुत्रात्पु
ण्यतरस्तुभ्यंमापुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येतिव्याहरत्॥ ॥इतिद्रोणपर्वणिषोडशराजिके
नारदउ० भगीरथंचराजानंमृतंसंजयशुश्रुम येनभागीरथीगंगाचयनैःकांचनैश्चिता यःसहस्रंसहस्राणांकन्याहेमवि श्री[illegible]॥
६३

भूषिताः राजन्स्त्रीराजपुत्रांश्च ब्राह्मणेभ्यो ह्यमन्यत सर्वा रथगताः कन्या रथाश्च सर्वे चतुर्युजः रथे रथे शतं नागाः सर्वे वै हेममा
लिनः सहस्रमश्वाश्चैकैकं गजानां पृष्ठतोऽन्वयुः अश्वे अश्वे शतं गावो गवां पश्चादजाविकं तेनाक्रांता जनौघेन दक्षि
णा भूयसी र्द्ददत उपह्वरे ति व्यथिता तस्यांके निषसाद ह तथा भागीरथी गंगा उर्वशी चाभवत्पुरा दुहितृत्वं गता रा
ज्ञः पुत्रत्वमगमत्तदा तां तु गाथां जगुः प्रीता गंधर्वाः सूर्यवर्चसः पितृदेवमनुष्याणां शृण्वतां वल्गुवादिनां भगीरथं
यजमानमैक्ष्वाकुं भूरिदक्षिणं गंगा समुद्रगा देवी वव्रे पितरमीश्वरं तस्य सेंद्रैः सुरगणैर्देवैर्यज्ञः स्वलंकृतः स
म्यक् परिगृहीतश्च शांतविघ्नो निरामयः यो यदिच्छेत विप्रो वै यत्र यत्रात्मनः प्रियं भगीरथस्तदा प्रीतस्तत्र तत्राददद्धु
री नादेयं ब्राह्मणस्यासीद्यस्य यत्स्यात्प्रियं धनं सोपि विप्रप्रसादेन ब्रह्मलोकं गतो नृपः येन याता तनारद
मखमुखो दिशा शाविहृपादपाः तेनावस्थातुमिच्छंति तं गत्वा राजमीश्वरं स चेन्ममार संजय चतुर्भद्रतरस्त्वया
पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ ॥ इति द्रोणपर्वणि षो
डशराजिके नारद उवाच दिलीपं चैव दैलविलं मृतं संजय शुश्रुम यस्य यज्ञशतेष्वासन्प्रयुतायुतशो द्विजाः तत्वज्ञाना
र्थसंपन्ना यज्वानः पुत्रपौत्रिणः य इमां वसुसंपूर्णां वसुधां वसुधाधिपः ईजानो वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत
दिलीपस्य तु यज्ञेषु कृतः पंथा हिरण्मयः तं धर्म इव कुर्वाणाः सेंद्रा देवाः समागमन् चषालं प्रचषालं च यस्य यूपे हि
रण्मये एगणाश्च भोज्यपेश्च मत्ताः पथिषु शेरते तदेतदद्भुतं मन्ये अन्यैर्न सदृशं नृपैः यदप्सु युध्यमानस्य चक्रेण परि

द्रो० पेतनुः राजानंदृष्टवानंदिलीपंसत्यवादिनं येपश्यन्सुरिदाक्षिराण्ंतेपिस्वर्गजितानराः पंचशब्दानजीर्यंतिखट्वांगस्यनि
६४ वेशने स्वाध्यायघोषोज्याघोषःपिबताश्नीतखादत सचेन्ममारसृंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मापु
त्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येतिव्याहरन्॥ ॥इतिद्रोणपर्वणिषोडशराजिके नारदउवाच मां
धाताचेद्यौवनाश्वोमृतः सृंजयशुश्रुम देवासुरमनुष्याणांत्रैलोक्यविजयीनृपः यंदेवावश्विनौगर्भात्पितुःपूर्वंचकर्ष
तुः मृगयांविचरंस्तातातृषितःक्लांतवाहनः धूमंदृष्ट्वागमत्सत्रंपृषदाज्यमवापसः तंदृष्ट्वायुवनाश्वस्यजठरेसूनुतांग
तं गर्भाद्धिजह्रतुर्देवावश्विनौभिषजांवरौ तंदृष्ट्वापितुरुत्संगेशयानंदेववर्चसं अन्योन्यमब्रुवन्देवाः कमयंधास्य
तीतिवै मामेवायंधयत्वग्रेइतिहस्माहवासवः ततोंगुलिभ्योहींद्रस्यप्रादुरासीत्पयोमृतं मांधास्यतीतिकारुण्याद्यदिं
द्रोह्यन्वकंपयत् तस्मात्तुमांधातेत्येवंनामतस्याद्भुतंकृतं ततस्तुधाराःपयसोघृतस्यचमहात्मनः तस्यास्येयौ
वनाश्वस्यपाणिरिंद्रस्यचास्रवत् अपिबत्पाणिमिंद्रस्यसमासादभ्यवर्द्धत सोभवद्द्वादशसमोद्वादशाहेनवीर्यवा
न् इमांचपृथिवींकृत्स्नामेकाह्नासमजीजयत् धर्मात्माधृतिमान्वीरःसत्यसंधोजितेंद्रियः जनमेजयंसुधन्वानंगयंपू
रुंबृहद्रथं असितंचैवरामंचमांधातामनुजोजयत् उदेतिचयतःसूर्योयत्रचप्रतितिष्ठति तत्सर्वंयौवनाश्वस्यमां
धातुःक्षेत्रमुच्यते सोश्वमेधशतैरिष्ट्वाराजसूयशतेनच अददाद्रोहितान्मत्स्यान्ब्राह्मणेभ्योविशांपते हैरण्या
न्योजनोत्सेधानायतान्शतयोजनं बहुप्रकारान्सुस्वादून्भक्षभोज्यान्नपर्वतान् अतिरिक्तंब्राह्मणेभ्योभुं श्रीराम०
जन्नाहीयतेजनः भक्षान्नपाननिचयाःशुशुभुस्त्वन्नपर्वताः घृतह्रदाः सूपपंकादधिफेनागुडोदकाः रुरुधुः ६४

पर्वतान्नद्यो मधुक्षीरवहाः प्रभोः देवासुरा नरा यक्षा गंधर्वोरगपक्षिणः विप्रास्तत्रागतास्त्वासन् वेदवेदांगपारगाः ब्राह्म
णाश्चर्षयश्चापि नासंस्तत्राधिपश्चितः समुद्रांतां वसुमतीं वसुपूर्णां तु सर्वतः स तां ब्राह्मणसात्कृत्वा जगामास्तं तदा
नृपः गतः पुण्यकृतां लोकान्व्याप्य स्वयशसा दिशः स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं माप
त्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येत्यव्याहरन्॥ ॥इति द्रोणपर्वणि षोडशराजिके नारद उवाच य
यातिं नाहुषं चैव मृतं सृंजय शुश्रुम राजसूयशतैरिष्ट्वा सोश्वमेधशतेन च पुंडरीकसहस्रेण वाजपेयशतैस्तथा अ
तिरात्रसहस्रेण चातुर्मास्यैश्च कामतः अग्निष्टोमैश्च विविधैः सत्रैश्च प्राज्यदक्षिणैः अब्राह्मणानां यद्वित्तं पृथि
व्यामस्ति किंचन तत्सर्वं परिसंख्याय ततो ब्राह्मणसात्करोत् भूत्वा देवासुरे युद्धे कृत्वा देवसहायतां चतुर्धा व्यभ
जत्सर्वां चतुर्भ्यः पृथिवीमिमां यज्ञैर्नानाविधैरिष्ट्वा प्रजामुत्पाद्य चोत्तमां देवयान्यां चौशनस्यां शर्मिष्ठायां च
धर्मतः देवारण्येषु सर्वेषु विजहारामरोपमः आत्मनः कामचारेण द्वितीय इव वासवः यदा नाभ्यगमच्छांतिं
कामानां सर्ववेदवित् ततो गाथामिमां गीत्वा सदारः प्राविशद्वनं यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः प १
नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् एवं कामान्परित्यज्य ययातिर्धृतिमेत्य च पूरुं राज्ये प्रतिष्ठाप्य प्रया
तो वनमीश्वरः स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः अयज्वा
नमदाक्षिण्यमभिश्वैत्येत्यव्याहरन्॥ ॥इति द्रोणपर्वणि षोडशराजिके नारद उवाच नाभागमंबरी
षं चैव मृतं सृंजय शुश्रुम यः सहस्रं सहस्राणां राज्ञां चैकस्त्वयोधयत् जिगीषमाणः संग्रामे समंताद्वै

द्रो०
६५

रिणाम्ययाजत् अश्वमेधैर्विदेहाघोरास्त्रंतस्थाशीविषगिरः वनता मातृशीरुत्पन्नेषांसोश्ववेनेव छत्रायुधध्वजरथां
छित्वा पार्थाग्नितव्यथः तरणेनमुक्तसन्नाहः प्रार्थयनजीवितैषिणः शरणंपमीयुः शरणंतवास्मदातिवादिनः
सजितान्नवशगान्कृत्वा जित्वाचेमांवसुंधरां ईजेयतशतैरिष्टैर्यथाशास्त्रंतथानघ बुभुजुःसर्वसंपन्नमन्न
मन्येजनाःसदा तस्मिन्यज्ञेतुविप्रेंद्राःसंतृप्ताःपरमार्चिताः मोदकान्पूरिकापूपान्स्वादुपूर्णान्शष्कुलीः
करंभान्पृथुमृद्वीकान्नन्नानिसुकृतानिच सूपान्मैरेयकापूपान्रागखांडवपानकान् मृष्टान्नानिसुयु
क्तानिमृदूनिसुरभीणिच घृतंमधुपयस्तोयंदधीनिरसवंतिच फलंमूलंचसुस्वादु द्विजास्तत्रोपभुंजते माद
नीयानिपानानिविदित्वाचात्मनःसुखं अपिबंततुयथाकामंपानपागीतवादितैः तत्रस्मगाथागायंतिक्षी
वाहृष्टाःपठंतिच नाभागस्तुतिसंयुक्तान्नन्नतुष्टूर्नसत्रशः तेषुयज्ञेष्वंबरीषोददक्षिणामत्यकालयत राज्ञांशतस
हस्राणिदशप्रयुतयाजिनां हिरण्यकवचान्सर्वान् श्वेतछत्रप्रकीर्णकान् हिरण्यस्यंदनारूढान्सानुयात्रपरिच्छ
दान ईजानांवितते यज्ञे दक्षिणामत्यकालयत मूर्द्धाभिषिक्तांश्चनृपान्राजपुत्रशतानिच सदंडकोशानिचयानब्रा
ह्मणेभ्योह्यमन्यत नैवपूर्वेजनाश्चकुर्नकरिष्यंतिचापरे यदंबरीषोनृपतिःकरोत्यमितदक्षिणः इत्येवमन्व
मोदंतप्रीतायस्यमहर्षयः सचेन्ममारसंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यंमापुत्रमनुतप्यथाः अयज्वा
नमदाक्षिण्यमभिश्वैत्येतिव्याहरत्॥ ॥इतिद्रोणपर्वणिषोडशराजिके नारदउवाच शशबिंदुंचराजानंमृतं
संजयशुश्रुम ईजेसविविधैर्यज्ञैःश्रीमान्सत्यपराक्रमः तस्यभार्यासहस्राणांशतमासीन्महात्मनः एकैकस्यांचभार्यायां

सहस्रतनयामभवन् तेकुमाराःपराक्रांताःसर्वेनिपुनधाजिनः राजानःक्रतुभिर्मुख्यैरीजानावेदपारगाः हिरण्यकवचाः
सर्वेसर्वेचोत्तमधन्विनः सर्वेश्वमेधैराजीनाःकुमाराःशशविंदवः तानश्वमेधराजेंद्र ब्राह्मणेभ्योददात्पिता शतंशतं
रथगजाएकेकंपृष्ठतोन्वयुः राजपुत्रंतदाकन्यास्तपनीयस्वलंकृताः कन्यांकन्यांशतंनागानागेनागेशतंरथाः रथेर
थेशतंचाश्वावलिनोहेममालिनः अश्वेअश्वेसहस्रंगागवांपंचाशदाविकाः एतद्धनमपर्यंतमश्वमेधेमहामखे श
शविंदुर्महाभागोब्राह्मणेभ्योत्यमन्यत वार्क्षाश्च यूपायावंतोअश्वमेधेमहामखे तेतथैवपुनस्त्वान्येतावंतःकामना
भवन् भक्षान्नपाननिचयाःपर्वताःक्रोशमुच्छ्रिताः तस्याश्वमेधेनिर्वृत्तेराज्ञःशिष्टास्त्रयोदश तुष्टपुष्टजनाकीर्णाशां
तविघ्नासवनामयाः शशविंदुरिमांभूमिंचिरंभुक्त्वादिवंगतः सचेन्ममारसृंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्त
भ्यंमापुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येत्याहरन्॥ ॥इतिद्रोणपर्वणिषोडशराजिके नारद
उवाच गयंचामूर्त्तरयसंभृतंसंजयशुश्रुम योवर्षशतंराजाहुतशिष्टाशनोभवत् तस्मैह्यग्निर्वरंप्रादात्ततोवव्रेवरंगय
ः तपसाब्रह्मचर्येणव्रतेननियमेनच गुरूणांचप्रसादेनवेदानिच्छामिवेदितुं स्वधर्मेणाविहिंस्यान्यानधनमिच्छामि
वाक्षयं विप्रेषुददतश्चैवश्रद्धाभवतुनित्यशः अनन्यासुसवर्णासुपुत्रजन्मचमेभवेत् अन्नंमेददतःश्रद्धाधर्मेम
रमतांमनः अविघ्नंचास्तुमेनित्यंधर्मकार्येषुपावक तथाभविष्यतीत्युक्त्वातत्रैवांतरधीयत गयोह्यवाप्यतत्सर्वं
धर्मेणारीनजीजयत् सदर्शपौर्णमासाभ्यांकालेष्वाग्रयणेनच चातुर्मास्यैश्चविविधैर्यज्ञैश्चावाप्तदक्षिणैः अजयच्छ्र

ऽयो राजा परिसंवत्सरान शतं गवां शतसहस्राणि शतमश्वशतानि च शतं निष्कसहस्राणि गवां चाप्ययुतानि षट् उत्था
योत्थाय सप्रादात परिसंवत्सरान शतं नक्षत्रेषु च सर्वेषु ददन्नक्षत्रदक्षिणाः इजे च विविधैर्यज्ञैर्यथा सोमोंगिरा यथा
सौवर्णां पृथिवीं कृत्वा य इमां मणिशर्करां विप्रेभ्यः प्राददद्राजा सोश्वमेधमहामखे जांबूनदमयाः यूपाः सर्वे र
त्नपरिच्छदाः गयस्यासन्समृद्धास्तु सर्वभूतमनोहराः सर्वकामसमृद्धं च प्रादादन्नं गयस्तदा ब्राह्मणेभ्यः प्रहृष्टेभ्यः
सर्वभूतेभ्य एव च ससमुद्रवनद्वीपनदीनदवनेषु च नगरेषु च राष्ट्रेषु दिवि व्योम्नि च यद्वसन् भूतग्रामाश्च विविधा
:संतृप्ता यज्ञसंपदा गयस्य सदृशो यज्ञो नास्त्यन्य इति ते ब्रुवन षट्त्रिंशद्योजनायामा त्रिंशद्योजनमायताः पश्चा
त्पुरस्ताच्चतुर्विंशद्वेदी ह्यासीद्धिरण्मयी गयस्य यजमानस्य मुक्तावज्रमणीः स्तृताः प्रादात्स ब्राह्मणेभ्योथ
वासांस्याभरणानि च यथोक्ता दक्षिणाश्चान्या विप्रेभ्यो भूरिदक्षिणा यत्र भोजनशिष्टस्य पर्वताः पंचविंशतिः
कुल्याः कुशलवाहिन्यो रसानामभवंस्तदा वस्त्राभरणगंधानां राशयश्च पृथग्विधाः यस्य प्रभावाच्च गयस्याद्यापि लोके
सुविश्रुतः वटश्चाक्षयकरणः पुण्यं ब्रह्मसरश्च तत् स चेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैव मा पुत्र
मनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन्॥ ॥इति द्रोणपर्वणि षोडशराजिके नारद उवाच सांकृतिं
रंतिदेवं च मृतं संजय शुश्रुम यस्य द्विशतसाहस्रा आसन्सूदा महात्मनः गृहानभ्यागतान्विप्रानतिथीन्परिवेषकाः
पक्वापक्वं दिवारात्रमपर्यंतधनं तदा न्यायेनाधिगतं वित्तं ब्राह्मणेभ्यो ह्यमन्यत वेदानधीत्य धर्मेण यश्चक्रे
द्विशतो वशे उपस्थिताश्च पशवः स्वयं यं शंसितव्रतं बहवः स्वर्गमिच्छंतो विधिवत्सत्रयाजिनं नदी महान

सायस्यप्रच्छन्नाचमेराशीतः तस्माच्चमेरावतीपूर्वमग्निहोत्रेभवत्पुरा ब्राह्मणेभ्योददन्निष्कान्सौवर्णान्सप्रभावतः तुभ्यं
निष्कंतुभ्यंनिष्कंइतिहस्मप्रभाषते तुभ्यंतुभ्यमितिप्रादान्निष्कान्निष्कान्सहस्रशः ततःपुनःसमाश्वास्यनिष्कानेवप्रय
च्छति अल्पंदत्तंमयाद्येतिनिष्ककोटिंप्रदायसः एकाह्नादास्यतिपुनःकोन्यस्तत्संप्रदास्यति द्विजपाणिवियोगेनदुःखं
मेशाश्वतंमहत् भविष्यतिनसंदेहएवंराजाददद्वसु सहस्रशश्चसौवर्णान्वृषभान्गोशतानुगान् साष्टंशतंसुव
र्णानांनिष्कमाहुःपलंतथा अध्यर्द्धमासमददद्ब्राह्मणेभ्यःशतंसमाः अग्निहोत्रोपकरणंयज्ञोपकरणंचयत् आ
षिभ्यःकरकान्कुंभान्स्थालीःपिठरमेवच शयनासनयानानिप्रासादांश्चगृहाणिच वृक्षांश्चविविधान्दद्यादन्नानि
विविधानिच सर्वंसौवर्णमेवासीद्रंतिदेवस्यधीमतः तत्रास्यगाथागायंतियेपुराणविदोजनाः रंतिदेवस्यतेदृष्ट्वा
समृद्धिमतिमानुषीं नैतादृशंदृष्टपूर्वंकुबेरसदनेष्वपि धनंचपूर्णमासाद्यकिंपुनर्मनुजेष्विति व्यक्तंवस्वोक
सारोयमित्यूचुस्तत्रविस्मिताः सांकृतेरंतिदेवस्ययांरात्रिमतिथिर्वसेत् आलभ्यंततदागावःसहस्राण्येक
विंशतिः तत्रस्मसूदाःक्रोशंतिसुमृष्टमणिकुंडलाः सूपंभूयिष्ठमश्नीध्वंनाद्यमांसंयथापुरा रंतिदेवस्य
यत्किंचित्सौवर्णमभवत्तदा तत्सर्वंविततेयज्ञेब्राह्मणेभ्योह्यमन्यत प्रत्यक्षंतस्यहव्यानिप्रतिगृह्णंतिदेवताः
कव्यानिपितरःकालेसर्वकामान्द्विजोत्तमाः सचेन्ममारसंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतमस्तुभ्य
मापुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येतिव्याहरन्॥ ॥इतिद्रोणपर्वणिषोडशराजिके नार

द उवाच दौष्यंतिं भरतं चापि मृतं संजय शुश्रुम कर्माण्यसुकराण्यन्यैः कृतवान्यः शिशुर्वने हिमावदातान्यः सिंहान्नखदं
ष्ट्रायुधान्बली निर्वीर्यांस्तरसा कृत्वा विचकर्ष बबंध च क्रूरांश्चोग्रतरान्व्याघ्रान्दमित्वा चाकरोद्वशे मनःशिलाइव शि
लाः संयुक्ता जतुराशिभिः व्यालांश्चातिबलान्सुप्रतीकान्गजानपि दंष्ट्रासु गृह्य विमुखान्शुष्कास्यानकरोद्वशे महिषा
नप्यतिबलान्बलिनो विचकर्ष ह सिंहानां च सुदृप्तानां शतान्याकर्षत बलात् बलिनः सृमरान्खड्गान्नानासत्वानि चा
प्युत कृच्छ्रप्राणान्वने बध्वा दमयित्वाप्यपासृजत् तं सर्वदमनेत्याहुर्द्विजास्तेनास्य कर्मणा तं प्रत्यषेधज्जननी मा सत्
त्वानि विजीजिहि सोऽश्वमेधशतेनेष्ट्वा यमुनामनु वीर्यवान् त्रिशतेनाश्वान्सरस्वत्यां गंगामनु चतुःशतान् सोऽश्वमेधसह
स्रेण राजसूयशतेन च पुनरीजे महायज्ञैः समाप्तवरदक्षिणैः अग्निष्टोमातिरात्राभ्यामिष्ट्वा विश्वजिता अपि वा
जपेयसहस्राणां सहस्रैश्च सुसंवृतैः इष्ट्वा शाकुंतलो राजा तर्पयित्वा द्विजान्धनैः सहस्रं यत्र पद्मानां कण्वाय भरतो
ददौ जांबूनदस्य शुद्धस्य कनकस्य महायशाः यस्य यूपः शतव्यामः परिणाहेन कांचनः समागम्य द्विजैः सार्द्धं से
द्रैर्देवैः समुच्छ्रितः अलंकृतान्राजमानान्सर्वरत्नैर्मनोहरैः हिरण्यमश्वान्द्विरदान्रथानुष्ट्रानजाविकं दासीदासं
धनं धान्यं गाः सवत्साः पयस्विनीः ग्रामान्गृहांश्च क्षेत्राणि विविधांश्च परिच्छदान् कोटीशतायुतांश्चैव ब्राह्मणे
भ्यो ह्यमन्यत चक्रवर्ती ह्यदीनात्मा जितारिस्त्वजितः परैः स चेन्ममार संजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यत
रस्तुभ्यं मा पुत्रमनुतप्यथाः अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ ॥ इति द्रोणपर्वणि षोडश
राजिके नारद उवाच पृथुं वैन्यं च राजानं मृतं संजय शुश्रुम यमभ्यषिंचन्साम्राज्ये राजसूये महर्षयः यत्नतः

प्रथितेत्वथुः सर्वानभिभवन्पृथुः [redacted] क्ष ततोत्र ह्यस्यतेसर्वानिन्येवंक्ष
त्रियोभवत् पृथुं वै राणं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन् ततो राजेतिनामास्य अनुरागादजायत अकृष्ट
पच्या पृथिवी आसीत् दैन्यस्य कामधुक् सर्वाः कुंभदोहा गावः पुटके पुटके मधु आसन् हिरण्मया दर्भाः सु
खस्पर्शाः सुखावहाः तेषां वीराणां संवीताः प्रजास्ते वै वशेरते फलान्यमृतकल्पानि स्वादूनि वमधूनि
च तेषामासीत्तदाहारो निराहारश्च नाभवन् अरोगाः सर्वसिद्धार्था मनुष्या ह्यकुतोभयाः न्यवसंत यथाका
मं वृक्षेषु च गृहासु च प्रविभागो न राष्ट्राणां पुराणां वा भवत्तदा यथासुखं यथाकामं यथैता मुदिताः प्रजाः
तस्य संस्तंभिता ह्यापः समुद्रमभियास्यतः पर्वताश्च ददुर्मार्गं ध्वजभंगश्च नाभवत् तं वनस्पतयः शैलादे
वासुरनरोरगाः सप्तर्षयः पुण्यजना गंधर्वाप्सरसोपि च पितरश्च सुखासीनमभिगम्येदमब्रुवन् सम्राडु
सि क्षत्रियोसि राजा गोप्ता पितासि नः देह्यस्मभ्यं महाराज प्रभुः सन्नीप्सितान्वरान् यैर्वयं शाश्वतीस्तृप्ती
र्वर्तयिष्यामहे सुखं तथेत्युक्त्वा पृथुर्वैण्यो गृहीत्वाजगवं धनुः शरांश्चाप्रतिमान्घोरान्चिंतयित्वाब्र
वीन्महीं एह्येहि वसुधे क्षिप्रं क्षर त्वं कांक्षितं पयः ततो दास्याभिमद्रं ते अन्नं यस्य यथोक्षितं वसुधोवाच
दुहितृत्वेन मां वीर संकल्पयितुमर्हसि तथेत्युक्त्वा पृथुः सर्वं विधानमकरोद्वशी ततो भूतनिकायास्तां वसुधां दुदु
हुस्तदा तां वनस्पतयः पूर्वं समुत्तस्थुर्दुधुक्षया सा तिष्ठत्तत्र वत्सं दोग्धृपात्राणि चेच्छती वत्सो भूत्पुष्पितः शालः

द्रो० सक्षोदोग्धाभवत्तदा छिन्नप्ररोहणंदुग्धंपात्रमौदुंबरंशुभं उदयःपर्वतोवत्सोमेरुर्दोग्धामहागिरिः रत्नान्योषधयोदुग्धं
६८ पात्रमश्ममयंतथा दोग्धाचासीत्तदादेवोदुग्धमूर्जस्करंप्रियं असुरादुदुहुर्मायामामेपात्रेतुतेतदा दोग्धाद्विमूर्धा त
त्रासीद्वत्सश्चासीद्विरोचनः कृषिंचसस्यंचनरादुदुहुःपृथिवीतले स्वायंभुवोमनुर्वत्सस्तेषांदोग्धाभवत्पृथुः अलाबु
पात्रेचतथाविषंदुग्धावसुंधरा धृतराष्ट्रोभवद्दोग्धातेषांवत्सस्तक्षकः सप्तर्षिभिः ब्रह्मदुग्धंतथाचाक्लिष्टकर्म
भिः दोग्धाबृहस्पतिःपात्रंछंदोवत्सश्चसोमराट् अंतर्द्धानेचामपात्रेदोग्धापुण्यजनैर्विराट् दोग्धावैश्रवणस्तेषां
वत्सश्चासीद्वृषध्वजः पुण्यगंधान्पद्मपात्रेगंधर्वाप्सरसोदुहन् वत्सश्चित्ररथस्तेषांदोग्धाविश्वरुचिः प्रभुः स्वधांर
जतपात्रेषुदुदुहुःपितरश्चूतां वत्सोवैवस्वतस्तेषांयमोदोग्धांतकस्तदा एवंनिकायैस्तैर्दुग्धापयोभीष्टंहिसाविराट् यै
र्वर्त्तयंतित्येषपात्रैर्वत्सैश्चनित्यशः यज्ञैश्चविविधैरिष्ट्वापृथुर्वैण्यःप्रतापवान् संतर्प्यमित्वाभूतानिसर्वकामैर्म
नःप्रियैः हैरण्यानकरोद्राजायेकेचित्पार्थिवाभुवि तांब्राह्मणेभ्यःप्रायच्छदश्वमेधेमहामखे षष्टिंनागसहस्राणि
षष्टिंनागशतानिच सौवर्णानकरोद्राजाब्राह्मणेभ्यश्चतान्ददौ इमांचपृथिवींसर्वांमणिरत्नविभूषितां सौवर्णाम
करोद्राजाब्राह्मणेभ्यश्चतांददौ सचेन्ममारसंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यंमापुत्रमनुतप्यथाः
अयज्वानमदाक्षिण्यमभिश्वैत्येत्युदाहरन् महाभारतेद्रोणपर्वणिषोडशराजिके॥ ॥नारदउवाच
रामोमहातपाःशूरोवीरलोकनमस्कृतः जामदग्न्योप्यतियशाअवितृप्तोमरिष्यति यस्मामनुप
र्येतिभूमिंकुर्वंतिमांपुरा नचासीद्विक्रियायस्यप्राप्यश्रियमनुत्तमां यःक्षत्रियैःपरामृष्टेवत्से ःः श्रीराम०
६८

पितरश्चाब्रुवन् ततोवधीत्कार्त्तवीर्यमजितंसमरेपरैः क्षत्रियाणांचतुःषष्टिमयुतानिसहस्रशः तदामृत्योःसमेतानिए
कैकंधनुषाजयन् ब्रह्मद्विषांवाधतस्मिन्सहस्राणिचतुर्दश पुनरन्यान्निजग्राह दंतक्रूरंजघानह सहस्रंमुशले
नाघ्नन्सहस्रमसिनावधीत उद्बंधनात्सहस्रंचहैहयाःसमरेहताः सरथाश्वगजावीरानिहतास्तत्रशेरते पितृवधा
मर्षितेनजामदग्न्येनधीमता निजघ्नेदशसाहस्रान्रामःपरशुनातदा नह्यमृष्यततावाचोयास्तैर्भृशमुदीरिताः
भृगोरामाभिधावेतियदाक्रंदन्द्विजोत्तमाः ततःकाश्मीरदरदान्कुंतिक्षुद्रकमालवान् अंगवंगकलिंगांश्चवि
देहांस्ताम्रलिप्तकान् रक्षोवाहान्वीतिहोत्रान्त्रिगर्त्तान्मार्तिकावतान् शिवीनन्यांश्चराजन्यान्देशाद्देशात्सहस्रशः
निजघानशितैर्बाणैर्जामदग्न्यःप्रतापवान् कोटिशतसहस्राणिक्षत्रियाणांसहस्रशः इंद्रगोपकवर्णस्यबंधुजी
वनिभस्यच रुधिरस्यपरीवाहैःपूरयित्वासरांसिच सर्वानष्टादशद्वीपान्वशमानीयभार्गवः ईजेक्रतुशतैः
पुण्यैःसमाप्तवरदक्षिणैः वेदीमष्टनलोत्सेधांसौवर्णांविधिनिर्मितां सर्वरत्नशतैःपूर्णांपताकाशतमालि
नीं ग्राम्यारण्यैःपशुगणैःसंपूर्णांचमहीमिमां ततःशतसहस्राणिद्विपेंद्रान्हेमभूषणान् रामस्यजाम
दग्न्यस्यप्रतिजग्राहकाश्यपः निर्दस्युंपृथिवींकृत्वाशिष्टेष्टजनसंकुलां काश्यपायददौरामोहयमेधमहामखे
त्रिःसप्तवारान्पृथिवींकृत्वानिःक्षत्रियांपुरा इष्ट्वाक्रतुशतैर्वीरोब्राह्मणेभ्योह्यमन्यत सप्तद्वीपांवसुमतींमारीचो
गृह्यतद्द्विजः रामंप्रोवाचनिर्गच्छवसुधातोममाज्ञया सकाश्यपस्यवचनात्प्रोत्सार्यसरितांपतिं इषुपातेयु
धांश्रेष्ठःकुर्वन्ब्राह्मणशासनं अध्यावसद्गिरिश्रेष्ठंमहेंद्रंपर्वतोत्तमं एवंगुणशतैर्युक्तोभृगूणांकीर्त्तिवर्द्धनः

द्रो० नः जामदग्न्योद्यतिपुण्यामरिष्यतिमहाद्युतिः त्वयाचतुर्भद्रतरः पुत्रात्पुण्यतरस्तव अयज्वानमदाक्षिण्यं मापुत्र
६७ मनुतप्यथाः एतेचतुर्भद्रतरास्त्वयाभद्रशताधिकाः मृतानरवरश्रेष्ठमरिष्यंतिचसंजय॥ ॥इतिद्रोणपर्वणिषो
डशराजिके व्यासउवाच पुण्यमाख्यानमायुष्यं श्रुत्वाषोडशराजिकं अव्याहृन्नरपतिः तूष्णीमासीत्स
संजयः तमब्रवीत्तथासीनंनारदोभगवानृषिः श्रुतंकीर्तयतोमह्यंगृहीतंतेमहाद्युते अहोस्विदंततोमष्टंश्राद्धं
मिति५ शूद्रापतौ सएवमुक्तः प्रत्याहप्रांजलिःसंजयस्तदा एतच्छ्रुत्वामहोधन्यमाख्यानमुत्तमं राजर्षीणांपुराणानां
यज्वनांदक्षिणावतां विस्मयेनहृतेशोकेतमसाचार्कतेजसा विपाप्मास्म्यव्यथोपेतोब्रूहिकिंकरवाण्यहं ना
रदउवाच दिष्ट्यापहृतशोकस्त्वंवृणीष्वेहयदिच्छसि तत्तत्प्रपत्स्यसेसर्वंनमृषावादिनोवयं संजयउवाच ए
तेनैवप्रीतोहंप्रसन्नोयद्भवान्मम प्रसन्नोयस्यभगवान्नतस्यास्तीहदुर्लभं नारदउवाच पुनर्ददानितेपुत्रंद
स्युभिर्निहतंवृथा उद्धृत्यनरकात्कष्टात्पशुवत्प्रोक्षितंयथा व्यासउवाच प्रादुरासीत्ततःपुत्रःसंजयस्याद्भुतप्र
भः प्रसन्नेनर्षिणादत्तःकुबेरतनयोपमः ततःसंगम्यपुत्रेणप्रीतिमानभवन्नृपः ईजेचक्रतुभिःपुण्यैः
समाप्तवरदक्षिणैः अकृतार्थश्चभीतश्चनचसान्नाहिकोहतः अयज्वाचानपत्यश्चततोसौजीवितः
पुनः शूरोवीरःकृतार्थश्चप्रताप्यरीन्सहस्रशः अभिमन्युर्गतोवीरःपृतनाभिमुखोहतः ब्रह्मचर्येणयां
कांचित्प्रज्ञयाचश्रुतेनच इष्टैश्चक्रतुभिर्यांतितांस्तेपुत्रोक्षयांगताः विद्वांसःकर्मभिःपुण्यैःस्वर्गमीह
तेनित्यशः नतुस्वर्गादयंलोकःकाम्यतेस्वर्गवासिभिः तस्मात्स्वर्गगतंपुत्रमर्जुनस्यहतंरणे नचेह श्रीराम०
६७

नपितृंशोक्यंकिंविद्वान्प्राप्यमोहितं यांयोगिनोध्यानविविक्तदर्शनाःप्रयांतियांचोत्तमयज्विनोजनाः तपोभिरिद्धै
रनुयांतियांतथातामक्षयांतेतनयोगतोगतिं अंतात्पुनर्भावगतोविराजतेराजेववीरोह्यमृतात्मरश्मिभिः
तामैंदवींमात्मतनुंद्विजोत्तमांगतोभिमन्युर्नसशोकमर्हति एवंज्ञात्वास्थिरोभूत्वाजह्यरीन्धैर्यमाप्नुहि जी
वंतएवनःशोच्यानतुस्वर्गगतानघ शोचतोहिमहाराज दुःखमेवाभिवर्द्धते तस्माच्छोकंपरित्यज्यश्रेयसेप्र
यतेद्बुधः प्रहर्षमभिमानंचसुखप्राप्तिंचचिंतयेत् एतद्बुध्वाबुधाःशोकंनशोकःशोकउच्यते एवंविद्वन्समुत्ति
ष्ठप्रयतोभवमाशुचः श्रुतस्तेसंभवोमृत्योस्तपांस्यनुपमानिच सर्वभूतसमत्वंचचंचलाश्चविभूतयः संज
यस्यतुतंपुत्रंमृतंसंजीवितंपुनः एवंविद्वन्महाराजमाशुचःसाधयाम्यहं एतावदुक्त्वाभगवांस्तत्रैवांतरधी
यत वागीशानेभगवतिव्यासेभ्रनभःप्रभे गतेगतिमतांश्रेष्ठेसमाश्वास्ययुधिष्ठिरं पूर्वेषांपार्थिवेंद्राणां
महेंद्रप्रतिमौजसां न्यायाधिगतवित्तानांतांश्रुत्वायज्ञसंपदं संपूज्यमनसाविद्वान्विशोकोभूद्युधिष्ठिरः पुनश्चा
चिंतयद्दीनःकिंस्विद्वक्ष्येधनंजयं इतिद्रोणपर्वणिषोडशराजकीयंसमाप्तं॥ ॥संजयउवाच तस्मिन्नहनिनिर्वृत्ते
घोरेप्राणभृतांक्षये आदित्येस्तंगतेश्रीमान्संध्याकालउपस्थिते व्यपयातेषुवासायसर्वेषुभरतर्षभ हत्वासंसप्तक
व्रातान्दिव्यैरस्त्रैःकपिध्वजः प्रायात्स्वशिबिरंजिष्णुर्जैत्रमास्थायतंरथं गच्छन्नेवचगोविंदंसाश्रुकंठोभ्यभाषत किं
नुमेहृदयंत्रस्तंवाक्चसज्जतिकेशव स्पंदंतिचाप्यनिष्टानिगात्रंसीदतिचाच्युत अनिष्टंचैवमेश्लिष्टंहृदयान्नापसर्प

द्रो० ति मुहुर्विपदि शुश्रुवान्पुत्रानुत्पातास्त्रासयंतिमां बहुप्रकारा दृश्यंते सर्वएवाघशंसिनः अपिस्वस्ति भवेद्राज्ञः सामात्य
७० स्य गुरोर्मम वासुदेवउवाच व्यक्तं शिवंतवभ्रातुः सामात्यस्य भविष्यति माशुचः किंचिदेवान्यत् तत्रानिष्टं भवि
ष्यति संजयउवाच ततः संध्यामुपास्यैव वीरौ वीरावसादने कथयंतौ रणे वृत्तं प्रयातौ रथमास्थितौ ततः स्व
शिविरं प्राप्तौ हतानंदं हतत्विषं वासुदेवोर्जुनश्चैव कृत्वा कर्म्म सुदुष्करं ध्वस्ताकारं समालक्ष्य शिविरं पर
वीरहा बीभत्सुरब्रवीत्कृष्णमस्वस्थहृदयस्ततः नंदंति नाद्य तूर्याणि मंगलानि जनार्दन मिश्रा दुंदुभिनि
र्घोषैः शंखाश्चाडंबरैः सह वीणा नैवाद्य वाद्यंते शम्यातालस्वनैः सह मंगल्यानि च गीतानि न गायंति पठंति च स्तु
तियुक्तानि रम्याणि ममानीकेषु वंदिनः योधाश्चापि हि मां दृष्ट्वा निवर्तंते ह्यधोमुखाः कर्माणि च यथापूर्वं कृत्वा
नाभिवदंति मां अपिस्वस्ति भवेदद्य भ्रातृभ्यो मम माधव नहि शुध्यति मे भावो दृष्ट्वा स्वजनमाकुलं अपि पांचा
लराजस्य विराटस्य च मानद सर्वेषां चैव योधानां सामग्र्यं स्यान्ममाच्युत न च मामद्य सौभद्रः प्रहृष्टो भ्रातृभिः सह
रणादायांतमुचितं प्रत्युद्याति हसन्निव एवं संकथयंतौ तौ प्रविष्टौ शिविरं स्वकं ददृशाते भृशास्वस्थान्पांडवान्नष्टचे
तसः दृष्ट्वा भ्रातॄंश्च पुत्रांश्च विमना वानरध्वजः अपश्यंश्चैव सौभद्रमिदं वचनमब्रवीत् मुखवर्णोप्रसन्नो वः सर्वेषा
मेव लक्ष्यते न चाभिमन्युं पश्यामि न च मां प्रतिनंदथ मया श्रुतश्च द्रोणेन चक्रव्यूहो विनिर्मितः न च वस्तस्य भे
त्तास्ति विना सौभद्रमर्भकं न चोपदिष्टस्तस्यासीन्मयानीकाद्धि निर्गमः कच्चिन्न बालो युष्माभिः परानीकं प्रवे
शितः भित्त्वानीकं महेष्वासः परेषां बहुशो युधि कच्चिन्न निहतः संख्ये सौभद्रः परवीरहा लोहिताक्षं महाबाहुं जा श्रीराम०
७०

तं सिंहमिवाद्रिषु उपेंद्रसदृशं ब्रूत कथमायोधने हतः सुकुमारं महेष्वासं वासवस्यात्मजात्मजं सदा मम प्रियं ब्रूत
कथमायोधने हतः सुभद्रायाः प्रियं पुत्रं द्रौपद्याः केशवस्य च॥ अंबायाश्च प्रियं नित्यं कोऽवधीत्कालमोहितः
सदृशो वृष्णिवीरस्य केशवस्य महात्मनः विक्रमश्रुतमाहात्म्यैः कथमायोधने हतः वार्ष्णेयादयितं शूरं
मया सततलालितं यदि पुत्रं न पश्यामि यास्यामि यमसादनं मृदुकुंचितकेशांतं बालमृगेक्षणं मत्तद्वि
रदविक्रांतं शालपोतमिवोन्नतं स्मिताभिभाषिणं दांतं गुरुवाक्यकरं सदा बाल्येप्यतुलकर्माणं प्रियवाक्य
ममत्सरं महोत्साहं महाबाहुं दीर्घराजीवलोचनं भक्तानुकंपिनं दांतं न च नीचानुसारिणं कृतज्ञं ज्ञान
संपन्नं कृतास्त्रमनिवर्तिनं युद्धाभिनंदिनं नित्यं द्विषतां भयवर्द्धनं स्वेषां प्रियहिते युक्तं पितॄणां जयगृ
द्धिनं न च पूर्वप्रहर्तारं संग्रामे नष्टसंभ्रमं यदि पुत्रं न पश्यामि यास्यामि यमसादनं रथेषु गण्यमाने
षु गण्यते तं महारथं मया ध्यर्द्धगुणं संख्ये तरुणं बाहुशालिनं प्रद्युम्नस्य प्रियं नित्यं केशवस्य ममैव च
यदि पुत्रं न पश्यामि यास्यामि यमसादनं सुनसं सुललाटांतं स्वक्षिभ्रूदशनच्छदं अपश्यंत्यास्तद्वदनं का
शांतिर्हृदयस्य च तंत्रीस्वनसुखं रम्यं पुंस्कोकिलसमध्वनिं अशृण्वत्यास्तस्य स्वनं का शांतिर्हृदयस्य मे रू
पं चाप्रतिमं तस्य त्रिदशेष्वपि दुर्लभं अपश्यंत्या हि वीरस्य का शांतिर्हृदयस्य मे अभिवादनदक्षं तं पितॄ
णां वचने रतं नाद्याहं यदि पश्यामि का शांतिर्हृदयस्य मे सुकुमारः सदा वीरो महार्हशयनोचितः भूमावना
थवच्छेते नूनं नाथवतां वरः शयानं समुपासंति यं पुरा परमस्त्रियः तमद्य विप्रविद्धांगमुपासंत्यशिवाः शिवाः

द्रो०
७१ यः पुरा बोध्यते सुप्तः सूतमागधवंदिभिः बोधयंत्यद्य तं नूनं श्वापदा विकृतैः स्वनैः छत्रच्छायासमुचितं तस्य तद्व
दनं शुभं नूनमद्य रजोध्वस्तं रणरेणुः करिष्यति हा पुत्रकावितृप्तस्य सततं पुत्रदर्शने भाग्यहीनस्य कालेन यथा
मे नीयसे बलात् सा च संयमनी नूनं सदा सुकृतिनां गतिः स्वभाभिर्मोदिता रम्या त्वयात्यर्थं विराजते नूनं वैव
स्वतश्च त्वां वरुणश्च प्रियातिथिः शतक्रतुर्धनेशश्च प्राप्तमर्चत्यभीरुकं एवं विलप्य बहुधा भिन्नपोतो वणि
ग्यथा दुःखेन महताविष्टो युधिष्ठिरमपृच्छत कच्चित्स कदनं कृत्वा परेषां कुलनंदन स्वर्गतोभिमुखः संख्ये यु
ध्यमानो नरर्षभः स नूनं बहुभिर्यत्तैर्युध्यमानो नरर्षभैः असहायः सहायार्थी मामनुध्यातवान् ध्रुवं पीड्य
मानः शरैस्तीक्ष्णैः कर्णद्रोणकृपादिभिः नानालिंगैः सुधौताग्रैर्मम पुत्रोल्पचेतनः इह मे स्यात्परित्राणं
पितेति स पुनः पुनः इत्येवं विलपन्मन्ये नृशंसैर्भुवि पातितः अथवा मत्प्रसूतः स स्वस्त्रीयो माधवस्य च सु
भद्रायां च संभूतो नैवं वक्तुमर्हति वज्रसारमयं नूनं हृदयं सुदृढं मम अपश्यतो दीर्घबाहुं रक्ताक्षं यन्न दीर्यते
कथं बाले महेष्वासा नृशंसा मर्मभेदिनः स्वस्त्रीयं वासुदेवस्य मम पुत्रं क्षिपञ्छरान् यो मां नित्यमदीनात्मा
प्रत्युद्गम्याभिनंदति उपयातं रिपून् हत्वा सोद्य मां किं न पश्यति नूनं स पतितः शेते धरण्यां रुधिरोक्षितः शो
भयन्मेदिनीं गात्रैरादित्य इव पातितः सुभद्रामनुशोचामि या पुत्रमपलायिनं रणे विनिहतं श्रुत्वा शोकार्ता वै वि
नंक्ष्यति सुभद्रा वक्ष्यते किं मामभिमन्युमपश्यती द्रौपदी चैव दुःखार्ते ते च वक्ष्यामि किं त्वहं वज्रसारमयं नूनं हृदयं यन्न या
स्यति सहस्रधा वधूं दृष्ट्वा रुदतीं शोककर्षितां दृप्तानां धार्तराष्ट्राणां सिंहनादो मया श्रुतः युयुत्सुश्चापि कृष्णेन श्रावितो
वीरानुपालभन् अशक्नुवंतो बीभत्सुं बालं हत्वा महारथाः किं मोदध्वमधर्मज्ञाः पांडवं दृश्यतां बलं किं तयोर्विप्रियं कृत्वा के श्रीरामः
शवार्जुनयो ७१

म्रेघ सिंह्वचन्नस्तप्रीताः शोककाल उपस्थिते आगमिष्यति वः किंस्वित्फलं पापस्य कर्म्मणः अधर्म्मो हि कृतस्तीव्रः कथं स्यादफल
श्चिरं इति तान्परिभाषन्वै वैश्यापुत्रो महामतिः अपायात्फलमुत्सृज्य कौरवः स्वसमन्वितः किमर्थमेतत्व्याख्यातं तथाकृत्स्नं रणाम
म अवध्यं तान् हृत्कृरांस्तदा सर्वान्महारथान संजय उवाच पुत्रशोकार्दितं पार्थं ध्यायंतं साश्रुलोचनं निगृह्य वासुदेवस्तं पुत्राधिभि
रभिप्लुतं मैवमित्यब्रवीत्कृष्णस्तीव्रशोकसमन्वितं मैवं पार्थ मम वंतुं या शूराणामनिवर्त्तिनां क्षत्रियाणां विशेषेण पर्यायो युद्धजी
विका एषां वि युध्यमानानां शूराणामनिवर्त्तिनां विहिता सर्वशास्त्रज्ञैर्गतिर्गतिमतांवर ध्रुवं हि युद्धमरणं शूराणामनिवर्त्तिनां गतः कृतां त:पुरप १
लोकानभिमन्युर्न संशयः एतच्च सर्वे वीराणां कांक्षितं भरतर्षभ संग्रामेभिमुखो मृत्युं प्राप्नुयामिति मानद सच वीरान्रणे हत्वा राजपुत्रा
न्महाबलान वीरैराकांक्षितं मृत्युं संप्राप्तोभिमुखं रणे मा शुचः पुरुषव्याघ्र पूर्वैरेष सनातनः धर्म्मकृद्भिः कृतो धर्म्मः क्षत्रियाणां
रणे क्षयः इमे ते भ्रातरः सर्वे दीना भरतसत्तम त्वयि शोकसमाविष्टे पार्थ सुहृदस्तथा एतांश्च वचसा साम्ना समाश्वासय मानद
विदितं वेदितव्यं ते न शोकं कर्त्तुमर्हसि एवमाश्वासितः पार्थः कृष्णेनाद्भुतकर्म्मणा ततोब्रवीत्तदा भ्रातॄन्सर्वान्पार्थः सगद्गदान
स दीर्घबाहुः पृथ्वंसो दीर्घराजीवलोचनः अभिमन्युर्यथा वृत्तः श्रोतुमिच्छाम्यहं तथा सनागस्यंदनहयान्द्रक्ष्यध्वं निहतान्मया सं
ग्रामे सानुबंधांस्तान्मम पुत्रस्य वैरिणः कथं वः कृतास्त्राणां सर्वेषां शस्त्रपाणिनां सौभद्रो निधनं गच्छेद्वज्रिणापि समागतः य
द्येवमहमज्ञास्यमशक्तान्रक्षणे मम पुत्रस्य पांडुपांचालान्मया गुप्तो भवेत्ततः कथं च वो रथस्थानां शरवर्षाणि मुंचतां नीतोभिमन्युर्नि
धनं कदर्थीकृत्य वः परैः अहो वः पौरुषं नास्ति न च वोस्ति पराक्रमः यत्राभिमन्युः समरे पश्यतां वो निपातितः आत्मानमेव गर्हेयं य

द्रो॰
७७

रहंवैवस्वतंवलान युष्मानात्रायनिर्यातोभीरुवत्कातनिश्चयात् अहोस्विद्युधगार्थीयवर्म्मशस्त्राण्यधानिच वाचस्त्ववक्तुंसंमस्त्वमम
पुत्रमरक्षतां एवमुक्त्वाततोवाक्यमीतिपार्थोयगाण्डीववान् नस्माच्छाक्यतवीभत्सुः केनचित्समभीक्षितुं तमेतत्कमिवक्रुद्धंनिश्वसंतंमुहुर्मु
हुः पुत्रशोकाभिसंतप्तमश्रुपूर्णमुखंतदा नभाषितुंशक्नुवंतिद्रष्टुंवासुहृदोर्ज्जुनं अन्यत्रवासुदेवाद्वाज्येष्ठाद्वापांडुनंदनात् स
र्वास्ववस्थासुहिताव्रर्जुनस्यमनोनुगौ बहुमानात्प्रियत्वाच्चतावेनंवक्तुमर्हतः ततस्तंपुत्रशोकेनभृशंपीडितमानसं राजीवलोचनंक्रु
द्धंराजावचनमब्रवीत् इतिद्रोणपर्वणि युधिष्ठिरउवाच त्वयियातेमहाबाहोसंशप्तकबलंप्रति प्रयत्नमकरोत्तीव्रमाचार्योग्रहणे
मम व्यूढानीकाः सर्वेद्रोणंवारयामः स्मसर्वशः प्रतिव्यूह्यरथानीकंयतमानंतथारणे सवार्यमाणोरथिभिर्मयिचापिसुरक्षि
ते अस्माननभिजघानाशुपीडयन्निशितैःशरैः तेपीड्यमानाद्रोणेनद्रोणानीकंनशक्नुमः प्रतिवीक्षितुमप्याजौभेत्तुंतत्कुतएववै
वयंत्वप्रतिमंवीर्येसर्वेसौभद्रमात्मजं उक्तवंतःस्मतंतातभिंध्यनीकमितिप्रभो सतथाचोदितोस्माभिःसदश्वइववीर्यवान् असह्य
मपितंभारंवोढुमेवोपचक्रमे सतवास्त्रोपदेशेनवीर्येणचसमन्वितः प्राविशत्तद्बलंबालःसुपर्णइवसागरं तेनुयातावयंवीरंसा २४
त्वतीपुत्रमाहवे प्रवेष्टुकामास्तेनैवयेनसप्राविशच्चमूं ततःसैंधवकोराजाक्षुद्रस्तातजयद्रथः अवारयन्नःसर्वान्वैसमवारयततो
द्रोणःकृपःकर्णोद्रौणिःकौशल्यएवच कृतवर्म्माचसौभद्रंषड्रथाःपर्यवारयन् परिवार्यतुतैःसर्वैर्युधिबालोमहारथैः यतमानः
परंशक्त्याबहुभिर्विरथीकृतः ततोदौःशासनिःक्षिप्रंतथातैर्विरथीकृतं संशयंपरमंप्राप्यदिष्टांतेनाभ्ययोजयत् सतुहत्वासहस्रा
णिनराश्वरथदंतिनां अष्टौरथसहस्राणिनवदंतिशतानिच ^एतावद्ववनिहंत्वासमस्माकंशोकवर्द्धनं सचैवपुरुषव्याघ्रःस्वर्गलोकम एम०
राजपुत्रसहस्रेद्वेवीरांश्चालक्षितान्बहून् बृहद्बलंचराजानंस्वर्गेणाजौप्रयोजयत् ततःपरमधर्मात्माक्षितान्मुपजग्मिवान् १५ ७२

वाग्मवान् ततोर्जुनोवचः श्रुत्वा धर्मराजेन भाषितं हा पुत्र इति निःश्वस्य व्यथितोभ्यपतद्भुवि विषण्णवदनाः सर्वे परिवार्य धनंजयं नेत्रैरनिमि
षैर्दीनाः प्रत्यवैक्षन्परस्परं प्रतिलभ्य ततः संज्ञां वासविः क्रोधमूर्छितः कंपमानो ज्वरेणेव निश्वसंश्च मुहुर्मुहुः पाणिं पाणौ विनिष्पिष्य
श्वसमानोश्रुनेत्रवान् उन्मत्त इव विप्रेक्षन्निदं वचनमब्रवीत् अर्जुन उवाच सत्यं वः प्रतिजानामि श्वोस्मि हंता जयद्रथं धार्तराष्ट्रभयात्कांम
पि विसृजेत्सोऽत्र हरं पापं बालवधे हतं श्वोस्मि हंता जयद्रथं रक्षमाणाश्च तं संख्ये ये मां योत्स्यंति केचन अपि द्रोणकृपौ राजन् छादयि
ष्यामि तान् शरैः यद्येतदेवं संग्रामे न कुर्यां पुरुषर्षभाः मा स्म पुण्यकृतां लोकान्प्राप्नुयां शूरसंमतान् ये लोका मातृहंतॄणां ये चापि पितृ
घातिनां गुरुदारगतानां ये पिशुनानां च ये सदा साधूनसूयतां ये च ये चापि परिवादिनां ये च निक्षेपहर्तॄणां ये च विश्वासघातिनां भुक्त
पूर्वां स्त्रियं ये च निंदतामघशंसिनां ब्रह्मघ्नानां च ये लोका ये च गोघातिनामपि पायसं वा यवान्नं वा शाकं कृसरमेव वा संयावापूप
मांसानि ये च लोका वृथाश्नतां तानह्नैवाधिगच्छेयं न चेद्धन्यां जयद्रथं वेदाध्यायिनमत्यर्थं संशितं वा द्विजोत्तमं अवमन्यमानो या
न्याति वृद्धान्साधूंस्तथा गुरून् स्पृशतां ब्राह्मणं गां च पादेनाग्निं च यां भवेत् याप्सु श्लेष्म पुरीषं वा मूत्रं वा मुंचतां गतिः तां गच्छेयं गतिं
६४ कष्टां न चेद्धन्यां जयद्रथं नग्नस्य स्नायमानस्य या च वंध्यातिथेर्गतिः उत्कोचिनां मृषोक्तीनां वंचकानां च या गतिः आत्मापहारिणां या
पार्व १ च मिथ्याभिशंसिनां भृत्यैः संदृश्यमानानां पुत्रदाराश्रितैस्तथा असंविभज्य क्षुद्राणां या गतिर्मिष्टमश्नतां तां गच्छेयं गतिं घोरां न चे
द्धन्यां जयद्रथं संश्रितं चापि यस्त्यक्त्वा साधुं तद्वचने रतं न बिभर्ति नृशंसात्मा निंदते चोपकारिणं अर्हते प्रातिवेश्याय श्राद्धं यो न
ददाति यः अनर्हेभ्यश्च यो दद्याद्वृषलीपत्यये तथा मद्यपो भिन्नमर्यादः कृतघ्नो भर्तृनिंदकः तेषां गतिमियां क्षिप्रं न चेद्धन्यां जयद्रथं ५
१५ धर्माद्पेता ये चान्ये मया नात्रानुकीर्तिताः ये चानुकीर्तितास्तेषां गतिं क्षिप्रमवाप्नुयां यदि व्युष्टामिमां रात्रिं श्वो न हन्यां जयद्रथं इमां चाप्य

२

४२

द्रो०

७३

द्रुमं वाणपरंभूयः प्रतितोमेनिबोधत यथास्विन्नहतेपापस्येमत्तमपयास्यति इहैवसंप्रेक्षेष्ठा हंतलितेजातेवदसं असुरासुरमनुष्याः
पक्षिणोथोरगावापितस्तनिवकावाब्रह्मरेदेवर्षयो तदपिश्रशतेरहंप्रभातेसरुशमभिपतस्यिणोः शिरोभिहत्वा एवमुक्त्वाविविक्षुपुगं
रिवंसव्यदक्षिणां तस्मशदृमतिक्रम्यधनुशहोयस्थशदिवं अर्जुनेनप्रतिज्ञातेपांचजन्यंजनार्दनः प्रदध्मौतत्रसंक्रुद्धोदेवदत्तंचफाल्गु
नः सपांचजन्योच्युतवक्त्रवायुनाभृशं सपूरितोदस्वनिः सतोध्वनिः जगत्सपातालवियद्दिगीश्वरंप्रकंपयामासयुगात्ययेयथा ततोवा
दित्रसहस्राप्रादुरासन्सहस्रशः सिंहनादश्चपांडूनांप्रतिज्ञातेमहात्मना ॥ ॥ इतिश्रीमहाभारतेद्रोणपर्वणिअभिमन्युवधः स
माप्तः संजयउवाच कृत्वात्मजेमहा शब्दे पांडूनांजयगृद्धिनां योधैः सर्वविंततत्रसमुत्थायजहद्रथः शोकसंमूढहृदयोदुःखेनाभिपरि
प्लुतः मज्जमानइवागाधेविपुलेशोकसागरे जगामसमितिराज्ञांसैंधवोविमशश्चरः सतेषांनरदेवानांसकाशेपरिदेवयन् अ
भिमन्योःपितुर्भीतः सव्रीडोवाक्यमब्रवीत् योसौपांडोः किलक्षेत्रेजातः शक्रेणकामिना सनिनीषतिदुर्बुद्धिर्मांकिलैकंयम
क्षयं तत्स्वस्तिवोस्तुयास्यामिस्वगृहं जीवितेप्सया अथवास्थप्रतिबलास्त्रातुंमांक्षत्रियर्षभाः पार्थेनप्रार्थितंवीरास्तेसंदत्त्वममा
भयं द्रोणदुर्योधनकृपाः कर्णमद्रेशबाल्हिकाः दुःशासनादयः शक्तास्त्रातुंमामंतकादिते किमंगपुनरेकेनफाल्गुनेनजि
घांसता त्रातुमर्हंतुभवंतोमांसमस्ताः पतयःक्षितेः प्रहर्षंपांडवेयानांश्रुत्वामममहद्भयं सीदंतिममगात्राणिमुमूर्षोरिवपार्थिवाः
वधोनूनंप्रतिज्ञातोममगांडीवधन्वना तथाहिहृष्टाः क्रोशंतिशोककालेस्मपांडवाः नदेवाननगंधर्वानासुरोरगराक्षसाः उत्सहं
तेन्यथाकर्तुंकुतस्त्वनराधिपाः तस्मान्मामनुजानीतभद्रंवोस्तुनरर्षभाः अदर्शनंगमिष्यामिनमांद्रक्ष्यंतिपांडवाः एवंविलपमा एम०

७३

नत्वंभयाद्व्याकुलचेतसं आत्मकार्यगरीयस्त्वाद्राजादुर्योधनोब्रवीत् नभेतव्यंनरव्याघ्रकोहित्वांपुरुषर्षभ मध्येक्षत्रियवीराणांतिष्ठं
तंप्रार्थयेद्युधि अहंवैकर्तनःकर्णश्चित्रसेनोविविंशतिः भूरिश्रवाःशलःशल्योवृषसेनोदुरासदः पुरुमित्रोजयोभोजःकांबोज
श्चसुदक्षिणः सत्यव्रतोमहाबाहुर्विकर्णोदुर्मुखस्तथा दुःशासनःसुबाहुश्चकलिंगश्चाप्युदायुधः विंदानुविंदावावंत्यौद्रोणोद्रौ
णिःससौबलः एतेचान्येचबहवोनानाजनपदेश्वराः ससैन्यास्त्वाभियास्यंतिव्येतुतेमानसोज्वरः त्वंचापिरथिनांश्रेष्ठः स्वयंशूरो
मितद्युतिः सकथंपांडवेयेभ्योभयंपश्यसिसैंधव अक्षौहिण्योदशैकाचमदीयास्तवरक्षणे यत्तायोत्स्यंतिमाभैस्त्वंसैंधवव्येतु
तेभयं संजयउवाच एवमाश्वासितोराजन्पुत्रेणतवसैंधवः दुर्योधनेनसहितोद्रोणंरात्रावुपागमत् उपसंग्रहणंकृत्वाद्रोणा
यसविशांपते उपोपविश्यप्रणतः पर्यपृच्छदिदंतदा निमित्तेदूरपातित्वेलघुत्वेदृढवेधने ममब्रवीतुभगवान्विशेषंफाल्गुनस्य
च विद्याविशेषमिच्छामिज्ञातुमाचार्यतत्वतः अर्जुनस्यात्मनश्चैवयाथातथ्यंप्रचक्ष्वमे द्रोणउवाच सममाचार्यकंतातत्वचै
वार्जुनस्यच योगाद्दुःखोषितत्वाच्चतस्मात्त्वत्तोधिकोर्जुनः नतुतेयुधिसंत्रासः कार्यःपार्थात्कथंचन अहंहिरक्षितातातभयात्त्वां
नात्रसंशयः नहिमद्बाहुगुप्तस्यप्रभवंत्यमराअपि व्यूहयिष्यामितंव्यूहंयंपार्थोनतरिष्यति तस्माद्युध्यस्वमाभैस्त्वंस्वधर्ममनुपालयपि
तृपैतामहंमार्गमनुयाहिमहारथ अधीत्यविधिवद्वेदानग्नयःसुहुतास्त्वया इष्टंचबहुभिर्यज्ञैर्नतेमृत्युभयंकरः दुर्लभंमानुषैर्मंदै
र्महाभाग्यमवाप्यतु भुजवीर्यार्जितांल्लोकान्दिव्यान्प्राप्स्यस्यनुत्तमान् कुरवःपांडवाश्चैववृष्णयोन्येचमानवाः अहंचसहपुत्रेणाध्रु
वाइतिचिंत्यतां पर्यायेणवयंसर्वेकालेनबलिनाहताः परलोकंगमिष्यामःस्वैःस्वैःकर्मभिरन्विताः तपस्तप्त्वातुयांल्लोकान

४६ त्रस्ता धार्तराष्ट्राः ससैंधवाः नाकस्मात्सिंहनादोयमिति मत्वा व्यवस्थिताः सुमहान्शब्दसंपातः कौरवाणां महाभुज आसीत्

प्राप्नुवंति तत्पार्थिव क्षत्रधर्माश्रिता वीराः क्षत्रियाः प्राप्नुवंति तान् एवमाश्वासितो राजा भारद्वाजेन सैंधवः अपानुदद्भयं पार्थ युद्धाय च मनो
दधे ततः प्रहृष्टः सैन्यानां तव चाप्यासीद्विशांपते वादित्राणां ध्वनिश्चोग्रः सिंहनादरवैः सह॥ ॥ इति द्रोणपर्वणि प्रतिज्ञापर्वणि जयद्रथवधे संजय उवा
च प्रतिज्ञाते तु पार्थेन सिंधुराजवधे तदा वासुदेवो महाबाहुर्धनंजयमभाषत भ्रातॄणां मतमाज्ञाय त्वया वाचा प्रतिश्रुतं सैंधवं चास्मि हंतेति
तत्साहसमिदं कृतं असंमंत्र्य मया सार्धमतिभारोयमुद्यतः कथं तु सर्वलोकस्य नावहास्याम वेमहि धार्तराष्ट्रस्य शिबिरे मया प्रणिहिता
श्चराः त इमे शीघ्रमागम्य प्रवृत्तिं वेदयंति नः त्वया वै प्रतिसंज्ञाते सिंधुराजवधे प्रभो सिंहनादः सवादित्रैः सुमहानिह तैः श्रुतः तेन शब्देन वि
नागाश्वपत्तिनारथ्या घोषश्चैव भैरवः अभिमन्योर्वधं श्रुत्वा ध्रुवमार्तो धनंजयः रोषान्निर्यास्यति क्रोधादिति मत्वा व्यवस्थिताः तेयतंतो हि रो
षं सत्याश्रुता मम सुव्रत स्तव प्रतिज्ञा सिंधुराजस्य वधे राजीवलोचन ततो विमनसः सर्वे त्रस्ताः क्षुद्रमृगा इव आसन्सुयोधनामात्याः सैंधव
राजश्च दुःखितः अथोत्थाय सहामात्यैः सैंधवः शिबिरमात्मनः आयात्सौवीरसिंधूनामीश्वरो भृशदुःखितः समंत्रकाले संमंत्र्य सर्वा नैश्रे
यसीं क्रियां सुयोधनमिदं वाक्यमब्रवीद्राजसंसदि मामसौ पुत्रहंतेति अभियाता धनंजयः प्रतिज्ञातो हि सेनाया मध्ये तेन वधो मम तां न
देवगंधर्वनागासुरोरगाः राक्षसाः उत्सहंते न्यथाकर्तुं प्रतिज्ञां सव्यसाचिनः ते मां रक्षत संग्रामे मा वो मूर्ध्नि धनंजयः पदं कृत्वाप्नुयाल्लक्ष्यं
तस्मात्संविधीयतां अथ रक्षा न मे संख्ये क्रियते कुरुनंदन अनुजानीहि मां राजन्गमिष्यामि गृहान्प्रति एवमुक्तस्तदा वाक्यं शीर्षो विम
नाः सुयोधनः श्रुत्वा तं समयं तस्य ध्यानमेवान्वपद्यत तमार्तमभिसंप्रेक्ष्य राजा किल स सैंधवः मृदु चात्महितं चैव सापेक्षमिदमुक्तवान्
नेह पश्यामि भवतां तथा वीर्यं धनुर्धरं यो र्जुनस्याहवे मस्त्रैः प्रतिहन्यान्महाहवे सात्वतेन सहायस्य गांडीवं धुन्वतो धनुः कोर्जुनस्याग्र एम० ७४

३

तस्मिंश्छस्त्राण्यपिशस्त्रैरकृतः महेश्वरोऽपिपार्थेनयुधितेयोधितःपुरा पदातिनामहावीर्योयोधिस्नेद्विमवत्प्रभुः दानवानांसहस्राणि हि
रण्यपुरवासिनां जघानैकरथेनैव स्वगणत्समचोदितः समायुक्तोहिकौंतेयो वासुदेवेनधीमता सामरानपिलोकांस्त्रीन्हन्यादितिमतिर्मम
सोहमिच्छाम्यनुज्ञातुं रक्षितुंवामहात्मना द्रोणेनरक्षपुत्रेणवीरेणयदिमन्यते सर्वाक्षास्त्वयमाचार्योभृशमत्रार्थितोत्वया संविधा
नंचविहितंसम्यगाकिलसज्जिताः कर्णोभूरिश्रवाद्रौणिर्वृषसेनश्चदुर्जयः कृपश्चमद्रराजश्चषडेतेस्यपुरोगमाः शकटः
पद्मकश्चार्धव्यूहोद्रोणेननिर्मितः पद्मकर्णिकमध्यस्थः सूचीपार्श्वेजयद्रथः स्थास्यतेरक्षितोवीरैः सिंधुराट्ससुदुर्मदैः
धनुष्यस्त्रेचवीर्येचप्राणेचैवतथौरसे अविषह्यतमाह्येतेनिश्चिताः पार्थषड्रथाः एतानजित्वाषड्रथान्नैवप्राप्योजयद्रथः तेषाम
केकशोवीर्यंषण्णांतमनुचिंतय सहिताहिनरव्याघ्रनशक्याजेतुमंजसा भूयस्तुमंत्रयिष्यामिनीतिमात्महितायवै मंत्रज्ञैःसचिवैः
सार्द्धंसुहृद्भिःकार्यसिद्धये द्रोणपर्वणिजयद्रथवधे॥॥॥ अर्जुन उवाच षड्रथान्धार्त्तराष्ट्रस्यमन्यसेयान्बलाधिकान् तेषांवीर्यं
ममाहेहंतुल्यमितिमेमतिः अस्त्रमस्त्रेणसर्वेषामेतेषांमधुसूदन मयाद्रक्ष्यसिनिर्भिन्नंजयद्रथवधैषिणा द्रोणस्यमिषतःसाहंस
गणस्यविलपतः मूर्द्धानंसिंधुराजस्यपातयिष्यामिभूतले यदिसाध्याश्चरुद्राश्चवसवश्चसहाश्विनः मरुतश्चसहेंद्रेणविश्वे
देवाः महेश्वराः पितरःसहगंधर्वाः सौपर्णाः सागराद्रयः द्यौर्वियत्पृथिवीचेयंदिशश्चसदिगीश्वराः ग्रामारण्यानिभूतानि
स्थावराणिचराणिच त्रातारःसिंधुराजस्यभवंतिमधुसूदन तथापिबाणैर्निहतंश्वोद्रष्टासिरणेमया सत्येनचशपेकृष्णतथैव
चायुधमालभे यस्यगोप्तामहेष्वासस्तस्यपापस्यदुर्मतेः तमेवप्रथमंद्रोणमभियास्यामिकेशव तस्मिन्द्यूतमिदंबद्धंमन्यते

प्योवि २

द्रो०
७५

ममसुयोधन· तस्मात्तेसैंधवं नाशंमिलायास्यामिसैंधवं द्रष्टास्मिस्थामहेष्वासान्नागांश्चसिंगमतङ्गितैः घ्नंगांगाणिवगिरेवैंद्रैर्दीर्यमाणा
न्मयायुधि अनागास्त्वदेहे अविध्यतिशोणितं पततु पतद्भिः पतितैश्चश्वलिभिन्नैश्च शिरैः शरैः गांडीवप्रेषिताबाणामनोनिल
समा जवे नृनागाश्वान्विदेहान्स्न कर्त्तारस्त्रमहत्स्वशः यमालकुबेराद्वरुणादिंद्राद्रुद्राच्चयन्मया उपात्तमस्त्रं घोरं ततद्रष्टारो न रायु
धि ब्राह्मेणास्त्रेणचास्त्राणि हन्यमानानिसंयुगे मयाद्रष्टास्मिसर्वेषां सैंधवस्याभिरक्षिणां शरवेगसमुत्कृत्तैराजांकेशवमूर्द्धभिः आ
स्तीर्यमाणां पृथिवीं द्रष्टास्मिश्वोमयायुधि क्रव्यादांस्तर्पयिष्यामिद्रावयिष्यामिशात्रवान् सुहृदो नंदयिष्यामि प्रमथिष्यामिसैंधवं ब
हुगास्कृत्संबंधीपापदेशसमुद्भवः मयासैंधवकोराजाहतस्वांश्चोचयिष्यति सर्वक्षीरान्नभोक्तारं पापाचाररणाजिरे मयासराजकं बा
णैर्भिन्नंद्रष्टासिसैंधवं तथाप्रभातेकर्त्तास्मियथाकृष्णसुयोधनः नान्यंधनुर्द्धरंलोकेमंतास्मत्संयुधि गांडीवंचधनुर्दिव्यंयोद्धाचाहं मंस्यते १
नरर्षभ तंचयंतास्हृषीकेशकिंनुस्यादजितंमया तवप्रसादाद्भगवन्किमवाप्यंरणेमम अविषह्यंहृषीकेशकिंजानन्मांविग
र्हसे यथालक्ष्म स्थिरंचंद्रेसमुद्रेचयथाजलं एवमेतांप्रतिज्ञांमेसत्यांविद्धिजनार्दन मावमंस्थाममास्त्राणिमावमंस्थाधनुर्दृढं
मावमंस्थाबलंबाह्वोर्मावमंस्थाधनंजयं तथाभियामिसंग्रामंनजीयेविजयामिवा तेनसत्येनसंग्रामेहंतारंविद्धिजयद्रथं ध्रुवंवैब्राह्मणे
सत्यं ध्रुवासाधुषुसंनतिः श्रीर्ध्रुवापिचयज्ञेषुध्रुवोनारायणेजयः संजयउवाच एवमुक्त्वाहृषीकेशंस्वयमात्मा नमात्मनासं
दिदेशार्जुनोनर्दन्वासविः केशवंप्रभुं यथाप्रभातेरजनींकल्पितः स्याद्रथोमम तथाकार्यंत्वयाकृष्णकार्यंहिमहदुद्यतं॥
द्रोणपर्वणिजयद्रथवधे संजयउवाच तांनिशांदुःखशोकार्त्तौनिःश्वसंताविवोरगौ निद्रांनैवोपलेभातेवासुदेवधनंजयौ नरना एम०

७५

वे१

परोक्षेह्योजाताः स्तेवाः सर्वा मर्वाः व्यथितास्त्रियंप्रामासुः किंस्विदेतद्भविष्यति वृष्णयश्च रणे गावा तानु साधोयेनभि शंसिनः सकवं
धस्तर्थोरिस्तपरिघः समदृश्यत सूर्य[illegible]ज्वालाविलग्नानि दृश्यन्त्रमरावातार्क शामस्यनिष्ठितः स निर्घाताः स
विद्युतः चचाल चापि पृथिवी सशैलवनकानना चुक्षुभुश्च महाराज सागरा मकरालयाः प्रतिस्रोतः प्रवृत्ताश्च तत्र याः गंतुमम्
द्रगाः रथाश्वनरनागानां प्रवृत्तमधरोत्तरं क्रव्यादानां प्रमोदार्थं यमराष्ट्रविवृद्धये वाहना निशकृन्मूत्रे मुमुचू रुरुदुश्च ह तानदृ
ष्ट्वा दारुणान्सर्वानुत्पातांल्लोमहर्षणान् सर्वे ते व्यथिताः सैन्यास्त्वदीया भरतर्षभ श्रुत्वा महाबलस्योग्रां प्रतिज्ञां सव्यसाचिनः
अथ कृष्णं महाबाहुरब्रवीत्पाकशासनिः आश्वासय सुभद्रां त्वं भगिनीं स्नुषया सह स्नुषास्यास्याश्वविशोकाः कुरु माध
व सान्त्वा सत्येन युक्तेन वचसाश्वासय प्रभो ततोर्जुनगृहं गत्वा वासुदेवः सुदुर्मनाः भगिनीं पुत्रशोकार्त्तामाश्वासयत दुःखितां
वासुदेव उ० मा शोकं कुरु वार्ष्णेयि कुमारं प्रति सस्नुषा सर्वेषां प्राणिनां भीरु निष्ठैषा कालनिर्मिता कुले जातस्य धीरस्य क्षत्रिय
स्य विशेषतः सदृशं मरणं ह्येतत्तव पुत्रस्य मा शुचः दिष्ट्या महारथो वीरः पितुस्तुल्यपराक्रमः क्षात्रेण विधिना प्राप्तो वीराभि
लषितां गतिं जित्वा सुबहुशः शत्रून्प्रेषयित्वा च मृत्यवे पुत्रकः वीरसूर्वीरपत्नी त्वं वीरश्लाघा वीरबान्धवा मा शुचस्तनयं भद्रे
गतः स परमां गतिं प्राप्स्यते चाप्यसौ पापः सैन्धवो बालघातकः अस्यावलेपस्य फलं ससुहृद्गणबान्धवः व्युष्टायां तु वरारोहे
रजन्यां पापकर्मकृत् न हि मोक्ष्यति पार्थात्स प्रविष्टोप्यमरावतीं श्वः शिरः श्रोष्यसे तस्य सैन्धवस्य रणे हृतं समन्तपंचका
द्बाह्यं विशोका भव मा रुदः क्षत्रधर्मं पुरस्कृत्य गतः शूरः सतां गतिं यां गतिं प्राप्नुयामेह ये चान्ये शस्त्रजीविनः व्यूढोरस्को

४ गतः पुण्यकृतां लोकान्सर्वकामदुहोऽक्षयान् तपसा ब्रह्मचर्येण श्रुतेन प्रज्ञयापि च सन्तो यां गतिमिच्छन्ति तां प्राप्तस्तव ४

द्रो० ७८

महाबाहुरनिवर्त्ती रथसत्तम गतस्तववरा राहेपुत्रः सुरजित्रंजहि अनुयातश्च पितरं मातृपक्षं च वीर्यवान् सहस्रशो रिपून्हत्वा हतः
शूरो महारथः आश्वासय स्नुषां राजन्मा शुचः क्षत्रियमर्शं क्षत्रियः सन्महच्छ्रुत्वा विशोका भव नंदिरि यस्माऽथ न प्रतिजातं तथा
नतरस्मथा चिकीर्षितौ हि ते भर्त्तुस्त्वमेकत्वात् निष्फलं यदिदं मनुष्यान्नगाः पिशाचाश्च निशाचराः पतगाः सुरगन्धर्वरागातमपि
यांति सिंधुराजं च समभवितासहोतैरपि प्रभाते ॥ ॥ द्रोणपर्वणि जयद्रथवधे संजय उवाच एतच्छ्रुत्वा वचस्तस्य केशवस्य महा
त्मनः सुभद्रा पुत्रशोकार्त्ता विललाप सुदुःखिता हा पुत्र मम मंदायाः कथमेत्य समि संयुगं निधनं प्राप्तवांस्तात पितृतुल्यपरा
क्रमः कथमिंदीवरश्यामं सुदंष्ट्रं चारुलोचनं मुखं ते दृश्यते वत्स गुंठितं रणरेणुना नूनं शूरं निपतितं त्वां पश्यंत्यनिवर्त्तिनं
सुशिरोग्रीवबाह्वंसं व्यूढोरस्कं नतोदरं चारुपचितसर्वांगं स्वक्षं शस्त्रक्षताचितं भूतानि त्वां निरीक्षंते नूनं चंद्रमिवोदितं शयनीयं
पुरा यस्य स्पर्ध्यास्तरणसंवृतं भूमावद्य कथं शेषे विप्रविद्धः सुखोचितः योऽन्वास्यत पुरा वीरो वरस्त्रीभिर्महाभुजः कथमन्व
आस्यते सोऽद्य शिवाभिः पतितो मृधे यो स्तूयत पुरा हृष्टैः सूतमागधवंदिभिः सोऽद्य क्रव्याद्गणैर्घोरैर्विनदद्भिरुपास्यते पांडवेषु च नाथे
षु वृष्णिवीरेषु वा विभो पांचालेषु च वीरेषु हतः केनाप्यनाथवत् अतृप्तदर्शना पुत्र दर्शनस्य तवानघ मंदभाग्या गमिष्या
मि व्यक्तमद्य यमक्षयं विशालाक्षं सुकेशांतं चारुवाक्यं सुगंधि च तव पुत्रक दा भूयो मुखं द्रक्ष्यामि निर्व्रणं धिग्बलं भीमसेनस्य
धिक्पार्थस्य धनुष्मतां धिग्वीर्यं वृष्णिवीराणां पांचालानां च धिग्बलं धिक्केकयांस्तथा चेदीन्मत्स्यांश्चैवाथ सृंजयान् ये त्वां
रणगतं वीरं न शेकुरभिवीक्षितुं अद्य पश्यामि पृथिवीं शून्यामिव हतत्विषं अभिमन्युमपश्यंती शोकव्याकुललोचना स्वस्रीयं वा ए० ७८

×५ गोसहस्रप्रदातॄणां क्रतुदानांचयागतिः नैवेशिकंचाभिमतंदत्तांयागतिःशुभा ब्रह्मणेभ्यःशरणेभ्योनिधिंनिदधतांचया याचापिनिन्यतदंडानांतांगतिंव्रज ५

६१

सुदेवममपुत्रंगांगेवधकः कथंत्वातिरथंवीरंद्रक्ष्याम्यहंनिपातितं हावीरहृष्टोनष्टश्चवनंसमं वासिमे अहोल्पनिसंमातृद्यक्तंलघु
हृदयेवलं २ मंतितरुणींभार्यांतवाधिभिरभिप्लुतां कथंसंधारयिष्यामिवीवत्सामिवधेनुकां अहोल्पकालेमस्थानेकृतवानसिपुत्रक
विहायफलकालेमांसुदुःखंतवदर्शने नूनंगतिःकृतांतस्यप्राप्तेरपिमहर्षिभिः पत्रत्वंकेशवेनाथसंग्रामेनाथवद्धतः पञ्चयानांत
नशीलानांब्राह्मणानांकृतात्मनां चरितब्रह्मचर्याणांपुण्यपत्नीर्थावगाहिनां कृतज्ञानांवदान्यानांगुरुशुश्रूषिणामपि सहस्रदक्षि
णानांचयागतिस्तामवाप्नुहि यागतिर्युध्यमानानांशूराणामनिवर्तिनां हतारिनिहतानांचसंग्रामेतांगतिंव्रजपुत्रक ब्रह्मचर्येणयांयां
तिमुनयःसंशितव्रताः एकपत्नीव्रतानांयांयांतितांगतिंव्रजपुत्रक राज्ञांसुचरितैर्याचगतिर्व्रजपुत्रक व्रतिनांधर्मशीलानांगुरुशुश्रूषिणा
म+ भवतिशाश्वती चातुराश्रमिणांपुण्यैःपावितानांसुरक्षिणां दीनानुकंपिनांयाचसततंसंविभागिनां पैशून्याच्चनिवृत्तानां
तांगतिं+ पित्रमोघातिथिनांयाचतांगतिंव्रजपुत्रक कृच्छ्रेषुपाधारयतामात्मानंव्यसनेषुच गतिःशोकाग्निदग्धानांतांगतिंव्रजपु
त्रकमातापित्रोश्चशुश्रूषांकल्पयंतीहयेनराः स्वदाररक्षितानांचयागतिस्तामवाप्नुहि ऋतुकालेस्वकांभार्यांगच्छतांयामनीषिणां
परस्त्रीभ्योनिवृत्तानांतांगतिंव्रजपुत्रक साम्नायेसर्वभूतानिपश्यंतिगतमत्सराः नास्तिकानांक्षमिणांयागतिस्तामवाप्नुहि मधु
मांसनिवृत्तानांमद्यार्द्भात्मद्यानृतात् परोपतापसक्तानांतांगतिंव्रजपुत्रक श्रीमंतःसर्वशास्त्रज्ञानतस्माजितेंद्रियाः यांगतिंसा
धवोयांतितांगतिंव्रजपुत्रक एवंविलपतोदीनांस्तभङ्गशोककर्शिता अन्वपद्यतयांचाल्पीवैरिसहितातदा तुःप्रकामंरुदितावं
विलप्यचसुदुःखिताः उन्मत्तवत्तदाराजन्विसंज्ञान्यपतत्क्षितौ। सोपश्चात्स्तुतांकस्मोदुःखितांभ्रशदुःखितःसिक्तांभसासमाश्वास्य

स्म३

द्रो० ६०

तत्रस्त्वामशंसवचः विसंज्ञकल्पां रुदतीं मम विह्वलां प्रवेपतीं भगिनीं पुंडरीकाक्षः इदं वचनमब्रवीत् सुभद्रे मा शुचः पुत्रं पांचाल्या सह सा
यान्तां गतोभिमन्युः प्रथितां गतिं क्षत्रियपुंगवः ये चान्येपि कुले संति पुरुषा नो वरानने सर्वे ते तां गतिं यांतु याभिमन्योर्यशस्विनः
कुर्याम तद्वयं कर्म क्रियासु सुहृदश्च नः कृतवान्यादृशं वीरः कस्तव पुत्रो महारथः एवमाश्वास्य भगिनीं द्रौपदीमपि चोत्तरां पार्थस्यैव म
हाबाहुः पार्श्वमागादरिंदमः ततोभ्यनुज्ञाय नृपान् कृष्णो बंधूंस्तथार्जुनं विवेशांतःपुरं राजंस्ते जग्मुः स्वं यथालयं ॥ ॥ द्रोणपर्वणि
जयद्रथवधे संजय उवाच ततोर्जुनस्य भवनं प्रविश्याप्रतिमं विभुः स्पृष्ट्वांभः पुंडरीकाक्षः स्थंडिले शुभलक्षणे संतस्तार शुभां शय्यां दर्भैर्वै
दूर्यसंनिभैः ततो माल्येन विधिवल्लाजैर्गंधैः सुमंगलैः अलंचकार तां शय्यां परिवार्यायुधोत्तमैः ततः स्पृष्टोदके पार्थे विनीताः
परिचारकाः दर्शयंतोंतिके चक्रुर्नैशं त्र्यंबकं बलिं ततः प्रीतमनाः पार्थो गंधमाल्यैश्च माधवं अलंकृत्योपहारं तं नैशं तस्मै न्यवेदयत्
स्मायमानस्तु गोविंदः फाल्गुनं प्रत्यभाषत सुप्यतां पार्थ भद्रं ते कल्याणाय व्रजाम्यहं स्थापयित्वा ततो द्वाःस्थान् गोप्तॄंश्चात्तायुधान्न
रान् दारुकानुगतः श्रीमान् विवेश शिविरं स्वकं शि[illegible]च शयने शुभ्रे बहुकृत्यं विचिंतयन् पार्थस्य सर्वं भगवान् शोकदुःखापहं विधिं व्य
दधात् पुंडरीकाक्षस्तेजोद्युतिविवर्द्धनं योगमास्थाय युक्तात्मा सर्वेषामीश्वरेश्वरः श्रेयस्कामः पृथुयशा विष्णुर्जिष्णोः प्रियंकरः न पांडवानां
शिविरे कश्चित्सुष्वाप तां निशां प्रजागरः सर्वजनं ह्याविवेश विशांपते पुत्रशोकाभितप्तेन प्रतिज्ञातो महात्मना सहसा सिंधुराजस्य वधो गां
डीवधन्वना तत्कथं नु महाबाहुर्वासविः परवीरहा प्रतिज्ञां सफलां कुर्यादिति ते समचिंतयन् कष्टं हीदं व्यवसितं पांडवेन महात्म
ना स च राजा महावीर्यः पारयत्वर्जुनः स तां पुत्रशोकाभितप्तेन प्रतिज्ञा महती कृता भ्रातरश्चापि विक्रांता बहुलानि बलानि च धृतरा

राम० ६०

धृतराष्ट्रपुत्रेणाश्वेतस्मै निवेदितं सहलोमेघवंशलेपुनेरतुधनंजयः जित्वारिपुगणांश्चैवपारयन्नर्जुनोव्रतं श्वोऽहत्वासिंधुराजस्यधूमके
तुमेवक्ष्यति नचसमावर्त्तकंतुमलंपार्थोधनंजयः धर्मपुत्रः कथंराजाभविष्यतिमृतेर्जुने तस्मिन्हिविलयः कृत्स्नः पांडवानांसमाहितः
यदिनोस्तिकृतंकिंचिद्यदिदत्तंहुतंयदि फलेनतस्यसर्वस्यसव्यसाचीजयत्वरीन् एवंकथयतांतेषांजयमाशंसतांप्रभो कृच्छ्रेणमहताराजन्त
जगामव्यवसन्नेत तस्यांरजन्यांमध्येतुप्रतिबुद्धोजनार्दनः स्मृत्वाप्रतिज्ञांपार्थस्यदारुकंप्रत्यभाषत अर्जुनेनप्रतिज्ञातमार्त्तेनहतबंधुना जय
द्रथंवधिष्यामिश्वोभूतइतिदारुक तत्तुदुर्योधनः श्रुत्वामंत्रिभिर्मंत्रयिष्यति यथाजयद्रथंपार्थोनहन्यादितिसंयुगे अक्षौहिण्योहिताः
सर्वारक्षिष्यंतिजयद्रथं द्रोणश्चसहपुत्रेणसर्वास्त्रविधिपारगः एकोवीरः सहस्राक्षोदैत्यदानवदर्पहा सोपितंनोत्सहेताजौहंतुंद्रोणा
नरक्षितं सोहंश्वस्तत्करिष्यामियथाकुंतीसुतोर्जुनः अप्राप्तेस्तंदिनकरेहनिष्यतिजयद्रथं नहिदाराननमित्राणिज्ञातयोनचबांध
वाः कश्चिदन्यःप्रियतरः कुंतीपुत्रान्ममार्जुनात अ[illegible]जयद्रथा। नार्जुनमिमंलोकंमुहूर्त्तमपिदारुक उ
दीक्षितुंनशक्तोहंभवितानचतत्तथा अहंविजित्यतान्सर्वान्सहसासहयद्विपान् अर्जुनार्थेहनिष्यामिसकर्णान्ससुयोधनान् श्वो
त्रिलोकंहिमेवीर्यंत्रयोलोकामहाहवे धनंजयार्थेसमरेपराक्रांतस्यदारुक श्वोनरेंद्रसहस्राणिराजपुत्रशतानिच साश्वद्विपरथा
मांजानविद्रविष्यंतिदारुक यस्तांचक्रप्रमथितांद्रक्ष्यंतिनृपवाहिनीं मयाक्रुद्धेनसमरेपांडवार्थेनिपातितां श्वोदेवाः सगंधर्वाः पिशाचो स ३
रगराक्षसाः ज्ञास्यंतिलोकाः सर्वेमांसुहृदंसव्यसाचिनः यस्तंद्वेष्टिसमांद्वेष्टियस्तंचानुसमामनु इतिसंकल्पतांबुद्ध्याशरीरार्द्धंम
मार्जुनः यथात्वंमेप्रभातायामस्यांनिशिरथोत्तमं कल्पयित्वायथाशास्त्रमादायसंयतः गदांकौमोदकींदिव्यांशक्तिंचक्रंधनुः

द्रो० ७८

म१

शान् श्वारोप्यैव रथसत्तमैर्वोपकरणानि च छादनं च कल्पयित्वा रथश्रेष्ठमुपस्थेयं ध्वजं मम वैनतेयस्य वीरस्य समरे रथशोभिनः छत्रं जांबूनदै
र्ज्वालैरर्कज्वलनसप्रभैः विश्वकर्मकृतैर्दिव्यैरश्वानपि विभूषितान् वलाहकं मेघपुष्पं शैब्यं सुग्रीवमेव च युक्त्वा वाजिवरान् यत्तः कवची तिष्ठ दा
रुक पांचजन्यस्य निर्घोषमार्षभेणैव पूरितं श्रुत्वा च भैरवं नादमुपेयाज्जोजवेन तां एकाह्नाहममर्षं च सर्वदुःखानि चैव ह भ्रातुः पितृष्वसेयस्य
व्यपनेष्यामि दारुक सर्वोपायैर्यतिष्यामि यथा बीभत्सुराहवे पश्यतां धार्तराष्ट्राणां हनिष्यति जयद्रथं यस्य यस्य च बीभत्सुर्वधे यत्नं करिष्य
ति आशंसे सारथे तत्र भवितास्य ध्रुवो जयः दारुक उवाच जय एव ध्रुवस्तस्य कुत एव पराजयः यस्य त्वं पुरुषव्याघ्र सारथ्यमुपजग्मिवान्
एवं चैतत्करिष्यामि यथा मामनुशाससि सुप्रभातामिमां रात्रिं जयाय विजयस्य हि द्रोणपर्वणि जयद्रथवधे संजय उवाच कुंतीपुत्रस्तु तं मंत्रं
स्मरन्नेव धनंजयः प्रतिज्ञामात्मनो रक्षन्मुमोहाचिंत्यविक्रमः तं तु शोकेन संतप्तं स्वप्ने कपिवरध्वजं आससाद महातेजा ध्यायंतं गरुडध्वजः
प्रत्युत्थानं च कृष्णस्य सर्वावस्थो धनंजयः न लोपयति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा प्रत्युत्थाय च गोविंदं स तस्मायासनं ददौ न चासने स्वयं बु
द्धिं बीभत्सुर्व्यदधात्तदा ततः कृष्णो महातेजा जानन्पार्थस्य निश्चयं कुंतीपुत्रमिदं वाक्यमासीनः स्थितमब्रवीत् मा विषादे मनः पा
र्थ कृथाः कालो हि दुर्जयः कालः सर्वाणि भूतानि नियच्छति परे विधौ किमर्थं च विषादस्ते तद्ब्रूहि द्विपदां वर न शोच्यं विदुषां श्रेष्ठ शोकः
कार्यविनाशनः यत्तु कार्यं भवेत्कार्यं कर्मणा तत्समाचर हीनचेष्टस्य यः शोकः स हि शत्रुर्धनंजय शोचन्नंदयते शत्रून्कर्षयत्यपि
बांधवान् क्षीयते च नरस्तस्मान्न त्वं शोचितुमर्हसि इत्युक्तो वासुदेवेन बीभत्सुरपराजितः आबभाषे तदा विद्वानिदं वचनमर्थवत् मया प्रति
ज्ञा महती जयद्रथवधे कृता श्वोऽस्मि हंता दुरात्मानं पुत्रघ्नमिति केशव मत्प्रतिज्ञाविघातार्थं धार्तराष्ट्रैः किलाच्युत पृष्ठतः सैंधवः कार्यः सर्वै एम०

७८

गुप्तम्महारथैः दशचैकाचताः कृत्स्नमक्षौहिण्यः सुदुर्जयाः हृतावशेषास्तत्रेमा हृतमाधवसंख्यया ताभिः परिवृतः संख्ये कौरवै
महारथैः कथंशक्येतमद्रष्टुंदुरात्माकृष्णसैंधवः प्रतिज्ञापारणंचापिनभविष्यतिकेशव प्रतिज्ञायांचहीनायांकथंजीवतिमद्विधः दुःखो
पायस्यमेवीरविकांक्षापरिवर्त्तते द्रुतंचयातिसविताततएतद्ब्रवीम्यहं शोकस्थानंतुतच्छ्रुत्वापार्थस्यद्विजकेतनः संस्पृश्यांभस्ततः कृष्ण
प्राङ्मुखः समवस्थितः इदंवाक्यंमहातेजाबभाषेपुष्करेक्षणः हितार्थंपांडुपुत्रस्यसैंधवस्यवधेधृतः पार्थपाशुपतंनामपरमास्त्रंसनातनं
येनसर्वान्मृधेदैत्यान्जघ्नेदेवोमहेश्वरः यदितद्विदितंतेद्यश्वोहंतासिजयद्रथं अथाज्ञातुंप्रपद्यस्वमनसावृषभध्वजं तंदेवंमनसाध्यात्वाजो
षमास्स्वधनंजय ततस्तस्यप्रसादात्वंभक्तःप्राप्स्यसितन्महत् ततःकृष्णवचःश्रुत्वासंस्पृश्यांभोधनंजयः भूमावासीनएकाग्रोजगाममन
साभवं ततः प्रणिहितेब्राह्मेमुहूर्तेशुभलक्षणे आत्मानमर्जुनोपश्यद्गगनेसहकेशवं पुण्यंहिमवतःपादंमणिमंतंचपर्वतं
ज्योतिर्भिश्चसमाकीर्णं सिद्धचारणसेवितं वायुवेगगतिःपार्थः खंभेजेसहकेशवः केशवेनगृहीतः सदक्षिणेविभुनाभुजे प्रेक्षमा
णोबहून्भावान्जगामाद्भुतदर्शनान् उदीच्यांदिशिधर्मात्मासोपश्यच्छ्वेतपर्वतं कुबेरस्यविहारेचनलिनींपद्मभूषितां सरिच्छ्रेष्ठांचतां
गंगांवीक्षमाणोबहूदकां सदापुष्पफलैर्वृक्षैरुपेतांस्फटिकोपलां सिंहव्याघ्रसमाकीर्णांनानामृगसमाकुलां पुण्याश्रमवतींरम्यां
मनोज्ञांडजसेवितां मंदरस्यप्रदेशांश्चकिंनरोद्गीतनादितान् हेमरूप्यमयैः शृंगैर्नानौषधिविदीपितां तथामंदारवृक्षैश्चपुष्पितैरुपशो
भितां स्निग्धांजनचयाकारंसंप्राप्यकालपर्वतं ब्रह्मतुंगंनदीश्चान्यास्तथाजनपदानपि सुतुंगंशतशृंगंचशर्यातिवनमेवच पुण्यम
श्वशिरःस्थानंस्थानमाथर्वणस्यच वृषदंशंचशैलेंद्रंमहामंदरमेवच अप्सरोभिःसमाकीर्णंकिंनरैश्चोपशोभितं तस्मिन्शैले

द्रो०

७प

व्रजन् [illegible] पार्थः सकृष्णः समपश्यत शुभैः प्रस्रवणैर्जुष्टां हेमधातुविभूषितां चंद्ररश्मिप्रतीकाशां गौः शिखिभिः पुरमा[illegible]नीं समुद्रांश्चाद्भु
ताकारान्पश्यन्बहुलाकरान् वियद्द्यां पृथिवीं चैव तथा विष्णुपदं व्रजन् विस्मितः सह कृष्णेन निसृतो वाण इवात्यगात् ग्रहनक्षत्रसो
मानां सूर्याग्न्योश्च समत्विषं अपश्यत्तदा पार्थो ज्वलंतमिव पर्वतं समासाद्य तु तं शैलं शैलाग्रे समवस्थितं तपोनित्यं महात्मानमपश्य
द्वृषभध्वजं सहस्रमिव सूर्याणां दीप्यमानं स्वतेजसा शूलिनं जटिलं गौरं वल्कलाजिनवाससं नयनानां सहस्रैश्च विचित्रांगं महौजसं पा
र्वत्या सहितं देवं भूतसंघैश्च भास्वरैः गीतवादित्रसंनादं हास्यलास्यसमन्वितं पार्थेन सह धर्मात्मा गणैर्ब्रह्म सनातनं लोकादिं वि
श्वकर्माणमजमीशानमव्ययं मनसः परमं योनिं खं वायुं ज्योतिषां निधिं स्रष्टारं वारिधाराणां भुवश्च प्रकृतिं परां देवदानवयक्षाणां मान
वानां च साधनं योगानां च परं ब्रह्म तत्सद्ब्रह्मविदां निधिं चराचरस्य स्रष्टारं प्रतिहर्तारमेव च कालकोपं महात्मानं शक्रसूर्यगुणोदयं ववंदे
तं तदा कृष्णो वाङ्मनोबुद्धिकर्मभिः यं प्रपद्यंति विद्वांसः सूक्ष्माध्यात्मपदैषिणः तमजं कारणात्मानं जग्मतुः शरणं भवं अर्जुनश्चापि तं दे
वं भूयो भूयोऽप्यवंदत ज्ञात्वा तं सर्वभूतादिं भूतभव्यभवोद्भवं ततस्तावागतौ दृष्ट्वा नरनारायणावुभौ सुप्रसन्नमनाः शर्वः प्रोवाच प्रहस
न्निव स्वागतं वो नरश्रेष्ठावुत्तिष्ठेतां गतक्लमौ किं च वामीप्सितं वीरौ मनसः क्षिप्रमुच्यतां येन कार्येण संप्राप्तौ युवां तत्साधयामि किं श्रि
यतामात्मनः श्रेयस्तत्सर्वं प्रददानि वां ततस्तद्वचनं श्रुत्वा प्रत्युत्थाय कृतांजली वासुदेवार्जुनौ शर्वं तुष्टुवाते महामती भक्त्या स्तवेन दिव्ये
न महात्मानावनिन्दितौ कृष्णार्जुनावूचतुः नमो भवाय शर्वाय रुद्राय वरदाय च पशूनां पतये नित्यमुग्राय च कपर्दिने महादेवाय
भीमाय त्र्यंबकाय च शांतये ईशानाय भगघ्नाय नमोऽस्त्वंधकघातिने कुमारगुरवे तुभ्यं नीलग्रीवाय वेधसे पिनाकिने हविष्याय सत्याय

राम०

७प

विश्वेश्वरा विलोहिताय धूम्राय व्याधायानपराजिते नित्यं नीलशिखंडाय शूलिने दिव्यचक्षुषे होत्रे पोत्रे त्रिनेत्राय व्याधाय
वसुरेतसे अचिंत्यायांबिकाभर्त्रे सर्वदेवस्तुताय च वृषध्वजाय मुंडाय जटिले ब्रह्मचारिणे तप्यमानाय सलिले ब्रह्मण्यायाजिताय च विश्वात्म-
ने विश्वसृजे विश्वमावृत्य तिष्ठते नमो नमस्ते सेव्याय भूतानां प्रभवे सदा ब्रह्मवक्त्राय शर्वाय शंकराय शिवाय च नमोस्तु वाचस्पतये प्रजानां
पतये नमः नमो विश्वस्य पतये महतां पतये नमः नमः सहस्रशिरसे सहस्रभुजमन्यवे सहस्रनेत्रपादाय नमोऽसंख्येयकर्मणे नमो
हिरण्यवर्णाय हिरण्यकवचाय च भक्तानुकंपिने नित्यं सिध्यतां नो वरः प्रभो संजय उवाच एवं स्तुत्वा महादेवं वासुदेवः सहार्जुनः
प्रसादयामास भवं तदा ह्यस्त्रोपलब्धये ॥ ॥ द्रोणपर्वणि जयद्रथवधे संजय उवाच ततः पार्थः प्रसन्नात्मा प्रांजलिर्वृषभध्वजं दद-
र्शोत्फुल्लनयनः समस्तं तेजसां निधिं तं चोपहारं स्वकृतं नैशं नित्यकमात्मना ददर्श त्र्यंबकाभ्याशे वासुदेवनिवेदितं ततोभिपूज्य मन-
सा कृष्णं शर्वं च पांडवः इच्छाम्यहं दिव्यमस्त्रमित्यभाषत शंकरं ततः पार्थस्य विज्ञाय वरार्थे वचनं तदा वासुदेवार्जुनौ देवः स्मयमानोभ्य-
भाषत स्वागतं वां नरश्रेष्ठौ विज्ञातं मनसेप्सितं येन कामेन संप्राप्तौ भवद्भ्यां तद्ददाम्यहं सरोमृतमयं दिव्यमभ्याशे शत्रुसूदनौ तत्र मे
तद्धनुर्दिव्यं शरश्च निहितः पुरा येन देवारयः सर्वे मया युधि निपातिताः तत आनीयतां कृष्णौ सशरं धनुरुत्तमं तथेत्युक्त्वा तु तौ वीरौ स-
र्वपारिषदैः सह प्रस्थितौ तत्सरो दिव्यं दिव्याश्चर्यशतैर्युतं निर्दिष्टं यद्वृषांकेन पुण्यं सर्वार्थसाधकं तौ जग्मतुरसंभ्रांतौ नरनारायणावृ-
षी ततस्तौ तत्सरो गत्वा सूर्यमंडलसंनिभं नागमंतर्जले घोरं ददृशातेऽर्जुनाच्युतौ द्वितीयं चापरं नागं सहस्रशिरसं वरं वमंतं विपुलां
ज्वालां ददृशातेग्निवर्चसं ततः कृष्णश्च पार्थश्च संस्पृश्यापः कृतांजली तौ नागावुपतस्थाते नमस्यंतौ वृषध्वजं गृणंतौ वेदवि-

द्रो० ८० द्यासीत्तद्भुतमशतरूपिणं अथेमम्परमं गता मतौ गत्वा सर्वात्मना भवं ततस्तौ द्रष्टा हाहा त्वा ह्रिलाद्रूपं महेशरेगो धनुर्बाणाश्च शत्रुघ्नं तद्दृष्टं समपद्यत
तौ तज्जगृहतुः प्रीतौ धनुर्बाणं च सुप्रभं आजह्रतुर्महात्मानौ ददतुश्च महात्मने ततः पार्श्वाद्वृषांकस्य ब्रह्मचारी न्यवर्तत पिंगाक्षस्तपसः क्षे-
त्रं बलवान्नीललोहितः स तद्गृह्य धनुःश्रेष्ठं तस्थौ स्थानं समाहितः विचकर्ष च विधिवत्सशरं धनुरुत्तमं तस्य मौर्वीं च मुष्टिं च स्थानं
चालक्ष्य पांडवः श्रुत्वा मंत्रं भवप्रोक्तं जग्राहाचिंत्यविक्रमः स सरस्येव तं बाणं मुमोचातिबलः प्रभुः चकार च पुनर्वीरस्तस्मिन्सरसि तद्धनुः ततः प्री-
तं भवं ज्ञात्वा स्मृतिमानर्जुनस्तदा वरमारण्यके दत्तं दर्शनं शंकरस्य च मनसा चिंतयामास तन्मे संपद्यतामिति तस्य तन्मतमाज्ञा-
य प्रीतः प्रादाद्वरं भवः तच्च पाशुपतं घोरं प्रतिज्ञायाश्च पारणं ततः पाशुपतं दिव्यमवाप्य पुनरीश्वरात् संहृष्टरोमा दुर्धर्षः कृतं कार्यम-
मन्यत ववंदतुश्च संहृष्टौ शिरोभ्यां तं महेश्वरं अनुज्ञातौ क्षणे तस्मिन्भवेनार्जुनकेशवौ प्राप्तौ स्वशिबिरं वीरौ मुदा परमया युतौ
तथा भवेनानुमतौ महासुरनिघातिना इंद्राविष्णू यथा प्रीतौ जंभस्य वधकांक्षिणौ ॥ ॥ द्रोणपर्वणि जयद्रथवधे ॥ संजय उवाच तयोः
संवदतोरेवं कृष्णदारुकयोस्तदा सा व्यगाद्रजनी राजन्नथ राजान्वबुध्यत पठंति पाणिस्वनिका मागधा मधुपर्किकाः वैतालिकाश्च सू-
ताश्च तुष्टुवुः पुरुषर्षभं नर्तकाश्चाप्यनृत्यंत जगुर्गीतानि गायकाः कुरुवंशस्तवार्थानि मधुरं रक्तकंठिनः मृदंगा झर्झरा भेर्यः पणवा-
नकगोमुखाः आडंबराश्च शंखाश्च दुंदुभ्यश्च महास्वनाः एवमेतानि सर्वाणि तथान्यान्यपि भारत वादयंति स्म संहृष्टाः कुशलाः सा-
धुशिक्षिताः स मेघसमनिर्घोषो महाशब्दोऽस्पृशद्दिवं पार्थिवप्रवरं सुप्तं युधिष्ठिरमबोधयत प्रतिबुद्धः सुखं सुप्तो महार्हे शयनोत्तमे
उत्थायावश्यकार्यार्थं ययौ स्नानगृहं नृपः ततः शुक्लांबराः स्नाताः गुरुराः शतमष्ट च स्नापकाः कांचनैः कुंभैः पूर्णैः समु- द्रो० ८०

पतस्थिरे भद्रासनेनुपविष्टः परिधायांबरं लघु ततोभ्यंगचंदनसंयुक्तैः पानीयैरभिमंत्रितैः उत्सादितः कषायेणावलवद्भिः सुशिक्षितैः
आप्लुतः साधिवासेन जलेन सुसुगंधिना राजहंसनिभं प्राप्य उष्णीषं शिथिलार्पितं जलक्षयनिमित्तं वै वेष्टयामास मूर्द्धनि हरिणा चंदने
नांगमुपलिप्य महाभुजः स्रग्वी चाक्लिष्टवसनः प्राङ्मुखः प्रांजलिः स्थितः जजाप जप्यं कौंतेयः सतां मार्गमनुष्ठितः ततोग्निशरणं दीप्तं प्रवि
वेश विनीतवत् समिद्धं सपवित्राभिरग्निमाहुतिभिस्तथा मंत्रपूताभिरर्चित्वा निश्चक्राम गृहात्ततः द्वितीयां पुरुषव्याघ्रः कक्ष्यां निर्ग
म्य पार्थिवः ततो वेदविदो वृद्धानपश्यद्ब्राह्मणर्षभान् दांतान्वेदव्रतस्नातान् स्नातानवभृथेषु च सहस्रानुचरान्सौरानसहस्रं चाष्ट चाप
रान् अक्षतैः सुमनोभिश्च वाचयित्वा महाभुजः तान्द्विजान्मधुसर्पिर्भ्यां फलैः श्रेष्ठैः सुमंगलैः प्रादात्कांचनमेकैकं निष्कं विप्राय पां
डवः अलंकृतं चाश्वशतं वासांसीष्टाश्च दक्षिणाः तथा गाः कपिला दोग्ध्रीः सवत्साः पांडुनंदनः हेमशृंगी रौप्यखुरा दत्वा चक्रे प्रद
क्षिणं स्वस्तिकान्वर्द्धमानांश्च नंद्यावर्तांश्च कांचनान् माल्यं च जलकुंभांश्च ज्वलितं च हुताशनं पूर्णान्यक्षतपात्राणि रुचकान्रोचना
स्तथा स्वलंकृताः शुभाः कन्या दधिसर्पिर्मधूदकं मंगल्यान्पक्षिणश्चैव यच्चान्यदपि पूजितं दृष्ट्वा स्पृष्ट्वा च कौंतेयो बाह्यां कक्ष्यां ततो
गमत् विश्वकर्मकृतं दिव्यमुपजह्रुर्वरासनं तत्रैतस्योपविष्टस्य भूषणानि महात्मनः उपजह्रुर्महार्हाणि प्रेष्याः शुभ्राणि सर्वशः मुक्ता
भरणवेषस्य कौंतेयस्य महात्मनः रूपमासीन्महाराज द्विषतां शोकवर्द्धनं चामरैश्चंद्ररश्म्याभैर्हेमदंडैः सुशोभनैः दोधूयमानैः शुशुभे विद्यु
द्भिरिव तोयदः संस्तूयमानः सूतैश्च वंद्यमानश्च वंदिभिः उपगीयमानो गंधर्वैरास्ते स्म कुरुनंदनः ततो मुहूर्त्तादासीत्तु वंदिनां निस्वनो
महान् नेमिघोषश्च रथिनां खुरघोषश्च वाजिनां ह्रादेन गजघंटानां शंखानां निनदेन च नराणां पदशब्दैश्च कंतीव स्म मेदिनी

तः सुस्नातं माधवं जातुष्मंतं भूतले स्थितः शिरसा वंदनीयं तमभिवाद्य जनेश्वरं कुंडली बद्धनिस्त्रिंशः सन्नद्धकवचो युवा अभिप्रणम्य
शिरसा प्राह्लादो धर्मात्मजो नृपो येवे सर्वे तस्य हृषीकेशमुपयातं महात्मने सोऽब्रवीत् सुसुखमाधुः स्वागतेनैव माधव अर्घ्येणैव चासनेनैव चास्मै दीयतां परमा
र्चितं ततः प्रवेश्य वाक्यमुपवेश्य वासने [illegible] पूजया मामवि
धिवद्धर्मराजो युधिष्ठिरः ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे संजय उवाच ततो युधिष्ठिरो राजा प्रतिनंद्य जनार्दनं उवाच परमप्रीतः कौंते
यो देवकीसुतं सुखेन रजनी व्युष्टा कच्चित्ते मधुसूदन कच्चित् ज्ञानानि सर्वाणि अव्यग्राणि तवाच्युत वासुदेवोपि तद्युक्तं पर्यपृच्छद्यु
धिष्ठिरं ततः प्रकृतीः क्षत्ता मेधेयं सुपस्थिताः अनुज्ञातश्च राज्ञा स प्रावेशयत तं जनं विराटं भीमसेनं च धृष्टद्युम्नं च सात्यकिं चेदिपं धृ ९६
ष्टकेतुं द्रुपदं च महारथं शिखंडिनं यमौ चैव चेकितानं च केकयं युयुत्सुं चैव कौरव्यं पांचाल्यं चोत्तमौजसं युधामन्युं सुबाहुं च द्रौपदेयांश्च
सर्वशः एते चान्ये च बहवः क्षत्रियाः क्षत्रियर्षभं उपतस्थुर्महात्मानं विविशुश्चासनेषु शुभे एकस्मिन्नासने वीरावुपविष्टौ महाबलौ कृ
ष्णश्च युयुधानश्च महात्मानौ महाद्युती ततो युधिष्ठिरस्तेषां शृण्वतां मधुसूदनं अब्रवीत् पुंडरीकाक्षमाभाष्य मधुरं वचः एकं त्वां व
यमाश्रित्य सहस्राक्षमिवामराः प्रार्थयामो जयं युद्धे शाश्वतानि सुखानि च त्वं हि राज्यविनाशं च द्विषद्भिश्च निराकृतिं क्लेशांश्च विविधान् कृष्ण
सर्वांस्तानपि वेत्थ नः त्वयि सर्वेश सर्वेषामस्माकं भक्तवत्सल सुखमायत्तमत्यर्थं यात्रा च मधुसूदन स तथा कुरु वार्ष्णेय यथा त्वयि मनो
मम अर्जुनस्य यथा सत्या प्रतिज्ञा स्याच्चिकीर्षिता स भवांस्तारयत्वस्माद् दुःखामर्षमहार्णवात पारं तितीर्षतामद्य प्लवो नो भव माधव
न हि तत्कुरुते संख्ये रथी रिपुवधोद्यतः यथा वै कुरुते कृष्ण सारथिर्यत्नमास्थितः यथैव सर्वास्वापत्सु पासि वृष्णीन् जनार्दन तथैवास्मा

कृ१

महाबाहो दृष्टिनोत्रातुमर्हसि त्वमगाधे जले विमग्नान् पांडवान् कुरुसागरे समुद्धरस्व विभो शंखचक्रगदाधर नमस्ते देवदे
वेश सनातन विशातन विष्णो जिष्णो हरे कृष्ण वैकुंठ पुरुषोत्तम नारदस्त्वां समाचख्यौ पुराणमृषिसत्तमं वरदं शार्ङ्गिणं श्रेष्ठं तत्सत्यं
कुरु माधव इत्युक्तः पुंडरीकाक्षो धर्मराजेन संसदि तोयमेघस्वनो वाग्मी प्रत्युवाच युधिष्ठिरं वासुदेव उवाच सामरेष्वपि लोकेषु सर्वेषु न त
था विधः शरासनधरः कश्चिद्यथा पार्थो धनंजयः वीर्यवानस्त्रसंपन्नः पराक्रान्तो महाबलः युद्धशौंडः सदामर्षी तेजसा परमो नृणां स
युवा वृषभस्कंधो दीर्घबाहुर्महाबलः सिंहर्षभगतिः श्रीमान्द्विषतस्ते हनिष्यति अहं च तत्करिष्यामि यथा कुंतीसुतोर्जुनः धार्तराष्ट्रस्य सै
न्यानि धक्ष्यत्यग्निरिवोच्छ्रितः अद्य तं पापकर्माणं क्षुद्रं सौभद्रघातिनं अपुनर्दर्शनं मार्गमिषुभिः क्षेप्स्यतेर्जुनः तस्याद्य गृध्राः श्येनाश्च वं
रगोमायवस्तथा भक्षयिष्यंति मांसानि ये चान्ये पुरुषादकाः यद्यस्य देवा गोप्तारः सेंद्राः सर्वे तथाप्यसौ राजधानीं यमस्याद्य हतः प्रा
प्स्यति संकुले निहत्य सैंधवं जिष्णुरद्य त्वामुपयास्यति विशोको विज्वरो राजन्भव भूतिपुरस्कृतः ॥ इति द्रोणपर्वणि जयद्रथवधे सं
जय उवाच तथा तु वदतां तेषां प्रादुरासीद्धनंजयः दिदृक्षुर्भरतश्रेष्ठं राजानं ससुहृद्गणं तं विविक्षुं शुभां कक्षामभिवंद्याग्रतः स्थितं स
मुत्थायार्जुनं प्रेम्णा सस्वजे पांडवर्षभः मूर्ध्नि चैनमुपाघ्राय परिष्वज्य च बाहुना आशिषः परमाः प्रोच्य स्मयमानोभ्यभाषत व्यक्तमर्जुन संग्रा
मे ध्रुवस्ते विजयो महान् यादृग्रूपा हि ते छाया प्रसन्नश्च जनार्दनः तमब्रवीत्ततो जिष्णुर्महदाश्चर्यमुत्तमं दृष्टवानस्मि भद्रं ते केशवस्य प्रसाद
जं ततस्तत्कथयामास यथादृष्टं धनंजय आश्वासनार्थं सुहृदां त्र्यंबकेन समागमं ततः शिरोभिरवनिं स्पृष्ट्वा सर्वे च विस्मिताः नमस्कृ
त्वा वृषांकाय साधु साध्विति चाब्रुवन् अनुज्ञातास्ततः सर्वे युधिष्ठिरनिवेशनात् रथेनैकेन दुर्धर्षौ युयुधानजनार्दनौ जग्मतुः सहितौ

ड्रो०

पहीला ८२

वीरावर्जनसंनिवेशनं तत्रगत्वास्पृशी केशः कलयामास सत्वरं र [redacted] थं रथवरस्याजौ वानरर्षभलक्षणां
मेमियस्मर्मतिघोषस्तनकांचनसप्रभः यथोरथवरः क्लृप्तः शिर्युद्दिवमकृपया ततः पुरुषशार्दूलं सज्जंसद्रूपसंस्मरः कृताह्निकाय पार्थाय
मेवेदयततंरथं तंतुलोकेश्वरः पुंसां किरीटीहेमवर्म्मभृत चापवाणधरोवह्निंप्रदक्षिणमवर्त्तत तयोविद्यावयोवृद्धैः क्रियावद्भिर्जितेन्द्रियैः
स्तूयमानोजयाशीभिरारुरोहमहारथं जैत्रैः सांग्रामिकैर्म्मंत्रैः पूर्वमेवरथोत्तमं अभिमंत्रितमर्चिष्मानुदयंभास्करोयथा सरथरथिनां
श्रेष्ठः कांचनेकांचनावृतः विबभौविमलोर्चिष्मानेमाविवदिवाकरः अन्वारुरोहतुः पार्थंयुयुधानजनार्दनौ शर्यातेर्यज्ञमायांतंयथेंद्रंदे
वमश्विनौ अथजग्राहगोविंदोरश्मीनरश्मिविदांवरः मातलिर्वासवस्येवव्रत्रंहंतुंप्रयास्यतः सताभ्यांसहितः पार्थोरथप्रवरमास्थितः
सहितोवृत्रशुक्राभ्यांतमोनिघ्नन्यथाशशी सैंधवस्यवधप्रेप्सुः प्रयातः शत्रुपूगहा सहांबुपतिमित्राभ्यांयथेंद्रस्तारकामये ततोवादि
त्रनिर्घोषैर्मांगल्यैश्चस्तवैः शुभैः प्रयांतमर्जुनंवीरंमागधाश्चैवतुष्टुवुः सजयाशीः सपुण्याहः सूतमागधनिस्वनः युक्तोवादित्रघोषेणतेषां
रतिकरोभवत तमनुप्रयतोवायुः पुण्यगंधवहः शुभः ववौसंहर्षयन्पार्थंद्विषतश्चापिशोषयन् ततस्तस्मिन्क्षणेराजन्निमित्तानिविधा
निप्रभानिच प्रादुरासन्निमित्तानिविजयायवहूनिच पांडवानांत्वदीयानांविपरीतानिमारिष दृष्ट्वार्जुनोनिमित्तानिविजयायप्रदक्षिणा
युयुधानंमहेष्वासमिदंवचनमब्रवीत युयुधानाद्ययुद्धेमेदृश्यतेविजयोध्रुवः यथाहीमानिलिंगानिदृश्यंतेशिनिपुंगव सोहंतत्रगमिष्यामि
यत्रसैंधवकोनृपः यियासुर्यमलोकंयममवीर्यंप्रतीक्षते यथापरमकंकृत्यंसैंधवस्यवधोमम तथैवसुमहत्कृत्यंधर्मराजस्यरक्षणं एप० ८२
सत्वमद्यमहावाहोराजानंपरिपालय यथैवहिमयागुप्तस्त्वयागुप्तोभवेत्तथा नपश्यामिचतंलोकेयस्त्वांयुद्धेपराजयेत वासुदेवसमं

पुंडस्य यमप्यमेरयुः त्वयि चाहं परासक्तः प्रद्युम्ने वा महारथे शक्नुयां मे ध्रुवं हंतुमन्ये च्छो नरर्षभ मय्यपेक्षा न कर्त्तव्या कथंचिदपि सा
त्वत राजन्मेव परा गतिः कार्यं मयैवात्मना त्वया गच्छ पार्थं महाबाहो मा भूद्वा व्यवस्थितः किं विधास्यथ तेतत्र यत्राहमपि च ध्रुवं एवमुक्त्वा स्त्व
पार्थेन मा सात्यकिः परवीरहा नैषत्सुद्धा गमनं त्र मा भूद्वा व्यवस्थितः किं विधास्यथ तेतत्र यत्राज्ञा युधिष्ठिरः ॥ ॥ इति द्रोणप
र्वणि जयद्रथवधे धृतराष्ट्र उवाच योभूत्तत्किमकार्षुस्ते दुःखशोकसमन्विते अभिमन्यौ हते तत्र के वायुध्यंत मामकाः ज्ञानंतस्तस्य
कर्माणि कुरवः सव्यसाचिनः कथं तत्किल्बिषं कृत्वा निर्भया ब्रूहि मामकाः पुत्रशोकाभिसंतप्तं क्रुद्धं मृत्युमिवांतकं आयांतं पुरुषव्या
घ्रं कथं ददृशुराहवे कपिराजध्वजं संख्ये विधुन्वानं महद्धनुः दृष्ट्वा पुत्रपरिद्यूनं किमकुर्वत मामकाः किंनु संजय संग्रामे वृत्तं दुर्योध
नं प्रति परिदेवो महानत्र श्रुतो मे नाभिनंदितः बभूवुर्ये मनोग्राह्याः शब्दाः श्रुतिसुखावहाः न श्रूयंते यथा वै ते मे ध्वस्य निवेशने स्तुवतां ना
द्य श्रूयंते पुत्राणां शिबिरे मम सूतमागधसंघानां नर्तकानां च सर्वशः शब्देन नादिताभीक्ष्णमभवद्यत्र मे श्रुतिः दीनानामद्य तं शब्दं
न शृणोमि समीरितं निवेशने सत्यधृतेः सोमदत्तस्य संजय आसीनोहं पुरा तात शब्दमश्रौषमुत्तमं तदद्य पुण्यहीनोहमार्त्तस्वर
निनादितं निवेशनं गतोत्साहं पुत्राणां मम लक्षये विविंशतेर्दुर्मुखस्य चित्रसेनविकर्णयोः अन्येषां च सुतानां मे न तथा श्रूयते
ध्वनिः ब्राह्मणाः क्षत्रिया वैश्या यं शिष्याः पर्युपासते द्रोणपुत्रं महेष्वासं पुत्राणां मे परायणं वितंडालापहुतवादित्रवादितैः गीतै
श्च विविधैरिष्टै रमते यो दिवानिशं उपास्यमानो बहुभिः कुरुपांडवसात्वतैः सूत तस्य गृहे शब्दो नाद्य द्रोणायनेर्यथा पुरा द्रोणपुत्रं म
हेष्वासं गायना नर्तकाश्च ये अत्यर्थमुपतिष्ठंति तेषां न श्रूयते ध्वनिः विंदानुविंदयोः सायं शिबिरे यो महाध्वनिः श्रूयते सोद्य न तथा

द्रो०

दुसरा ८२

केकयानांचवृष्णीनां नित्यंसंमानितानांचतालगीतस्वनोमहान् नसतांश्रूयते तातगणानांसंप्रनृत्यतः समंततस्त्रिगर्त्तानांयाज
कायसमुपासते सोमदत्तिंश्रुतनिधिंतेषांनश्रूयतेध्वनिः ज्याघोषोब्रह्मघोषश्चतोमरासिरथध्वनिः द्रोणस्यासीदविरतोगृहेतन्नशृ
णोम्यहं नानादेशसमुत्थानांगीतानांयोभवत्स्वनः वादित्रनादितानांचसोद्यनश्रूयतेमहान् यदाप्रभृत्युपप्लव्याच्छांतिमिच्छञ्जना
र्दनः आगतःसर्वभूतानामनुकंपार्थमच्युतः ततोहमब्रुवंसूतमंदंदुर्योधनंतदा वासुदेवेनतीर्थेनपुत्रसंशाम्यपांडवैः कालंप्रा
प्तमहंमन्येमात्वंदुर्योधनातिगाः शमंचेद्याचमानंत्वंप्रत्याख्यास्यसिकेशवं हितार्थमभिजल्पंतंनतवास्तिरणोजयः प्रत्याचष्टसदाशार्ह
मृषभंसर्वधन्विनां अनर्हेयानिजल्पंतमन्वयात्तापद्यत ततोदुःशासनस्यैवकर्णस्यचमतंद्वयोः अन्ववर्त्ततमांहित्वाकृष्टःकालेनदु
र्मतिः नह्यहंद्यूतमिच्छामिविदुरोनप्रशंसति सिंधुराजोनचेच्छतिभीष्मोनद्यूतमिच्छति शल्योभूरिश्रवाश्चैवपुरुमित्रोजयस्तथा अश्वत्थामाकृ
पोद्रोणोद्यूतंनेच्छंतिसंजय एतेषांमतमाज्ञायप्रवर्त्तेततपुत्रकः सज्ञातिमित्रः ससुहृच्चिरंजीवेदनामयः सनामधुरसंभाषाज्ञातिबंधुप्रियंवदान्
कुलीनान्संमतान्प्राज्ञान्सुखंप्राप्स्यतिपांडवान् धर्मापेक्षोनरोनित्यंसर्वत्रलभतेसुखं प्रेत्यभावेचकल्याणंप्रसादंप्रतिपद्यते अर्हंत्यर्द्धंपृथि
व्यास्तेभोक्तुंसामर्थ्यसाधनाः तेषामपिसमुद्रांतापितृपैतामहीमही नियुज्यमानाःस्थास्यंतिपांडवाधर्मवर्त्मनि संतिमेज्ञातयस्तातयेषां
श्रोष्यंतिपांडवाः शल्यस्यसोमदत्तस्यभीष्मस्यचमहात्मनः द्रोणस्याथविकर्णस्यबाह्लीकस्यकृपस्यच अन्येषांचैववृद्धानांभरतानांमहात्म
नां त्वदर्थंब्रुवतांतातकरिष्यंतिवचोहितं किंवात्वंमन्यसेतेषांयस्त्वांब्रूयादतोन्यथा कृष्णोनधर्मंसंजह्यात्सर्वेहितेत्वदन्वयाः मयापिचोक्ता
स्तेवीरावचनंधर्मसंहितं नान्यथाप्रकरिष्यंतिधर्मात्मानोहिपार्थिवाः इत्यहंविलपन्सूतबहुशःपुत्रमुक्तवान् नचमेश्रुतवान्मूढोमन्येकालस्य

एम०

८२

स्प३

स्मपर्ययात दुःखो राजन्नेनेयज्ञस्मिविराटश्च मास्तक्ति उत्तमौजाश्च यांचालो युधामन्युश्च दुर्जयः धृष्टद्युम्नश्च दुर्धर्षः शिखंडी चापराजितः अश्मकाः केकयाश्चैव क्षत्रधर्मा च सौमकिः चैद्यश्च चेकितानश्च पुत्रः काश्यस्य चाभिभुः द्रौपदेया विराटश्च द्रुपदश्च महारथः यमौ च पुरुषव्याघ्रौ मंत्री च मधुसूदनः क एतान् जातु युध्येत लोकेस्मिन्विजिगीषुः दिव्यमस्त्रं विकुर्वाणान्संदहेयुः परान्रणे अन्यो दुर्योधनात्कर्णाच्छकुनेश्चापि सौबलात दुःशासनचतुर्थान्नान्यं पश्यामि पंचमं येषामभीषुहस्तः स्यात् विष्वक्सेनो रथे स्थितः संनद्धश्चार्जुनो योद्धा तेषां नास्ति पराजयः तेषां मम विलापानां नायं दुर्योधनः स्मरेत हतो हि पुरुषव्याघ्रो भीष्मो द्रोणश्च माहवे तेषां विदुरवाक्यानामुक्तानां [illegible] दीर्घदर्शिना दृष्ट्वेमां फलनिर्वृत्तिं मन्ये शोचंति पुत्रकाः सेनां दृष्ट्वाभिभूतां मे शैनेयेनार्जुनेन च शून्यान्दृष्ट्वा रथोपस्थान्मन्ये शोचंति पुत्रकाः हिमात्यये यथा कक्षं शुष्कं वातेरितो महान अग्निर्दहेत्तथा सेनां मामिकां स धनंजयः आचक्ष्व मम तत्सर्वं कुशलो ह्यसि संजय यदुपायात सायाह्ने कृत्वा पार्थस्य किल्बिषं अभिमन्यो हते तात कथमासीन्मनो हि वः न जातु तस्य कर्माणि युधि गांडीवधन्वनः अपकृत्य महत्तात सोढुं शक्ष्यंति मामकाः किं नु दुर्योधनः कृत्यं कर्णः कृत्यं किमब्रवीत दुःशासनः सौबलश्च तेषामेवं गतेष्वपि सर्वेषां समवेतानां पुत्राणां मम संजय यद्वृत्तं तात संग्रामे मंदस्यापनयैर्भृशं लोभानुगतदुर्बुद्धेः क्रोधेन विकृतात्मनः राज्यकामस्य मूढस्य रागोपहतचेतसः दुर्नीतं वा सुनीतं वा तन्ममाचक्ष्व संजय॥ ॥ इति द्रोणपर्वणि जयद्रथवधे संजय उवाच हंत ते संप्रवक्ष्यामि सर्वं प्रत्यक्षदर्शिवान शुश्रूषस्व स्थिरो भूत्वा तवह्यपनयो महान गतोदके सेतुबंधो यादृक्तादृगयं तव विलापो निष्फलो राजन्मा शुचो भरतर्षभ अनतिक्रमणीयोयं कृतांतस्याद्भुतो विधिः मा शुचो भरतश्रेष्ठ दिष्टमेतत्पुरातनं यदि त्वं हि पुरा तात कुंतीपुत्रं युधिष्ठिरं निवर्तयेथाः पुत्रांश्च न त्वां व्यसनमाव्रजेत युद्धकाले पुनः प्राप्ते तदैव भवता यदि निवारिताः स्युः संरब्धा न त्वां व्यसनमाव्रजेत दुर्योधनं चापि

द्रो॰ श्चैयंवध्रीतितातुएयदि कुरुत्वानोऽद्यपिच्छल्लंनत्वांप्रसन्नमावृणेत तेतवुद्धिप्रभीचारमुपलप्स्यंतिपांडवाः पांडवाहत्यमयः सर्वेयेचान्येपिनरा
८३ धिपाः सत्कृत्वापितृकर्म्मेत्वंपुत्रंमेह्यप्रमत्तस्य वध्यंथायदिधर्म्मेणमत्वांप्रसन्नमावृणेत त्वंतुब्राह्मणतमोलोकेहित्वंधर्म्मसनातनः दुर्योधन
स्यकर्णस्यशकुनेश्चात्मनश्चागान्मतं तत्रैवविलपितंसर्वमयाख्यातंनिबोधमितं अर्थंनिविशमानस्यविषमिष्यस्ययामधुनाममतंतत्रराक्षसोराज्ञानेया
द्रवंपुरा नभीष्मेनैवद्रोणेनयथातांममतेच्युतः अजानन्नस्यराज्ञःतुल्यंराजधर्म्मोऽस्यधर्म्मज्ञे तेषाम्प्रतिकृत्यत्वांनतथावद्धममते यत्रैषारण्ये
समानांचपरापार्थानुपश्यसे तस्मात्वंधर्मात्मापुत्राणांराज्यकामुक पितरैवतामहोराज्यमपहृत्यतदानघ अथपार्थैर्जितांकृत्स्नांपृथि
वींप्रसभधर्षयाः पांडुनानिर्जितंराज्यंकौरवाणांयशस्तथा ततश्चाप्यधिकंभूयः पांडवैर्धर्मचारिभिः तेषांतत्तादृशंकर्म्मत्वामासाद्यसुनिष्फलं
यत्सिंचत्वांग्रासिताराज्यंसत्येनाभिषृष्टेन यस्तुनयेयुद्धकालेत्वंपुत्रानगर्हयसर्प बहुधाव्याहरन्दोषान्नतत्त्वय्युपपद्यते नहितेवृत्तिराजानो
युद्धंतीर्णाःपितृतेरणौ चमूभ्रिमायथायथानांयुद्धतेस्वनितेयषभाः यांतुकस्मात्तेनासेनांयासांसक्तिकोरवेः स्केलकौनतायुद्धेचसर्वमम्स्त्र
कौरवैः येषांयोद्धागुणकैरायषामंत्रीजनार्दनः येषांवमासक्तियोह्यये येषांयोद्धाहकौरवः कोहितान्विषहेद्योज्ञंमर्त्यसधर्मोधनुर्द्धरः अत्र
चकौरवेयस्मायेवातेषांपरानुगाः यावद्भुशकातेकर्तुमनुरक्तोजेनाधिपः सत्रधर्मरतैः शूरस्तावत्कुर्वन्तिकौरवाः यथातुपुरुषव्याघ्र
युद्धंपरमसंकटं कुरूणांपांडवैः सार्द्धंतत्सर्वंशृणुतत्वतः ॥ द्रोणपर्व्वणिजयद्रथवधे संजयउवाच तस्मांनिशायांव्युष्टायांद्रोणः शस्त्रभृ
तांवरः स्वान्यनीकानिसर्वाणिप्राक्रामतव्यूहितंततः शूराणांगर्जतांराजन्संक्रुद्धानाममर्षिणां अथतेस्मिन्रथिनाः परस्परवधैषिणां
विस्फार्यचधनूंषिमेमाः परवाणिस्यवस विनिस्त्वसते आक्रोशन्धर्कंदानींसधनंजयः विक्रोशात्स्मस्तनमेस्फुतधारान्मोहितान्पीता
नाकाशंसंकाशानेसानकेचिच्छिक्षिपुः चरंतस्त्विमामागीस्त्रघनमागोत्रशिरक्ष्या संग्राममनसः शूरादृश्यतेस्मसहस्रशः संघंटाश्वं राम॰ ८३

नाविधाः स्वर्णाङ्कविभूषिताः सर्वे स्निग्धगदाश्चापे पर्यस्थं तपाण्डवं अनेकमहोन्मत्ताः परिघैर्बाहुशालिनः चक्रुः संबाधमाक्रा
शमुष्टिं तेऽवज्रोपमैः नानाप्रहरणैश्चान्यैर्विविधैःस्रग्गलंकृताः संग्राममनसः शूरास्तत्रतत्र व्यवस्थिताः द्रोणस्तु नः कसंगाविंदः कवचमाली
इकोरसः क्रान्तैतेम्रु स्ते स्वेषामाक्रम्यं तोरणे तदा ततः शस्त्रमुपाध्यायल रथनवासिनः स्वयं ह्यमत्तत्तत्त्वात्र वचनं द्रोणस्य रतिवेगिता ते
ध्वनीकेषु सैव द्रुष्टि ते ध्वेद्वे नरेषु भारद्वाजो महाराज जयद्रथमथाब्रवीत त्वं चैव सोमदत्तिश्च कर्णश्चैव महारथः अश्वत्थामा च शल्य
श्च वृषसेनः कृपस्तथा शतं चाश्वसहस्राणां रथानामयुतानि षट् द्विरदानां प्रभिन्नानां सहस्राणि चतुर्दश पदातीनां सहस्राणि
दंशितान्येकविंशतिः गव्यूतिषु त्रिमात्रासु मामनासाद्य तिष्ठत तत्रस्थं त्वां न संसक्ताः देवाः सवासवाः किं पुनः पाण्डवाः सर्वे स
माश्वसिहि सैंधव एवमुक्तः समाश्वस्तः सिंधुराजो जयद्रथः संप्रायात्सह गांधारैर्वृतस्तैश्च महारथैः वर्मिभिः सादिभिर्यत्तैः प्रासपाणि
भिरास्थितैः चामरापीडिनः सर्वे जांबूनदविभूषिताः जयद्रथस्य राजेंद्र हयाः साधुप्रवाहिनः सप्तसाहस्राणि त्रिसाहस्राश्च सैंधवाः मत्तानां सुविरू
ढानां हस्त्यारोहैर्विशारदैः नागानां भीमरूपाणां वर्मिणां रौद्रकर्मिणां अध्यर्द्धेन सहस्रेण पुत्रो दुर्मर्षणस्तव अग्रतः सर्वसैन्यानाम
ग्रमानीके व्यवस्थितः ततो दुःशासनश्च विकर्णश्च तवात्मजौ सिंधुराजार्थसिद्ध्यर्थमग्रानीकमवस्थितौ दीर्घो द्वादशगव्यूतिः पश्चा
र्द्धे पंचविस्तृतः व्यूहः सचक्रशकटो भारद्वाजेन निर्मितः नानानृपतिभिर्वीरैस्तत्रतत्र व्यवस्थितैः रथाश्वगजपत्त्योघैर्द्रोणेन विहितः स्व
यं पश्चार्द्धे तस्य पद्मस्य गर्भव्यूहः सुदुर्भिदः सूचीपद्मस्य गर्भस्थो गूढो व्यूहः कृतः पुनः एवमेतं महाव्यूहं व्यूह्य द्रोणो व्यवस्थितः सूची
मुखे महेष्वासः कृतवर्मा व्यवस्थितः अनंतरं च कांबोजो जलसंधश्च मारिष दुर्योधनश्च कर्णश्च तदनंतरमेव च ततः शतसहस्राणि
योधानामनिवर्तिनां व्यवस्थितानि सर्वाणि शकटे सुखरक्षणे तेषां च पृष्ठतो राजा बलेन महता वृतः जयद्रथस्ततो राजा सूचीपा

पाहिनः तैवेव १

द्रो० ८४

मे अवस्थितः शकटस्य तु राजेंद्र भारद्वाजो मुखे स्थितः अनु तस्याभवद्भोजो गोपायंस्तं स्वयं ततः श्वेतवर्मांबरोष्णीषो व्यूढोरस्को महाभु
जः धनुर्विस्फारयन्द्रोणस्तस्थौ क्रुद्ध इवांतकः पताकिनं शोणहयं वेदीकृष्णाजिनध्वजं द्रोणस्य रथमालोक्य प्रहृष्टाः कुरवोऽभवन्
सिद्धचारणसंघानां विस्मयः सुमहानभूत् द्रोणेन विहितं दृष्ट्वा व्यूहं क्षुब्धार्णवोपमं सशैलसागरवनां नानाजनपदाकुलां ग्रसे
द्व्यूहः क्षितिं सर्वामिति भूतानि मेनिरे बहुरथमनुजाश्वपत्तिनागं प्रतिभयनिःस्वनमद्भुतानुरूपं अहितहृदयभेदनं महद्धि शकटमवे
क्ष्य कृतं ननंद राजा॥ ॥ इति द्रोणपर्वणि जयद्रथवधे संजय उवाच ततो व्यूढेष्वनीकेषु समुत्क्रुष्टेषु मारिष ताड्यमानासु भेरीषु मृदं
गेषु नदत्सु च अनीकानां च संह्रादे वादित्राणां च निःस्वने प्रध्मापितेषु शंखेषु संनादे लोमहर्षणे अभिहारयत्सु शनकैर्भरतेषु युयु
त्सुषु रौद्रे मुहूर्ते संप्राप्ते सव्यसाची व्यदृश्यत बलानां वायसानां च पुरस्तात्सव्यसाचिनः बहुलानि सहस्राणि प्राक्रीडंस्तत्र भारत
मृगाश्च घोरसंनादाः शिवाश्चाशिवदर्शनाः दक्षिणेन प्रयातानामस्माकं प्राणदंस्तथा सनिर्घाताः ज्वलंत्यश्च पेतुरुल्काः सहस्र
शः चचाल च मही कृत्स्ना भये घोरे समुत्थिते विष्वग्वाताः सनिर्घाता रूक्षाः शर्करकर्षिणः ववुरायाति कौंतेये संग्रामे समुपस्थिते ना
कुलिश्च शतानीको धृष्टद्युम्नश्च पार्षतः पांडवानामनीकानि प्राज्ञौ तौ व्यूहतुस्तदा ततो रथसहस्रेण द्विरदानां शतेन च त्रिभिरश्वस
हस्रैश्च पदातीनां शतैः शतैः अध्यर्धमात्रे धनुषां सहस्रे तनयस्तव अग्रतः सर्वसैन्यानां स्थित्वा दुर्मर्षणोऽब्रवीत् अद्य गांडीवधन्वानं
तपंतं युद्धदुर्मदं अहमावारयिष्यामि वेलेव मकरालयं अद्य पश्यंतु संग्रामे धनंजयममर्षणं विषक्तं मयि दुर्धर्षमश्मकूटमिवाश्मनि
तिष्ठध्वं रथिनो यूयं संग्राममभिकांक्षिणः युध्यामि संहतानेतान्यशो मानं च वर्धयन् एवं ब्रुवन्महाराज महात्मा सुमहामतिः महेष्वासै
र्वृतो राजन्महेष्वासो व्यवस्थितः ततोंतक इव क्रुद्धः सवज्र इव वासवः दंडपाणिरिवासह्यो मृत्युः कालेन चोदितः शूलपाणिरिवाक्षो

राम
८४

म्रोवस्ता: पाशवानिव युगांताग्निरिवार्चिष्मानभवस्ते पुन: प्रजा: क्रोधामर्षबलोद्भूतो निवातकवचांतक: जयोजितास्थित: सत्यसंगर:पि
धन्मरायतं आमुक्तकवच: खड्गी जांबूनदकिरीटभृत् शुभ्रमाल्यांबरधर: स्वंगदी रुक्कुंडल: रथप्रवरमास्थाय नरो नारायणानुग: विधु
न्वन् गांडीवं संख्ये भ्राजतः सूर्य इवोदित: सोग्रानीकस्य महत इषुपाते धनंजय: व्यवस्थाप्य रथं राजन् शंखं दध्मौ प्रतापवान् अथ कृष्णोप्यसंभ्रांत:
पार्थेन सह मारिष प्राध्मापयत् पांचजन्यं शंखप्रवरमोजसा तयो: शंखप्रणादेन तव सैन्यं विशांपते आसीत् संहृष्टरोमाणः कंपिता गतचेत
स: यथा त्रस्यंति भूतानि सर्वाण्यशनिनिस्वनात् तथा शंखप्रणादेन वित्रेसुस्तव सैनिका: प्रसुस्रुवु: शकृन्मूत्रं वाहनानि च सर्वश: एवं स
वाहनं सर्वमाविग्नमभवद्बलं सीदंति स्म नरा राजन् शंखशब्देन मारिष विसंज्ञाश्चाभवन् केचित् केचिद्राजन् वितत्रसु: तत: कपिर्महानाद
महाभूतैर्ध्वजालयै: अकरोद्व्यादितास्यश्च भीषयंस्तव सैनिकान् तत: शंखाश्च भेर्यश्च मृदंगाश्चानकै: सह पुनरेवाभ्यहन्यंत तव
सैन्यप्रहर्षणा: नानावादित्रसंह्रादै: क्ष्वेडितास्फोटिताकुलै: सिंहनादै: समुत्कृष्टै: समाहूतैर्महारथै: तस्मिंस्तु तुमुले शब्दे भी
रूणां भयवर्द्धने अतीव हृष्टो दाशार्हमब्रवीत्पाकशासनि: ।। द्रोणपर्वणि जयद्रथवधे अर्जुन उवाच चोदयाश्वान् हृषीकेश यत्र
दुर्मर्षण: स्थित: एतद्भित्वा गजानीकं प्रवेक्ष्याम्यरिवाहिनीं संजय उवाच एवमुक्तो महाबाहु: केशव: सव्यसाचिना अचोदयद्ध
यांस्तत्र यत्र दुर्मर्षण: स्थित: स संप्रहारस्तुमुल: संप्रवृत्त: सुदारुण: एकस्य च बहूनां च रथनागनरक्षय: तत: सायकवर्षेण
पर्जन्य इव वृष्टिमान् परानवाकिरत्पार्थ: पर्वतानिव नीरद: तेचापि रथिन: सर्वे त्वरिता: कृतहस्तवत् अवाकिरन् बाणजालैस्तत:
कृष्णधनंजयौ तत: क्रुद्धो महाबाहुर्वार्यमाण: परैर्युधि शिरांसि रथिनां पार्थ: कायेभ्योपाहरच्छरै: उद्भ्रांतनयनैर्वक्त्रै: संदष्टौष्ठ
पुटै: शुभै: सकुंडलशिरस्त्राणैर्वसुधा समकीर्यत पुंडरीकवनानीव विध्वस्तानि समंतत: विनिकीर्णानि योधानां वदनानि चकाशि

द्रो
८५

रे तपनीयतनुत्राणाः संसिक्ता रुधिरेण च संसक्ता इव दृश्यन्ते मेघसंघाः सविद्युतः शिरसां पततां राज्ञां शब्दोऽभूद्वसुधातले कालेन परिपक्वा-
नां तालानां पततामिव ततः कबंधं किंचित्तु धनुरालंब्य तिष्ठति किंचित्खड्गं विनिष्कृष्य भुजेनोद्यम्य तिष्ठति पतितानि न जानन्ति शिरांसि पुरु-
षर्षभाः अमृष्यमाणाः संग्रामे कौन्तेयं नापराजिताः हयानामुत्तमांगैश्च हस्तिहस्तैश्च मेदिनी बाहुभिश्च शिरोभिश्च वीराणां समकीर्यत अयं
पार्थः कुतः पार्थ एष पार्थ इति प्रभो त्वदीयेषु योधानां पार्थभूतमिवाभवत् अन्योन्यमपि चाजघ्नुरात्मानमपि चापरे पार्थभूतममन्यन्त
गत्कालेन मोहिताः निष्टनंतः सरुधिरा विसंज्ञा गाढवेदनाः शयाना बहवो वीराः कीर्तयंतः सबांधवान् सभिंदिपालाः सप्रासाः सश-
क्त्यृष्टिपरश्वधाः सनिर्व्यूहाः सनिस्त्रिंशाः सशरासनतोमराः सबाणवर्माभरणाः सगदाः सांगदा रणे महाभुजगसंकाशा बाहवः
परिघोपमाः उद्वेष्टंति विचेष्टंति संवेष्टंति च सर्वशः वेगं कुर्वंति संरब्धाः निकृत्ताः परमेषुभिः यो यः स्म समरे पार्थं प्रतिसंरभ-
ते नरः तस्य तस्यांतको बाणाः शरीरमुपसर्पति नृत्यतो रथमार्गेषु धनुर्व्यायच्छतस्तथा न कश्चित्तत्र पार्थस्य ददृशेंतरमण्वपि यत्तस्य ८६
घटमानस्य क्षिप्रं विक्षिपतः शरान् लाघवात्पांडुपुत्रस्य व्यस्मयंत परे जनाः हस्तिनं हस्तियंतारमश्वमाश्विकमेव च अभिनत्फाल्गुनो
बाणैः रथिनं च ससारथिं आवर्तमानमावृत्तं युध्यमानं च पांडवः प्रमुखे तिष्ठमानं च किंचिन्न निहंति सः यथोदयन्वै गगने सूर्यो हंति महत्
तमः तथार्जुनो गजानीकमवधीत्कंकपत्रिभिः हस्तिभिः पतितैर्भिन्नैस्तावकं सैन्यमदृश्यत अंतकाले यथा भूमिर्विकीर्णा महीधरैः
यथा मध्यंदिने सूर्यो दुष्प्रेक्ष्यः प्राणिभिः सदा तथा धनंजयः क्रुद्धो दुष्प्रेक्ष्यो युधि शत्रुभिः तत्तथा तव पुत्रस्य सैन्यं युधि परंतप प्रभग्नं ७०
द्रुतमाविग्नमतीव शरपीडितं मारुतेनेव महता मेघानीकं विसार्यत प्रकाल्यमानं तत्सैन्यं नाशकत्प्रतिवीक्षितुं प्रतोदैश्चापकोटीभि ७५

हुंकारैः साधुवादितैः कशापार्ष्ण्यभिघातैश्च वाग्भिरुग्राभिरेव च चोदयंतो हयांस्तूर्णं पलायंते स्म तावकाः सादिनो रथिनश्चैव पत्तयश्चार्जुनार्दिताः
पार्ष्ण्यंगुष्ठांकुशैर्नागं चोदयंतस्तथापरे शरैः संमोहिताश्चान्ये तमेवाभिमुखा ययुः तव योधा हतोत्साहा विभ्रांतमनसस्तदा ॥ ॥ इति द्रोणपर्व
णि जयद्रथवधे धृतराष्ट्र उवाच तस्मिन्प्रभग्ने सैन्याग्रे वध्यमाने किरीटिना के नु तत्र रणे वीराः प्रत्युद्ययुर्धनंजयं आहोस्विच्छकटव्यूहं प्रविष्टा मो
घनिश्चयाः द्रोणमाश्रित्य तिष्ठंत प्राकारमकुतोभयं संजय उवाच तथार्जुनेन संभग्ने तस्मिन्सैन्ये तदानघ हतवीरे हतोत्साहे पलायनकृ
तक्षणे पाकशासनिनाभीक्ष्णं वध्यमाने शरोत्तमैः न तत्र कश्चित्संग्रामे शशाकार्जुनमीक्षितुं ततस्तव सुतो राजन्दृष्ट्वा सैन्यं तथागतं
दुःशासनो भृशं क्रुद्धो युद्धायार्जुनमभ्यगात् स कांचनविचित्रेण कवचेन समावृतः जांबूनदशिरस्त्राणः शूरस्तीव्रपराक्रमः नागा
नीकेन महता ग्रसन्निव महीमिमां दुःशासनो महाराज सव्यसाचिनमावृणोत् ह्रादेन गजघंटानां शंखानां निनदेन च ज्याक्षेपनिनदैश्चै
व विरावेण च दंतिनां भूर्दिशश्चांतरिक्षं च शब्देनासीत्समावृतं स मुहूर्तं प्रतिभयो दारुणः समपद्यत तान्दृष्ट्वा पततस्तूर्णमंकुशैर
भिचोदितान् व्यालंबहस्तान्संरब्धान्सपक्षानिव पर्वतान् सिंहनादेन महता नरसिंहो धनंजयः गजानीकममित्राणामभितो व्य
धमच्छरैः महोर्मिणमिवोद्धूतं श्वसनेन महार्णवं किरीटी तद्गजानीकं प्राविशन्मकरो यथा काष्ठातीत इवादित्यः प्रतपन्युगसंक्षये
ददृशे दिक्षु सर्वासु पार्थः परपुरंजयः खुरशब्देन चाश्वानां नेमिघोषेण तेन च तेन चोत्क्रुष्टशब्देन ज्यानिनादेन तेन च नानावादित्रशब्दे
न पांचजन्यस्वनेन च देवदत्तस्य घोषेण गांडीवनिनदेन च मंदवेगा नरा नागा बभूवुस्ते विचेतसः शरैराशीविषस्पर्शैर्निर्भिन्नाः सव्य
साचिना ते गजा विशिखैस्तीक्ष्णैर्युधि गांडीवचोदितैः अनेकशतसाहस्रैः सर्वांगेषु समर्पिताः आरावं परमं कृत्वा वध्यमानाः किरीटिना

५

तां२

द्रो० निपेतुर्निहता भूमौ छिन्नपक्षा इवाद्रयः अपरे दंतवेष्टेषु कुंभेषु कटेषु च शरैः समर्पिता नागाः क्रौंचवद्व्यनदन्मुहुः गजस्कंधगतानां च
८६ पुरुषाणां किरीटिना छिद्यंते चोत्तमांगानि भल्लैः सन्नतपर्वभिः सकुंडलानां पततां शिरसां धरणीतले पद्मानामिव संघातैः पार्थश्चक्रे नि
वेदनं यंत्रबद्धा विकवचा व्रणार्ता रुधिरोक्षिताः भ्रमत्सु युधि नागेषु मनुष्या विललंबिरे केचिदेकेन बाणेन सुमुक्तेन पतत्रिणा द्वौ त्रयश्च
विनिर्भिन्ना निपेतुर्धरणीतले अतिविद्धाश्च नाराचैर्वमंतो रुधिरं मुखैः सारोहा न्यपतन्भूमौ द्रुमवंत इवाचलाः मौर्वीं ध्वजं धनुश्चैव युगमी
षां तथैव च रथिनां कुट्टयामास भल्लैः सन्नतपर्वभिः न संदधन्न चाकर्षन्न विमुंचन्न चोद्वहन् मंडलेनैव धनुषा नृत्यन्पार्थः स्म दृश्यते अ
तिविद्धाश्च नाराचैर्वमंतो रुधिरं मुखैः मुहूर्तान्न्यपतन्नन्ये वारणा वसुधातले उत्थितान्यगणेयानि कबंधानि समंततः अदृश्यंत महाराज
तस्मिन्परमसंकुले सचापाः सांगुलित्राणाः सखड्गाः सांगदा रणे अदृश्यंत भुजाश्छिन्ना हेमाभरणभूषिताः सूपस्करैरधिष्ठा
नैरीषादंडकबंधुरैः चक्रैर्विमथितैरक्षैर्भग्नैश्च बहुधा युगैः चर्मचापधरैश्चैव व्यवकीर्णैस्ततस्ततः स्रग्भिराभरणैर्वस्त्रैः पतितैश्च महा
ध्वजैः निहतैर्वारणैरश्वैः क्षत्रियैश्च निपातितैः अदृश्यत मही तत्र दारुणप्रतिदर्शना एवं दुःशासनबलं वध्यमानं किरीटिना संप्रा
द्रवन्महाराज व्यथितं सहनायकं ततो दुःशासनस्त्रस्तः सहानीकः शरार्दितः द्रोणं त्रातारमाकांक्षन्शकटव्यूहमभ्यगात् ॥ ॥
इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधे ॥ ॥ संजय उवाच दुःशासनबलं हत्वा सव्यसाची महारथः सिंधुराजं परीप्सन्वै द्रोणानी
कमुपाद्रवत् स तु द्रोणं समासाद्य व्यूहस्य प्रमुखे स्थितं कृतांजलिरिदं वाक्यं कृष्णस्यानुमतेऽब्रवीत् शिवेन ध्याहि मां ब्रह्मन्स्वस्ति
चैव वदस्व मे भवत्प्रसादादिच्छामि प्रवेष्टुं दुर्भिदां चमूं भवान्पितृसमो मह्यं धर्मराजसमोऽपि च तथा कृष्णसमश्चैव सत्यमेतद्ब्रवीमि ते राम०
८६

अमर्षी श्रीमान् यथा तात रुक्मिणेयस्त्वयानघ तथाहमपि ते रक्ष्यः सर्ववद्दिग्गमतम तवप्रसादाद्दिग्धुर्यमिंधुराजानमाहवे निहंतुं द्विषतां श्रेष्ठ
प्रतिज्ञां रक्षमे प्रभो संजय उवाच एवमुक्तस्तदाचार्यः प्रत्युवाच स्मयन्निव मामजित्वा न बीभत्सो शक्यो जेतुं जयद्रथः एतावदुक्त्वा तं द्रोणः शर
व्रातैरवाकिरत् [illegible] तीक्ष्णैः प्रहसन्वै ससारथिं ततोऽर्जुनः शरव्रातान्द्रोणस्यावार्य सायकैः द्रोणमभ्यद्रवद्बाणैर्घोररूपैर्महत्त
रैः विव्याध च रणे द्रोणमनुमान्य विशांपते क्षत्रधर्मं समास्थाय नवभिः सायकैः पुनः तस्येषूनिषुभिश्छित्वा द्रोणो विव्याध तावुभौ विषा
ग्निज्वलितप्रख्यैरिषुभिः कृष्णपांडवौ इयेष पांडवस्तस्य बाणैश्छेत्तुं शरासनं तस्य चिंतयतस्त्वेवं फाल्गुनस्य महात्मनः द्रोणः शरै
रसंभ्रांतो ज्यां चिच्छेदाशु वीर्यवान विव्याध च हयानस्य ध्वजं सारथिमेव च अर्जुनं च शरैर्वीरः स्मयमानोऽभ्यवाकिरत् एतस्मिन्नंतरे पा
र्थः सज्यं कृत्वा महद्धनुः विशेषयिष्यन्नाचार्यं सर्वास्त्रविदुषां वरः मुमोच षट्शतान्बाणान्गृहीत्वैकमिवद्रुतं पुनः सप्तशता
न्यान्सहस्रं चानिवर्तिनां विसृजायुतशश्चान्यांस्तेऽघ्नन्द्रोणस्य तां चमूं तैः सम्यगस्तैर्बलिना कृतिना चित्रयोधिना मनुष्यवाजि
मातंगा विद्धाः पेतुर्गतासवः विसूताश्वध्वजाः पेतुः संछिन्नायुधजीविताः रथिनो रथमुख्येभ्यः सहसा शरपीडिताः चूर्णिताक्षिप्तद
ग्धानां वज्रानिलहुताशनैः तुल्यरूपा गजाः पेतुर्गिर्यग्राम्बुदवेश्मनां पेतुरश्वसहस्राणि प्रहतान्यर्जुनेषुभिः हंसा हिमवतः पृष्ठे वारिवि
प्रहता इव रथाश्वद्विपपत्त्योघाः सलिलौघा इवाद्भुताः युगांतादित्यरश्म्याभैः पांडवास्त्रशरैर्हताः तं पांडवादित्यशरांशुजालं कुरु
प्रवीरान्युधि निष्टपंतं स द्रोणमेघः शरवृष्टिवेगैः प्राच्छादयन्मेघ इवार्करश्मीन् अथात्यर्थं विसृष्टेन द्विषतामसुभोजिना आज
घ्ने वक्षसि द्रोणो नाराचेन धनंजयं स विह्वलितस [illegible]

९

द्रो० ९ वेगः क्षितिकंपे यथाचलः धैर्यमालंब्य बीभत्सुर्द्रोणं विव्याध पत्रिभिः द्रोणस्तु पंचभिर्बाणैर्वासुदेवमताडयत अर्जुनं च त्रिसप्तत्या
ध्वजं चास्य त्रिभिः शरैः विशेषयिष्यन्शिष्यं च द्रोणो राजन्पराक्रमी अदृश्यमर्जुनं चक्रे निमिषाच्छरवृष्टिभिः प्रसक्तान्पततो द्राक्ष्म भार
द्वाजस्य सायकान् मंडलीकृतमेवास्य धनुश्चादृश्यताद्भुतं तेभ्ययुः समरे राजन्वासुदेवधनंजयौ द्रोणसृष्टाः सुबहवः कंकपत्रपरि
च्छदाः तद्दृष्ट्वा तादृशं युद्धं द्रोणपांडवयोस्तदा वासुदेवो महाबुद्धिः कार्यवत्तामचिंतयत् ततोब्रवीद्वासुदेवो धनंजयमिदं वचः पार्थ पार्थ म
हाबाहो न नः कालात्ययो भवेत् द्रोणमुत्सृज्य गच्छामः कृत्यमेतन्महत्तरं पार्थश्चाप्यब्रवीत्कृष्णं यथेष्टमिति केशवं ततः प्रदक्षिणं कृ
त्वा द्रोणं प्रायान्महाभुजः परिवृत्तश्च बीभत्सुरगच्छद्विसृजञ्छरान् ततोब्रवीत्स्वयं द्रोणः क्वेदं पांडव गम्यते ननु नाम रणे शत्रुमजित्वा न नि
वर्तसे अर्जुन उवाच गुरुर्भवान्न मे शत्रुः शिष्यः पुत्रसमोस्मि ते न चास्ति स पुमाँल्लोके यस्त्वां युधि पराजयेत् संजय उ० एवं ब्रुवाणो
बीभत्सुर्जयद्रथवधोत्सुकः त्वरायुक्तो महाबाहुस्त्वत्सैन्यं समुपाद्रवत् तं चक्ररक्षौ पांचाल्यौ युधामन्यूत्तमौजसौ अन्वयातां महात्मानौ विवि
शंतं तावकं बलं ततो जयो महाराज कृतवर्मा च सात्वतः कांबोजश्च श्रुतायुश्च धनंजयमवारयन् तेषां दश सहस्राणि रथानामनुया
यिनां अभीषाहाः शूरसेनाः शिबयोथ वसातयः मावेल्लकाः ललित्थाश्च केकया मद्रकास्तथा नारायणाश्च गोपालाः कांबोजानां
च ये गणाः कर्णेन विजिताः पूर्वं संग्रामे शूरसंमताः भारद्वाजं पुरस्कृत्य सहृष्टात्मानोर्जुनं प्रति पुत्रशोकाभिसंतप्तं क्रुद्धं मृत्युमिवांत
कं त्यजंतं तुमुले प्राणान्सन्नद्धं चित्रयोधिनं गाहमानमनीकानि मातंगमिव यूथपं महेष्वासं पराक्रांतं नरव्याघ्रमवारयन् ततः प्रव
वृते युद्धं तुमुलं लोमहर्षणं अन्योन्यं वै प्रार्थयतां योधानामर्जुनस्य च जयद्रथवधप्रेप्सुमायांतं पुरुषर्षभं न्यवारयंत सहिताः राम० ९

क्रियार्धिमिवोछितं॥ ॥ इतिद्रोणपर्वणिजयद्रथवधे॥ ॥ संजयउवाच संनिरुद्धस्तुतैः पार्थोमहाबलपराक्रमः द्रुतंस
मनुयातश्चद्रोणेनरथिनांवरः किरन्निषुगणांस्तीक्ष्णान्सरश्मीनिवभास्करः तापयामासतत्सैन्यंदेहंव्याधिगणोयथा अश्वोवि
द्धोरथश्छिन्नः सारोहः पतितोगजः छत्राणिचापविद्धानिरथाश्चक्रैर्विनाकृताः विद्रुतानिचसैन्यानिशरार्तानिसमंततः इ
त्यासीत्तुमुलंयुद्धंनप्राज्ञायतकिंचन तेषांसंयच्छतांसंख्येपरस्परमजिह्मगैः अर्जुनोध्वजिनींराजन्नभीक्ष्णंसमकंपयत् सत्यांचि
कीर्षमाणस्तुप्रतिज्ञांसत्यसंगरः अभ्यद्रवद्रथश्रेष्ठंशोणाश्वंश्वेतवाहनः तंद्रोणःपंचविंशत्यामर्मभिद्भिरजिह्मगैः अंतेवासि
नमाचार्योमहेष्वासंसमार्पयत् तंतूर्णमिवबीभत्सुःसर्वशस्त्रभृतांवरः अभ्यधावदिषून्स्यन्निषुवेगविघातकान् तस्याशुक्षि
प्तान्भल्लान्भल्लैःसंनतपर्वभिः प्रत्यविध्यदमेयात्माब्रह्मास्त्रंसमुदीरयन् तदद्भुतमपश्यामद्रोणस्याचार्यकंयुधि यतमानोयुवानै
नंप्रत्यविध्यद्यदर्जुनः क्षरन्निवमहामेघोवारिधाराःसहस्रशः द्रोणमेघःपार्थशैलंववर्षशरवृष्टिभिः अर्जुनःशरवर्षंतद्ब्रह्मास्त्रे
णैवमारिष प्रतिजग्राहतेजस्वीबाणैर्बाणान्विशातयन् द्रोणस्तुपंचविंशत्याश्वेतवाहनमार्दयत् वासुदेवंचसप्तत्याबाह्वोरुरसि
चाशुगैः पार्थस्तुप्रहसन्धीमानाचार्यंशरौघिणं विसृजंतंशितान्बाणानवारयततंयुधि अथतौवध्यमानौतुद्रोणेनरथस
त्तमौ आ वर्जयेतांदुर्धर्षंयुगांताग्निमिवोछितं वर्जयन्निशितान्बाणान्द्रोणचापविनिःसृतान् किरीटमाली
कौंतेयोभोजानीकंव्यशातयत् सोंतराकृतवर्माणंकांबोजंचसुदक्षिणं अभ्ययाद्वर्जयन्द्रोणंमैनाकमिवपर्वतं ततोभोजो

द्रो॰

८८ नरव्याघ्रौ दुर्द्धर्षं कुरुसत्तमं । अविध्यत्तूर्णमव्यग्रो दशभिः कंकपत्रिभिः । तमर्ज्जुनः शतेनाजौ राजन्विव्याध पत्रिणा । पुनश्चान्यैस्त्रिभि
र्बाणैर्मोहयन्निव मातुलं । भोजस्तमहसत्पार्थं वासुदेवं च माधवं । एकैकं पंचविंशत्या सायकानां समार्पयत् । तस्यार्ज्जुनो धनुश्छित्वा विव्या
धैनं त्रिसप्तभिः । शरैरग्निशिखाकारैः क्रुद्धाशीविषसंनिभैः । अथान्यद्धनुरादाय कृतवर्म्मा महारथः । पंचभिः सायकैस्तूर्णं विव्याधोर
सि भारत । पुनश्च निशितैर्बाणैः पार्थं विव्याध पंचभिः । तं पार्थो नवभिर्बाणैराजघान स्तनांतरे । दृष्ट्वा विषक्तं कौंतेयं कृतवर्म्मरथं प्रति । चिं
तयामास वार्ष्णेयो न नः कालात्ययो भवेत् । ततः कृष्णोऽब्रवीत्पार्थं कृतवर्म्मणि मा दयां । कुरु संबंधकं कृत्वा प्रमथ्यैनं विशांपते । ततः
स कृतवर्म्माणं मोहयित्वार्ज्जुनः शरैः । अभ्यगाज्जवनैरश्वैः कांबोजानामनीकिनीं । अमर्षितस्तु हार्द्दिक्यः प्रविष्टे श्वेतवाहने । विधुन्व
न्सशरं चापं पांचाल्याभ्यां समागतः । चक्ररक्षौ तु पांचाल्यावर्ज्जुनस्य पदानुगौ । पर्यवारयदायांतौ कृतवर्म्मा रथेषुभिः । तावविध्यत्ततो भो
जः कृतवर्म्मा शितैः शरैः । त्रिभिरेव युधामन्युं चतुर्भिश्चोत्तमौजसं । तावप्येनं विविधतुर्दशभिर्दशभिः शरैः । त्रिभिरेव युधामन्युरुत्तमौजा
स्त्रिभिस्तथा । संचिच्छिदतुरप्यस्य ध्वजं कार्म्मुकमेव च । अथान्यद्धनुरादाय हार्द्दिक्यः क्रोधमूर्छितः । कृत्वा विधनुषौ वीरौ शरवर्षैरवाकि
रत् । तावन्ये धनुषी सज्ये कृत्वा भोजं विजघ्नतुः । तेनांतरेण बीभत्सुर्विवेशामित्रवाहिनीं । न लेभाते तु तौ द्वारं वारितौ कृतवर्म्मणा । धा
र्त्तराष्ट्रेष्वनीकेषु पतमानौ नरर्षभौ । अनीकान्यर्द्दयन्युद्धे त्वरितः श्वेतवाहनः । नावधीत्कृतवर्म्माणं प्राप्तमप्यरिसूदनः । तं दृष्ट्वा तु
तथा यांतं शूरो राजा श्रुतायुधः । अभ्यद्रवत्सुसंक्रुद्धो विधुन्वानो महद्धनुः । स पार्थं त्रिभिरानर्छत्सप्तत्या च जनार्द्दनं । क्षुरप्रेणासुती— एम॰

रामी ८८

नपार्थमेकं समयातयत् ततोर्ज्जुनो नवत्या तु शराणां नतपर्वणां आजघान भृशं क्रुद्धस्तोत्रैरिव महाद्विपं स तन्न ममृषे राजन् पांडवस्य
च विक्रमं अथैनं सप्तसप्तत्या नाराचानां समार्पयत् तस्यार्ज्जुनो धनुश्छित्वा शरावापं निकृत्य च आजघानोरसि क्रुद्धः सप्तभिर्नतपर्वभिः
अथान्यद्धनुरादाय स राजा क्रोधमूर्छितः वासविं नवभिर्वाणैर्बाह्वोरुरसि चार्पयत् ततोर्ज्जुनः स्मयन्नेव श्रुतायुधमरिंदमः शरैरनेक
साहस्रैः पीडयामास भारत अश्वांश्चास्यावधीत्तूर्णं सारथिं च महारथः विव्याध चैनं सप्तत्या नाराचानां महाबलः हताश्वं रथमुत्सृज्य स
तु राजा श्रुतायुधः अभ्यद्रवद्रणे पार्थं गदामुद्यम्य वीर्यवान् वरुणस्यात्मजो वीरः स तु राजा श्रुतायुधः पर्णाशा जननी यस्य शीततोया
महानदी तस्य माताब्रवीद्राजन् वरुणं पुत्रकारणात् अवध्योयं भवेल्लोके शत्रूणां तनयो मम वरुणस्त्वब्रवीत्प्रीतो ददाम्यस्मै वरं
हितं दिव्यमस्त्रं सुतस्तेयं येनावध्यो भविष्यति नास्ति चाप्यमरत्वं वै मनुष्यस्य कथंचन सर्वेणावश्यमर्तव्यं जातेन सरितां वरे दुर्द्ध
र्षस्त्वेष शत्रूणां रणेषु भविता सदा अस्त्रस्यास्य प्रभावाद्वै व्येतु ते मानसो ज्वरः इत्युक्त्वा वरुणः प्रादाद्गदां मंत्रपुरस्कृतां यामासा
द्य दुराधर्षः सर्वलोके श्रुतायुधः उवाच चैनं भगवान् पुनरेव जलेश्वरः अयुध्यति न मोक्तव्या सा त्वय्येव पतेदिति हन्यादेषा प्रतीपं हि प्र
योक्तारमपि प्रभो न चाकरोत्स तद्वाक्यं प्राप्ते काले श्रुतायुधः स तया वीरघातिन्या जनार्दनमताडयत् प्रतिजग्राह तां कृष्णः पीनेनां
सेन वीर्यवान् नाकंपयत शौरिं सा विंध्यं गिरिमिवानिलः प्रत्युद्याता तमेवैषा कृत्येव दुरधिष्ठिता जघान चास्थितं वीरं श्रुतायुधममर्षणं
हत्वा श्रुतायुधमरिंदमं अयुध्यमानाय ततः केशवाय नराधिप क्षिप्ता श्रुतायुधेनाथ तस्मात्तमवधीद्गदा यथोक्तं वरुणेनाजौ
तथा स निधनं गतः व्यसुश्चाप्यपतद्भूमौ प्रेक्षतां सर्वधन्विनां पतमानस्तु स बभौ पर्णाशायाः प्रियः सुतः संभग्न इव वातेन बहुशाखो
वीनं धरणीमन्वपद्यत् गदां निवर्तितां दृष्ट्वा निहतं च श्रुतायुधं हाहाकारो महांस्तत्र सैन्यानां समजायत स्वेनास्त्रेण हतं दृष्ट्वा श्रुतायुधं

वनस्पतिः ततः सर्वाणि सैन्यानि सेनामुख्याश्च सर्वशः प्राद्रवंत हतं दृष्ट्वा श्रुतायुधमरिंदमः ततः कांबोजराजस्य पुत्रः शूरः सुदक्षिणः
अभ्ययाज्जवनैरश्वैः फाल्गुनं शत्रुकर्शनं तस्य पार्थः शरान्सप्त प्रेषयामास भारत ते तं शूरं विनिर्भिद्य प्राविशन्धरणीतलं सोतिविद्धः शरै
स्तीक्ष्णैर्गांडीवप्रेषितैर्मृधे अर्जुनं प्रतिविव्याध दशभिः कंकपत्रिभिः वासुदेवं त्रिभिर्विद्ध्वा पुनः पार्थं च पंचभिः तस्य पार्थो धनुश्छित्वा
केतुं चिच्छेद मारिष भल्लाभ्यां भृशतीक्ष्णाभ्यां तं च विव्याध पांडवः स तु पार्थं त्रिभिर्विद्ध्वा सिंहनादमथानदत् सर्वपारशवीं चैव शक्तिं शूरः
सुदक्षिणः सघंटां प्राहिणोद्घोरां क्रुद्धो गांडीवधन्वने सा ज्वलंती महोल्केव तमासाद्य महारथं सविस्फुलिंगा निर्भिद्य निपपात महीतले
तं च तूर्णं दशभिः पार्थो नाराचैः कंकपत्रिभिः साश्वसूतधनुः सत्वं विव्याधामितविक्रमः रथं चास्य सुबहुभिश्चक्रे विशकलं शरैः सुद
क्षिणं तु कांबोजममोघसंकल्पविक्रमं विभिद्य हृदि बाणेन पृथुधारेण पांडवः स भिन्नमर्मा स्रस्तांगः प्रभ्रष्टमुकुटांगदः पपाताभिमुखः
शूरो यंत्रमुक्त इव ध्वजः गिरेः शिखरजः श्रीमान्सुशाखः सुप्रतिष्ठितः निर्भग्न इव वातेन कर्णिकारो हिमात्यये शेते स्म निहतो भूमौ कांबो
जास्तरणोचितः महार्हाभरणोपेतः सानुमानिव पर्वतः सुदर्शनीयस्ताम्राक्षः कर्णिना स सुदक्षिणः पुत्रः कांबोजराजस्य पार्थे
न विनिपातितः धारयन्नग्निसंकाशां शिरसा कांचनीं स्रजं अशोभत महाबाहुर्व्यसुर्भूमौ निपातितः ततः सर्वाणि सैन्यानि व्यद्रवंत स
तस्मिन्हते श्रुतायुधं दृष्ट्वा कांबोजं च सुदक्षिणं द्रोणपर्वणि जयद्रथवधे ॥ ॥ संजय उवाच हते सुदक्षिणे राजन्वीरे चैव श्रुतायुधे
जवेनाभ्यद्रवन्पार्थं कुपिताः सैनिकास्तव अभीषाहाः शूरसेनाः शिबयोथ वसातयः अभ्यवर्षंस्ततो राजन्शरवर्षैर्धनंजयं तेषां ष
ष्टिशतानश्वानप्रमथ्नात्पांडवः शरैः ते स्म भीताः पलायंत व्याघ्रात्क्षुद्रमृगा इव ते निवृत्ताः पुनः पार्थं सर्वतः पर्यवारयन् रणे सपत्ना

न्निघ्नंतन्निगांडीवंतंपरान्युधि तेषामापततांतूर्णंगांडीवप्रेषितैः शरैः शिरांसिपातयामासवाहूंश्चापिधनंजयः शिरोभिः पतितैस
स्तत्रभूमिरासीन्निरंतरा अभ्रछायेवचैवासीत्ध्वांक्षगृध्रवलैर्युधि तेषुतूत्साद्यमानेषुक्रोधामर्षसमन्वितौ श्रुतायुश्चाच्युतायुश्च
धनंजयमयुध्यतां वलिनौस्पर्द्धिनौवीरौकुलजौवाहुशालिनौ तावेनंशरवर्षाणिसव्यदक्षिणमस्यतां त्वरायुक्तौमहाराजप्रार्थ
यानौमहद्यशः अर्जुनस्यवधप्रेप्सूपुत्रार्थेतवधन्विनौ तावर्जुनंसहस्रेणपत्रिणांनतपर्वणां पूरयामासतुः क्रुद्धौतडागंजल
दौयथा श्रुतायुश्चततः क्रुद्धस्तोमरेणधनंजयं आजघानरथश्रेष्ठः पीतेननिशितेनच सोतिविद्धोवलवताशत्रुणाशत्रुकर्ष
णः जगामपरमंमोहंमोहयन्केशवंरणे एतस्मिन्नेवकालेतुसोच्युतायुर्महारथः शूलेनभृशतीक्ष्णेनताडयामासपांडवं क्ष
तेक्षारंहिसददौपांडवस्यमहात्मनः पार्थोपिभृशसंविद्धोध्वजयष्टिंसमाश्रितः ततः सर्वस्यसैन्यस्यतावकस्यविशांपते सिंहनादोम
हानासीद्धतंमत्वाधनंजयं कृष्णश्चभृशसंतप्तोदृष्ट्वापार्थंविचेतनं आश्वासयत्सुहृद्याभिर्वाग्भिस्तत्रधनंजयं ततस्तौरथिनांश्रेष्ठौ
लब्धलक्षौधनंजयं वासुदेवंचवार्ष्णेयंशरवर्षैः समंततः सचक्रकूबररथंसाश्वध्वजपताकिनं अदृश्यंचक्रतुर्युद्धेतदद्भुतमि
वाभवत् प्रत्याश्वस्तस्तुवीभत्सुः शनकैरिवभारत प्रेतराजपुरंप्राप्यपुनः प्रत्यागतोयथा संछन्नंशरजालेनरथंदृष्ट्वासकेशवं
शत्रूचाभिमुखौदृष्ट्वादीप्यमानाविवानलौ प्रादुश्चक्रेततः पार्थः शाक्रमस्त्रंमहारथः तस्मादासन्सहस्राणिशराणांनतप
र्वणां तेजघ्नुस्तौमहेष्वासौताभ्यांमुक्तांश्चसायकान् विचेरुराकाशगताः पार्थवाणविदारिताः प्रतिहत्यशरांस्तूर्णंशरवेगेन
पांडवः प्रतस्थेतत्रतत्रैवयोधयन्वैमहारथान् तौचफाल्गुनवाणौघैर्विवाहुशिरसौकृतौ वसुधामन्वपद्येतांवातनुन्नाविवद्रुमौ

द्रो० श्रुतायुषश्चनिधनंवधश्चैवाच्युतायुषः लोकेविस्मापनमभूत्समुद्रस्येवशोषणं तयोःपदानुगान्हत्वापुनः पंचाशतंरथान् प्रत्यगाद्भा
७० रतींसेनांनिघ्नन्पार्थोवरान्वरान् श्रुतायुषंचनिहतंप्रेक्ष्यचैवाच्युतायुषं नियुतायुश्चसंक्रुद्धोदीर्घायुश्चैवभारत पुत्रौतयोर्नरश्रेष्ठ
कौंतेयंप्रतिजग्मतुः किरंतौविविधान्बाणान्पितृव्यसनकर्शितौ तावर्जुनोमुहूर्तेनशरैः सन्नतपर्वभिः प्रेषयत्परमक्रुद्धोयम
सदनंप्रति लोडयंतमनीकानिद्विपंपद्मसरोयथा नाशक्नुवन्वारयितुंपार्थंक्षत्रियपुंगवाः अंगास्तुगजवारेणपांडवंपर्यवार
यन् क्रुद्धाः सहस्रशोराजन्शिक्षिताहस्तिसादिभिः दुर्योधनसमादिष्टाः कुंजरैःपर्वतोपमैः प्राच्याश्चदक्षिणात्याश्चकलिंगप्रमु
खानृपाः तेषामापततांशीघ्रंगांडीवप्रेषितैः शरैः निचकर्तशिरांस्युग्रोबाहूनपिसुभूषणान् तैः शिरोभिर्महीकीर्णाबाहुभिश्चसहां
गदैःबभौकनकपाषाणाभुजगैरिवसंवृता बाहवोविशिखैश्छिन्नाःशिरांस्युन्मथितानिच च्यवमानान्यदृश्यंतद्रुमेभ्यइवपक्षि
णः शरैः सहस्रशोविद्धाद्विपाः प्रस्रुतशोणिताः अदृश्यंताद्रयःकालेगैरिकांबुस्रवाइव निहताःशेरतेस्मान्येबीभत्सोर्निशितैः
शरैः गजपृष्ठगताम्लेच्छानानाविकृतदर्शनाः नानावेषधराराजन्नानाशस्त्रौघसंवृताः रुधिरेणानुलिप्तांगाभांतिचित्रैः शरै
र्हताः शोणितंनिर्वमंतिस्मद्विपाःपार्थशराहताः सहस्रशश्छिन्नगात्राःसारोहाःसपदानुगाः चुक्रुशुश्चनिपेतुश्चबभ्रमुश्चापरे
दिशः भृशंत्रस्ताश्चबहवः स्वानेवममृदुर्गजाः सांतरायुधिनश्चैवद्विपास्तीक्ष्णविषोपमाः विदंत्यसुरमायांयेघोराघोरचक्षुषः
जवनाःपारदाश्चैवशकाश्चसहबाल्हिकैः गोयोनिप्रभवाम्लेच्छाःकालकल्पाःप्रहारिणः दीर्घास्तिमारदरदाः पुंड्राश्चैवसहस्रशः रम०
तेनशक्याःस्मसंख्यातुंव्राताःशतसहस्रशः अभ्यवर्षंततेसर्वेपार्श्वंनिशितैःशरैः अवाकिरंश्चतेम्लेच्छानानायुद्धविशारदाः ७०

तेषामपिसमस्तानांशरवृष्टिंधनंजयः रश्मिस्तथातिवाल्यामीछलभानामिवापतिः अभ्रछायामिवशरैः सैन्येकृत्वाधनंजयः
मुंडार्द्धमुंडानजटिलानशुचीनजटिलाननान म्लेछानशातयत्सर्वान्समेतांशस्त्रतेजसा शरैश्चशतशोविद्धास्तसंघाग
रिचारिणः प्राद्रवंतरणेभीतागिरिकंदरवासिनः गजाश्वसादिम्लेछानांपातितानांशितैः शरैः वकाः कंकावृकाभूमावपिबं
न्रुधिरंमुदा पत्त्यश्वरथनागाश्वप्रछन्नकृतसंक्रमां शरवर्षप्लवांघोरांकेशशैवलशाद्वलां प्रावर्तयन्नदींरौद्रांशोणितौघत
रंगिणीं छिन्नांगुलीक्षुद्रमत्स्यांयुगांतेकालसन्निभां अकरोद्गजसंबाधांनदीमुत्तरशोणितां देहेभ्योराजपुत्राणांनागाश्व
रथसादिनां यथास्थलंचनिम्नंचनस्याद्वर्षतिवासवे तथासीत्पृथिवीसर्वाशोणितेनपरिप्लुता षट्सहस्रान्हयान्वीरान्पुनर्दश
शतान्वरान प्राहिणोन्मृत्युलोकाय क्षत्रियान्क्षत्रियर्षभः शरैः सहस्रशोविद्धाविधिवत्कल्पिताद्विपाः शेरतेभूमिमासा
द्यशैलावज्रहताइव सवाजिरथमातंगान्निघ्नन्व्यचरदर्जुनः प्रभिन्नइवमातंगोमृद्नन्नलवनंयथा भूरिद्रुमलतागु
ल्ममशुष्कंधनतृणोलपं निर्दहेदनलोरण्यंयथावायुसमीरितः सैन्यारण्यंतवतथाकृष्णानिलसमीरितः शराग्निरदहत्क्रुद्धः
पांडवाग्निर्धनंजयः शून्यानकुर्वन्रथोपस्थान्मानवैः संस्तरन्महीं प्रानृत्यदिवसंबाधेचापहस्तोधनंजयः वज्रकल्पैः शरैर्भू
मिंकुर्वन्नुत्तरशोणितां प्राविशद्भारतींसेनांसंक्रुद्धोवैधनंजयः तंश्रुतायुस्तथांबष्ठोव्रजमानंन्यवारयत तस्यार्जुनः शरैस्ती
क्ष्णैः कंकपत्रपरिच्छदैः न्यपातयद्धयान्शीघ्रंयतमानस्यमारिष धनुश्चास्यापरैश्छित्वाशरैः पार्थोविचक्रमे अंबष्ठस्तुगदांगृ
ह्यक्रोधपर्याकुलेक्षणः आससादरणेपार्थंकेशवंचमहारथं ततः संप्रहरन्वीरोगदामुद्यम्यभारत रथमावार्यगदयाकेशवमम

९१

द्रो०
७१

ताउयत गरयातोऽस्तिं हत्वा केशवं पर्यवीरहा अर्जुनो यमसंक्रुद्धः सौवर्णं प्रतिमारत॥ ततः शरैर्हेमपुंखैः सगरं धन्विनां वरं छा
दयामास समरे मेघः सूर्यमिवोदितं अथापरैः शरैश्चापि गाढं तस्य महात्मनः अचूर्णयत्तदा पार्थस्तदद्भुतमिवाभवत् अथ तां पति
तां हत्वा स ऽस्यामां च महागदां अर्जुनं वासुदेवं च पुनः पुनरताडयत् तस्यार्जुनः क्षुरप्राभ्यां सगदायुधौ तौ भुजौ चिच्छेद इंद्रध्वजाकारौ
शिरश्चान्येन पत्रिणा सपपात हतो राजन्वसुधामनुनादयन् इंद्रध्वज इवोत्सृष्टो यंत्रनिर्मुक्तबंधनः रथानीकावगाढश्च वार
णाश्वशतैर्वृतः अदृश्यत तदा पार्थो यथैवं सूर्यस्त्वावृतः इति द्रोणपर्वणि जयद्रथवधे संजय उवाच ततः प्रविष्टे कौंतेये सिंधुराज
जिघांसया द्रोणानीकं विनिर्भिद्य भोजानीकं च दुस्तरं कांबोजस्य च दायादे हते राजन्सुदक्षिणे श्रुतायुधे च विक्रांते निहते सव्यसा
चिना विप्रद्रुतेष्वनीकेषु विध्वस्तेषु समंततः प्रभग्नं स्वबलं दृष्ट्वा पुत्रस्ते द्रोणमभ्ययात् त्वरन्नेकरथेनैव समेत्य द्रोणमब्रवीत् गतः
स पुरुषव्याघ्रः प्रमथ्येमां महाचमूं अथ बुध्या समीक्षस्व किं नु कार्यमनंतरं अर्जुनस्य विघाताय दारुणेऽस्मिन् जनक्षये यथा
स पुरुषव्याघ्रो न हन्येत जयद्रथः तथा विधत्स्व भद्रं ते त्वं हि नः परमा गतिः॥ असौ धनंजयाग्निर्हि कोपमारुतचोदितः सेनाकक्षं
दहति मे वन्हिः कक्षमिवोत्थितः अतिक्रांते हि कौंतेये भित्वा सैन्यं परंतप जयद्रथस्य गोप्तारः संशयं प रमं गताः
स्थिरा बुद्धिर्नरेंद्राणामासीद्ब्रह्मविदां वर नातिक्रमिष्यति द्रोणं जातु जीवन्धनंजयः योऽसौ पार्थो व्यतिक्रांतो मिषतस्ते महाद्युते
सर्वं ह्यद्यातुरं मन्ये नेदमस्ति बलं मम जानामि त्वां महाभाग पांडवानां हिते रतं तथा मुह्यामि च ब्रह्मन्कार्यं प्रति विचिंतयन् यथाशक्ति
च ते ब्रह्मन्वर्तये वृत्तिमुत्तमां प्रीणामि च यथाशक्ति तच्च त्वं नावबुध्यसे अस्मान्न त्वं सदा भक्तानिच्छस्यमितविक्रम पांडवान्सत

ए०
७१

तंप्रीरणात्स्मस्माकंविप्रियेरतान् अस्मानेवोपजीवंस्त्वमस्माकंविप्रियेरतः नह्यहंत्वांविजानामिमधुदिग्धमिवक्षुरं नादास्यैश्चेद्वरंमह्यंभवान्
पांडवनिग्रहे नावारयिष्यंगच्छंतमहंसिंधुपतिंगृहान् मयात्वाशंसमानेनत्वत्तस्त्राणमबुद्धिना आश्वासितः सिंधुपतिर्मोहाद्दत्तश्चमृत्यवे
यमदंष्ट्रांतरंप्राप्तोमुच्येतापिहिमानवः नार्जुनस्यवशंप्राप्तोमुच्येताजौजयद्रथः सतथाकुरुशोणाश्वयथामुच्येतसैंधवः ममचार्त्तप्र
लापानांमाक्रुद्धः पाहिसैंधवं द्रोणउवाच नाभ्यसूयामितेवाक्यमश्वत्थाम्नासिमेसमः सत्यंतुतेप्रवक्ष्यामितज्जुषस्वविशांपते सारथिःप्र
वरः कृष्णः शीघ्राश्चास्यहयोत्तमाः अल्पंचविवरंकृत्वातूर्णंयातिधनंजयः किंनपश्यसिबाणौघान्क्रोशमात्रेकिरीटिनः पश्चाद्र
थस्यपतितान्क्षिप्तान्शीघ्रंहिगच्छतः नचाहंशीघ्रयानेद्यसमर्थोवयसान्वितः सेनामुखेचपार्थानामेतद्बलमुपस्थितं युधिष्ठिरश्च
मेग्राह्योमिषतांसर्वधन्विनां एवंमयाप्रतिज्ञातंक्षत्रमध्येमहाभुज धनंजयेनचोत्सृष्टवर्त्ततेप्रमुखेनृप तस्माद्व्यूहमुखंहित्वा नाहंयो
त्स्यामिफाल्गुनं तुल्याभिजनकर्माणंशत्रुमेकंसहायवान् गत्वायोधयमाभैस्त्वंत्वंह्यस्यजगतःपतिः राजाशूरः कृतीदक्षोवैरंते
परपुरंजयः वीरः स्वयंप्रयात्वत्रयत्रपार्थोधनंजयः दुर्योधनउवाच कथंत्वामप्यतिक्रांतः सर्वशस्त्रभृतांवरं धनंजयोमयाशक्यआ
चार्यप्रतिबाधितुं अपिशक्योरणेजेतुंवज्रहस्तःपुरंदरः नार्जुनः समरेशक्योजेतुंपरपुरंजयः येनभोजश्चहार्दिक्यो
भवांश्चत्रिदशोपमः अस्त्रप्रतापेनजितौश्रुतायुश्चनिबर्हितः सुदक्षिणश्चनिहतः सचराजाश्रुतायुधः श्रुतायुश्चाच्युतायुश्च
म्लेच्छाश्चायुतशोहताः तंकथंपांडवंयुद्धेदहंतमिवपावकं प्रतियोत्स्यामिदुर्धर्षंतन्मेशंसास्त्रकोविदः क्षमंचमन्यसेयुद्धममतेनाथसंयुगे
परवानस्मिभवतिप्रेष्यवद्रक्षमेयशः द्रोणउवाच सत्यंवदसिकौरव्यदुराधर्षोधनंजयः अहंतुतत्करिष्यामियथैनंप्रसहिष्यसि अ

११

द्रो०
८२

स्वस्ति ६

हृतंचापपरंपुलोकेसर्वधनुर्धराः विषक्तंत्वपिकौंतेयंवासुदेवसमपश्यतः एषतेकवचंराजन्तथाबध्नामिकांचनं यथानबाणानास्त्रा
णिप्रसहिष्यंतितेरणो यदित्वांसासुरासुराः सगंधर्वोरगराक्षसाः योधयंतित्रयोलोकाः सनरानास्तितेभयं नकृष्णोनचकौंतेयोनचा
न्यः शस्त्रभृद्रणे शरानर्पयितुंकश्चित्कवचेतवशक्ष्यति सत्वंकवचमास्थायक्रुद्धमद्यरणेर्जुनं त्वरमाणः स्वयंयाहिनत्वासौ
विसहिष्यति संजयउवाच एवमुक्त्वात्वरन्द्रोणः स्पृष्ट्वांभोभास्वरं आंगंवंधाहृतमंत्रंयन्मंत्रंयथाविधि रणेतस्मिन्सुमह
तिविजयसुतस्यते विसिस्मापयिषुर्लोकान्विद्ययाब्रह्मवित्तमः ॥ ॥ द्रोणउवाच करोतुस्वस्तितेब्रह्मास्वस्तिचापिद्विजातयः
सरीसृपाश्चयेश्रेष्ठास्तेभ्यस्तेस्वस्तिभारत ययातिर्नहुषश्चैवधुंधुमारोभगीरथः ४ स्वाहास्वधाशचीचैवस्वस्तिकुर्वंतुतेसदा लक्ष्मीररुंध
तीचैवकुरुतांस्वस्तितेनघ असितोदेवलश्चैवविश्वामित्रस्तथांगिराः वसिष्ठःकश्यपश्चैवस्वस्तिकुर्वंतुतेनृप धाताविधातालोकेशो
दिशश्चसदिगीश्वराः स्वस्तितेधप्रयच्छंतुकार्तिकेयश्चषण्मुखः विवस्वानभगवानस्वस्तिकरोतुतवसर्वशः दिग्गजाश्चैवचत्वारः
क्षितिश्चगगनंग्रहाः अधस्ताद्धरणींयोसौसदाधारयतेनृप शेषश्चपन्नगश्रेष्ठस्वस्तितुभ्यंप्रयच्छतु गांधारेयुधिविक्रम्यनिर्जिताः
सुरसत्तमाः पुरावृत्रेणदैत्येनभिन्नदेहाःसहस्रशः हृततेजोबलाः सर्वेतदासेंद्रादिवौकसः ब्रह्माणं [illegible] शरणंज
ग्मुर्वृत्राद्भीतामहासुरात देवाऊचुः प्रमर्द्दितानांवृत्रेणदेवानांदेवसत्तम गतिर्भवसुरश्रेष्ठत्राहिनोमहतोभयात अथपार्श्वेस्थि
तंविष्णुंशक्रादींश्चसुरोत्तमान प्राहतथ्यमिदंवाक्यंविषण्णानसुरसत्तमान रक्ष्यामेसततंदेवाः सहेंद्राः सद्विजातयः त्वष्टुःसुदुर्द्ध
रंतेजोयेनवृत्रोविनिर्मितः त्वष्टापुरातपस्तप्त्वावर्षायुतशतंतदा वृत्रोविनिर्मितोदेवाः प्राप्यानुज्ञांमहेश्वरात सतस्यैवप्रसाद

द्रो०
८२

ह्यहंमोक्ष्येरिपुर्वली मामृत्वा शंकरस्थानं भगवान्वृहस्पतेहर: दृक्ष्यामि ष्ण्य यदेवंतत्क्षिप्रंगछत मंदरं यत्रास्ते तपसां योनिर्दक्षयज्ञविनाशन:
पिनाकी सर्वभूतेशो भगनेत्रनिपातन: ते गत्वा सहिता देवा ब्रह्मणा सह मंदरं अपश्यंस्तेजसां राशिं सूर्यकोटिसमप्रभं सोऽब्रवीत्स्वागतं दे
वा ब्रूत किं करवाण्यहं अमोघं दर्शनं मह्यं कामप्राप्तिरतोस्तु व: एवमुक्तास्तु ते सर्वे प्रत्यूचुस्तं दिवौकस: तेजो हृतं नो वृत्रेण गतिर्भव दि
वौकसां मूर्तीरीक्ष स्वनोद्दप्रहारैर्जर्जरीकृता: शरणं त्वां प्रपन्ना: स्म गतिर्भव महेश्वर शर्व उवाच विदितं वो यथा देवा कृत्येयं सुम
हाबला: त्वष्टुस्तेजोभवा घोरा दुर्निवार्याकृतात्मभि: अवश्यं तु मया कार्यं साहाय्यं सर्वदिवौकसां ममेदं गात्रजं शक्र कवचं गृह्य भा
स्वरं वध्यानेनेन मंत्रेण मानसेन सुरेश्वर द्रोण उवाच इत्युक्त्वा वरद: प्रादाद्वर्मतन्मंत्रमेव च स तेन वर्मणा गुप्त: प्रायाद्वृत्रचमूंप्र
ति नानाविधैश्च शस्त्रौघै: पात्यमानैर्महारणे न संधि: शक्यते भेत्तुं वर्मबंधस्य तस्य तु ततो जघान समरे वृत्रं देवपति: स्वयं तं च मंत्रमयं
चैव वर्म्म चांगिरसे ददौ अंगिरा: प्राह पुत्रस्य मंत्रज्ञस्य वृहस्पते: वृहस्पतिरथोवाच अग्निवेश्याय धीमते अग्निवेश्यो मम प्रादात्तेन बध्ना प्रा
मि वर्म्म ते तवाद्य देहे रक्षार्थं मंत्रेण नृपसत्तम संजय उवाच एवमुक्त्वा ततो द्रोणस्तव पुत्रं महाद्युतिं पुनरेव वच: प्राह शनैराचार्यपुंग
व: ब्रह्मसूत्रेण बध्नामि कवचं तव भारत हिरण्यगर्भेण यथा बद्धं विष्णो: पुरा रणे यथा च ब्रह्मणा बद्धं संग्रामे तारकामये शक्रस्य कवचं
दिव्यं तथा बध्नाम्यहं तव बध्वा तु कवचं तस्य मंत्रेण विधिपूर्वकं प्रेषयामास राजानं युद्धाय महते द्विज: स सन्नद्धो महाबाहुराचार्येण महात्म
ना रथानां च सहस्रेण त्रिगर्त्तानां प्रति नानावादित्रघोषेण यथा वैरोचनिस्तथा तत: शब्दो महानासीत्सैन्यानां तव भारत अगाधं प्र
स्थितं दृष्ट्वा समुद्रमिव कौरवं ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे संजय उवाच प्रविष्टयोर्महाराज पार्थवार्ष्णेययो रणे दुर्योध

प्रहारिणां तथा दंतिसहस्रेण मत्तानां वीर्यशालिनां अश्वानामयुतेनैव तथान्यैश्च महारथै: वृत: प्रायान्महाबाहुरर्जुनस्य रथं

तिसैन्यानि द्रोणस्तु रथिनां वरः व्यधमच्चापि तान्सर्वान्धृष्टद्युम्नो महारथः धार्त्तराष्ट्रांस्तथा भूतान्व्यधमत्पांडुरंजयः अंगोपाः प्रतिसैन्यानि द्रोणस्तु रथिनां वरः व्यधमच्चापि तान्वीरान्रथपंक्तिभिः आपेदीव कालः स्वयम्
२३ तेयोधान्धृष्टद्युम्नेन मोहिता न संग्रामे तुमुले तस्मिन्निति मां प्रतिगेरिरे जनाः कुरून्पसमयथा ... दहन्निव व्याधितस्करैः द्रावयेत तदा पञ्चपांडवस्य तव वाहिनी अर्धं ... सुपुत्रकवे च चक्रीष
... सुमत्सैन्यानस्तमातथा त्रिधाभूतेषु सैन्येषु वध्यमानेषु पांडवैः अमर्षितस्ततो द्रोणः पांचालान्व्यधमच्छरैः स्वरूपस्तावको मनी २४ १३

द्रो० ८३

नभयात्तव संशप्तः पुरुषर्षभ जग्मिवान्द्रोणमहतानि सैन्येन च पांडवाः मामकैः सार्द्धं ततो युद्धमवर्तत तद्युद्धमभवद्घोरं तुमुलं लोमहर्ष
णं कुन्त्याः पांडवानां च समूहस्य पुरतो हुतं राजन्कथं चित्रमस्माभिर्दृष्टं तादृक्न च श्रुतं यादृगमध्यगते सूर्ये युद्धमासीद्विशांपते धृष्टद्युम्न
मुखाः पार्था व्यूढानीकाः प्रहारिणः द्रोणानीकं स्वबाणौघैर्विधमन्तोऽवाकिरन् वयं द्रोणं पुरस्कृत्य सर्वशस्त्रभृतां वरं तावकं पार्षतप्रमुखान्पा
र्थानभ्यवर्षाम सायकैः महामेघाविवोदीर्णौ मिश्रवातौ हिमात्यये सेनाग्रे विप्रकाशेते रुचिरे रथभूषिते समेत्य तु महासेने चक्रतुर्वेग
मुत्तमं जाह्नवीयमुने नद्यौ प्रावृषीवोल्बणोदके नानाशस्त्रपुरोवातो द्विपाश्वरथसंवृतः गदाविद्युन्महारौद्रः संग्रामजलदो महा
न् भारद्वाजानिलोद्धूतः शरधारासहस्रवान् अभ्यवर्षन्महारौद्रः पांडुसेनाग्निमुद्धतं समुद्रमिव घर्मांते विवान्घोरो महानिल
व्यक्षोभयदनीकानि पांडवानां द्विजोत्तमः तेऽपि सर्वप्रयत्नेन द्रोणमेव समाद्रवन् बिभित्संतो महासेतुं वार्योघाः प्रबला इव वारयामा
स तं द्रोणो जलौघमचलो यथा पांडवान्समरे क्रुद्धान्पांचालांश्च सकेकयान् अथापरे च राजानः परिवृत्य समंततः महाब
ला रणे शूराः पांचालानन्ववारयन् ततो रणे नरव्याघ्रः पार्षतः पांडवैः सह संजघानासकृद्द्रोणं बिभित्सुररिवाहिनीं यथैव श
रवर्षाणि द्रोणो वर्षति पार्षते तथैव शरवर्षाणि धृष्टद्युम्नोऽभ्यवर्षत सनिस्त्रिंशपुरोवातः शक्तिप्रासर्ष्टिसंवृतः ज्याविद्युच्चापसंह्रादो
धृष्टद्युम्नबलाहकः शरधाराश्मवर्षाणि व्यसृजत्सर्वतो दिशं निघ्नन्रथवराश्वौघान्प्लावयामास वाहिनीं यं यमार्छच्छरैर्द्रोणः पां
डवानां रथव्रजं ततस्ततः शरैर्द्रोणमपाकर्षत पार्षतः तथा तु यतमानस्य द्रोणस्य युधि भारत धृष्टद्युम्नं समासाद्य त्रिधा सैन्यमभि राम ८३
द्यत भोजमेके न्यवर्तंत जलसंधमथापरे पांडवैर्हन्यमानाश्च द्रोणमेवापरे ययुः संघट्टयति सैन्यानि रजमातथा त्रिधाभूतेषु सैन्येषु

ध्यमानेषु पांडवेषु अमर्षितस्ततो द्रोणः पंचालानव्यधमच्छरैः सदृतस्तानमनीकानि निघ्नतस्तस्यापि सायकैः बभूव रूपं द्रोणस्य काला
ग्नेरिव दीप्यतः रथं नागं हयं चापि पत्तिनश्च विशांपते एकैकेनेषुणा संख्ये निर्बिभेद महारथः पांडवानां तु सैन्येषु नास्ति कश्चित्स भार
त यः धारयेत्सो वाणान्न द्रोणचापच्युतान् शुभो तत्पच्यमानमर्केण द्रोणसायकतापितं बभ्राम पांडवं सैन्यं तत्र तत्रैव भारत तथैव पा
र्षतेनापि कालमानं बलं तव अभवत्सर्वतो दीप्तं शुष्कं वनमिवाग्निना बाध्यमानेषु सैन्येषु द्रोणपार्षतसायकैः त्यक्त्वा प्राणान्परं श
क्त्या युध्यंते सर्वतोमुखाः तावकानां परेषां च युध्यतां भरतर्षभ नासीत्कश्चिन्महाराज यो सांसोत्संयुगं भयात् भीमसेनं तु कौंतेयं सौ
भद्राः पर्यवारयन् विविंशतिश्चित्रसेनो विकर्णश्च महारथः विंदानुविंदावावंत्यौ क्षेमधूर्तिश्च वीर्यवान् त्रयाणां तव पुत्राणां त्रय ए
वानुयायिनः वाल्हिकराजस्तेजस्वी कुलपुत्रो महारथः सहसेनः सहामात्यो द्रौपदेयानवारयत् शैब्यो गोवासनो राजा योधैर्दशश
तावरैः काश्यस्याभिभुवः पुत्रं पराक्रांतमवारयत् अजातशत्रुं कौंतेयं ज्वलंतमिव पावकं मद्राणामीश्वरः शल्यो राजा राजानमाद्व
रणात् दुःशासनस्त्वसंरब्धः स्वमनीकममर्षणः सात्यकिं प्रययौ क्रुद्धः शूरो रथवरं युधि स्वकेनाहमनीकेन सन्नद्धः कवचावृतः
चतुःशतैर्महेष्वासैश्चेकितानमवारयं शकुनिस्तु महानीको माद्रीपुत्रमवारयत् गांधारकैः सप्तशतैश्चापशक्त्यसिपाणिभिः विं
दानुविंदावावंत्यौ विराटं मत्स्यमार्छतां प्राणांस्त्यक्त्वा महेष्वासौ [illegible] मित्रार्थमुद्यतायुधौ शिखंडिनं याज्ञसेनिं रुंधानमपराजितं वाल्हीकः
प्रतिसंयत्तः पराक्रांतमवारयत् धृष्टद्युम्नं तु पांचाल्यं क्रूरैः सार्धं प्रभद्रकैः आवंत्यः सहसौवीरैः क्रुद्धरूपमवारयत् घटोत्कचं तथा शू
रं राक्षसं क्रूरकर्मिणं अलायुधो द्रुतं क्रुद्धमायांतमाहवे अलंबुषं राक्षसेंद्रं कुंतिभोजो महारथः सैन्येन महता युक्तः क्रूरम

द्रो० ७४ पमवारयत सैंधवः दृष्ट्वा तस्यासीत्सर्वसैन्यस्य भारत रक्षितः परमेष्वासैः कृपप्रभृतिभी रथैः तस्मात्तां वक्ष्ये द्रोणो हि सैंधव मह हन्ते मो
झारिरिंद्रिया तो एसेन सूतपुत्रस्तवामतः दृष्ट्वा पार्थस्ततस्मासन्नो महद्रतिपुरगमाः कृपश्च वृषसेनश्च शलः शल्यश्च दुर्जयः नीतिमंतोम
हेष्वासाः सर्वयुद्धविशारदाः सैंधवस्य विधास्यंति रक्षां युयुधिरे ततः ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे संजय उवाच राजन्संग्राममाश्च
र्यं शृणु कीर्तयतो मम कुरूणां पांडवानां च यथा युद्धमवर्त्तत भारद्वाजं समासाद्य व्यूहस्य प्रमुखे स्थितं अयोधयन्रणे पार्था द्रोणानी
कं विभित्सवः रक्ष्यमाणाः स्वकं व्यूहं द्रोणोपि सह सैनिकः अयोधयद्रणे पार्थान्पार्थयानो महद्यशः विंदानुविंदावावंत्यौ वि
राटं दशभिः शरैः आजघ्नतुः सुसंक्रुद्धौ तव पुत्रहितैषिणौ विराटश्च महाराज तावुभौ समरे स्थितौ पराक्रांतौ पराक्रम्य योधयामास सा
नुगौ तेषां युद्धं समभवद्दारुणं शोणितोदकं सिंहस्य द्विपमुख्याभ्यां प्रभिन्नाभ्यां यथा वने बाल्हीकं रभसं युद्धे याज्ञसेनिर्महाबलः
आजघ्ने विशिखैस्तीक्ष्णैर्घोरैर्मर्मास्थिभेदिभिः बाल्हीको याज्ञसेनिं तु हेमपुंखैः शिलाशितैः आजघान भृशं क्रुद्धो नवभिर्नतप
र्वभिः तद्युद्धमभवद्घोरं शरशक्तिसमाकुलं भीरूणां त्रासजननं शूराणां हर्षवर्द्धनं ताभ्यां तत्र शरैर्मुक्तैरंतरिक्षं दिशस्तथा अभवत्स
र्वं न प्राज्ञायत किंचन शतानीको वा सहसा युद्धे कोत्स्य पुत्रं महारथ दुसेनो योधयामास मारिष प्रतिगजं यथा बा[illegible]करणः संकु
द्धो द्रौपदेयान्महारथान् मनः पंचेंद्रियाणीव शुशुभे योधयन्रणे अयोधयंस्ते सुभृशं शरौघैः समंततः इंद्रियार्था यथा देहं श स्ती०
श्वद्देहवतां वरं वार्ष्णेयं सात्यकिं युद्धे दुःशासनस्तव आजघ्ने सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः सोतिविद्धो बलवता महेष्वास
न धन्विना ईषन्मूर्छां जगामाशु सात्यकिः सत्यविक्रमः समाश्वस्तस्तु वार्ष्णेयस्तव पुत्रं महारथं विव्याध दशभिस्तूर्णं सायकैः कंकपत्रिभिः द्रो० ७४

ताम्रोमं दृष्ट्वा विह्वलोम्रोम्र शरविक्षतो रणेतत् समरे राजन्पुष्पितो विव किंशुकः अलंबुषस्तु संक्रुद्धः कुंतिभोजशरार्दितः अशोभ
त भृशं लक्ष्मा पुष्पौ इव किंशुकः कुंतिभोजं ततो रक्षो विद्ध्वा बहुभिरायसैः अनदद्भैरवं नादं वाहिन्याः प्रमुखे तव ततस्तौ समरे शूरौ
योधयंतौ परस्परं ददृशुः सर्वभूतानि शक्रजंभौ यथा पुरा शकुनिं रभसं युद्धे कृतवैरं च भारत माद्रीपुत्रौ च संरब्धौ शरैरार्दयतां भृशं तुमु
लः स महाराज प्रावर्तत जनक्षयः त्वया संजनितोत्यर्थं कर्णेन च विवर्द्धितः रक्षितस्तव पुत्रैश्च क्रोधमूलो हुताशनः य इमां पृथिवीं रा
जन्दग्धुं सर्वां समुद्यतः शकुनिः पांडुपुत्राभ्यां कृतः स विमुखः शरैः न स्म जानाति कर्तव्यं युद्धे किंचित्पराक्रमं विमुखं चैनमालोक्य माद्री
पुत्रौ महारथौ ववर्षतुः पुनर्बाणैर्यथा मेघौ महागिरिं स वध्यमानो बहुभिः शरैः सन्नतपर्वभिः संप्रायाज्जवनैरश्वैर्द्रोणानीकाय
सौबलः घटोत्कचस्तथा शूरं राक्षसं तमलायुधं अभ्ययाद्रभसं युद्धे वेगमास्थाय मध्यमं तयोर्युद्धं महाराज चित्ररूपमिवाभवत् या
दृशं हि पुरा वृत्तं रामरावणयोर्मृधे ततो युधिष्ठिरो राजा मद्रराजानमाहवे विद्ध्वा पंचाशता बाणैः पुनर्विव्याध सप्तभिः ततः प्रववृते युद्धं त
योरत्यद्भुतं नृप यथा पूर्वं महद्युद्धं शंबरामरराजयोः विविंशतिश्चित्रसेनो विकर्णश्च तवात्मजः अयोधयन्भीमसेनं महत्या सेनया वृताः
द्रोणपर्वणि जयद्रथवधे संजय उवाच तथा तस्मिन्प्रवृत्ते तु संग्रामे लोमहर्षणे कौरवेयांस्त्रिधाभूतान्पांडवाः समुपाद्रवन् जलसंधं म
हाबाहुं भीमसेनोभ्यवर्तत युधिष्ठिरः सहानीकः कृतवर्माणमाहवे किरन्तु शरवर्षाणि रोचमान इवांशुमान् धृष्टद्युम्नो महाराज द्रो
णमभ्यद्रवद्रणे ततः प्रववृते युद्धं त्वरतां सर्वधन्विनां कुरूणां पांडवानां च संक्रुद्धानां परस्परं संक्षये तु तथाभूते वर्तमाने महाभये द्वं

द्वैभूतेषु सैन्येषु युध्यमानेष्वभीतवत् द्रोणः पांचालपुत्रेण बलीबलवतांवरः यदृक्षिपत्तश्चषक्तौ मौलिरद्भुतमिवाभवत् पुंडरीकवना
नीवविध्वस्तानि समंततः चक्राते द्रोणपांचाल्यौ नृणां शीर्षाण्यनेकशः तिनिकीर्णानि वीराणां मनीकेषु समंततः वस्त्राभरणशस्त्राणि ध्व
जवर्मायुधानिच तपनीयविचित्राणि संसिक्तारुधिरेणच संसक्तारचदृश्यंते मेघसंघाः सविद्युतः कुंजराश्वनरानन्यपातयंतिस्मपत्रिभिः
तालमात्राणि चापानि विकर्षंतो महारथाः असिचर्माणि चापानि शिरांसि कवचानि च विप्रकीर्यंत शूराणां संप्रहारे महात्मनां उच्छि
ताम्रगात्राणि कबंधानि समंततः अदृश्यंत महाराज तस्मिन्परमसंकुले गृध्राः कंकावलाः श्येनावायसाजंबुकास्तथा बहुशः पिशि
ताशाश्चतत्रादृश्यंत मारिष भक्षयंतश्च मांसानि पिवंतश्चापि शोणितं विलुंपंतश्च केशांश्च मज्जाश्च बहुधा नृप आकर्षंतः शरीरा
णि शरीरावयवांस्तथा नराश्वगजसंघानां शिरांसि च ततस्ततः कृतास्त्रा रणदीक्षाभिर्दीक्षिता रणशालिनः रणेजयमभीप्सानाभृ
शंयुयुधिरेतदा असिमार्गान्बहुविधान्विचेरुः सैनिकारणे ऋष्टिभिः शक्तिभिः प्रासैः शूलतोमरपट्टिशैः गदाभिः परिघैश्चान्यैरायु
धैश्च भुजैरपि अन्योन्यं जघ्निरे क्रुद्धा युद्धरंगगता नराः रथिनो रथिभिः सार्द्धमश्वारोहाश्च सादिभिः मातंगा वरमातंगैः पदाताश्च प
दातिभिः क्रीडंतस्त्वामिवोन्मत्ता रंगेष्विव वारणाः उच्चक्रुशुरथान्योन्यं जघ्नुरन्योन्यमेव च वर्तमाने तथा युद्धे निर्मर्यादे विशांपते धृष्टद्युम्नो
हयानश्वैर्द्रोणस्य व्यत्यमिश्रयत् ते हयाः साध्वशोभंत मिश्रिता वातरंहसः पारावतसवर्णाश्च रक्तशोणाश्च संयुगे पारावतसवर्णास्ते
रक्तशोणा विमिश्रिताः हयाः शुशुभिरे राजन्मेघा इव सविद्युतः धृष्टद्युम्नस्तु संप्रेक्ष्य द्रोणमभ्याशमागतं असिचर्मादंदे वीरो

धनुस्तत्स्य भारत चिकीर्षुर्दुष्करं कर्म्म पार्षतः परवीरहा रथेषां समतिक्रम्य द्रोणस्य रथमाविशत् अतिष्ठद्युगमध्ये स युगसंनहनेषु च जघना
र्द्धेषु चाश्वानां तत्सैन्यमाऽपूजयत् खड्गेन चरतस्तस्य शोणाश्वानधितिष्ठतः न ददर्शान्तरं द्रोणस्तदद्भुतमिवाभवत् यथा श्येनस्य पतनं वनेष्वामि
षगृद्धिनः तथैवासीदभीसारस्तस्य द्रोणं जिघांसतः ततः शरशतेनास्य शतचन्द्रं समाक्षिपत् द्रोणो द्रुपदपुत्रस्य खड्गं च दशभिः शरैः हयांश्चैव
चतुः षष्ट्या शराणां जघ्निवान्बली ध्वजं छत्रं च भल्लाभ्यां तथा तौ पार्ष्णिसारथी अथास्मै त्वरितो बाणमपरं जीवितान्तकं आकर्णपूर्णं चिक्षेप व यत्र४
ज्रं वृत्रे यथा तं चतुर्दशभिस्तीक्ष्णैर्बाणैश्चिच्छेद सात्यकिः ग्रस्तमाचार्यमुख्येन धृष्टद्युम्नं व्यमोचयत् सिंहेनेव मृगं ग्रस्तं नरसिंहेन मारिष द्रो
णेन मोचयामास पांचाल्यं शिनिपुंगवः सात्यकिं प्रेक्ष्य गोप्तारं पांचाल्यं च महाहवे शराणां त्वरितो द्रोणः षड्विंशत्या समार्पयत् ततो द्रोणं शि
नेः पौत्रो ग्रसन्निव च संजयान् प्रत्यविध्यच्छितैर्बाणैः षड्विंशत्या स्तनान्तरे ततः सर्वे रथास्तूर्णं पांचाल्या जयगृद्धिनः सात्वताभिसृते द्रोणे
धृष्टद्युम्नमपाक्षिपन् द्रोणपर्वणि जयद्रथवधे धृतराष्ट्र उवाच बाणे तस्मिन्निकृत्ते तु धृष्टद्युम्ने च मोक्षिते तेन वृष्णिप्रवीरेण युयुधानेन सं
जय अमर्षितो महेष्वासः सर्वशस्त्रभृतां वरः नरव्याघ्रः शिनेः पौत्रे द्रोणः किमकरोद्युधि संजय उवाच संप्रद्रुतः क्रोधविषो व्यादिता
स्यशरासनः तीक्ष्णधारेषुदशनः शितनाराचदंष्ट्रवान् संरम्भामर्षताम्राक्षो महोरग इव श्वसन् नरवीरः प्रमुदितैः शोणैरश्वैर्महाजवैः
उत्पतद्भिरिवाकाशं क्रामद्भिरिव पर्वतं रुक्मपुंखान् शरानस्यन् युयुधानमुपाद्रवत् शरपातमहावर्षं रथघोषबलाहकं कार्मुकाकर्षविक्षिप्तना
राचबहुविद्युतं शक्तिखड्गाशनिधरं क्रोधवेगसमुत्थितं द्रोणमेघमनावार्यं हयमारुतचोदितं दृष्ट्वैवाभिपतन्तं तं शूरः परपुरंजयः उवाच सूतं शै
नेयः प्रहसन्युद्धदुर्मदः एतं वै ब्राह्मणं शूरं स्वकर्मण्यनवस्थितं आश्रयं धार्तराष्ट्रस्य राज्ञो दुःखभयावहं शीघ्रं प्रजविताश्वैः प्रत्युद्या

२६

द्रो० ८६ हि प्रलष्टवत् आचार्यं राजपुत्राणां सर्वशस्त्रभृतां वरं ततो रजतसंकाशा माधवस्य हयोत्तमाः द्रोणस्याभिमुखाः शीघ्रमगछन्वातरंहसः
ततस्तौ द्रोणशैनेयौ युयुधाते परंतपौ शरैरनेकसाहस्रैस्ताडयंतौ परस्परं इषुजालावृतं व्योम चक्रतुः पुरुषर्षभौ पूरयामासतुर्वीरावुभौ दश दि
शः शरैः मेघाविवातपापाये धाराभिरितरेतरं न स्म सूर्यस्तदा भाति न ववौ च समीरणः इषुजालावृतं घोरमंधकारं समंततः अनाधृष्यमिवान्ये
षां शूराणामभवत्तदा अंधकारीकृते लोके द्रोणशैनेययोः शरैः तयोः शीघ्रास्त्रविदुषोर्द्रोणसात्वतयोस्तदा नांतरं शरवृष्टीनां ददृशे न
रसिंहयोः इषूणां संनिपातेन शब्दो धाराभिघातजः शुश्रुवे शक्रमुक्तानामशनीनामिव स्वनः इषुजालावृतं घोरमंधकारं समंततः नाराचैर्व्यति
विद्धानां शराणां रूपमाबभौ आशीविषविदष्टानां सर्पाणामिव भारत तयोर्ज्यातलनिर्घोषः शुश्रुवे युद्धशौंडयोः अजस्रं शैलशृंगाणां
वज्रेणाहन्यतामिव उभयोस्तौ रथौ राजंस्ते चाश्वास्तौ च सारथी रुक्मपुंखैः शरैश्छन्नाश्चित्ररूपा बभुस्तदा निर्मलानामजिह्मानां नाराचानां
विशांपते निर्मुक्ताशीविषाभानां संपातोऽभूत्सुदारुणः उभयोः पतितं छत्रं तथैव पतितौ ध्वजौ उभौ रुधिरसिक्तांगौ उभौ च विजयैषिणौ स्र
वद्भिः शोणितं गात्रैः प्रस्रुताविव वारणौ अन्योन्यमभ्यविध्येतां जीवितांतकरैः शरैः गर्जितोत्क्रुष्टसंनादाः शंखदुंदुभिनिस्वनाः उपारमन्महा
राज व्याजहार न कश्चन तूष्णींभूतान्यनीकानि योधा युद्धादुपारमत् ददृशुर्द्वैरथं ताभ्यां जातकौतूहला जनाः रथिनो हस्तियंतारो हयारोहाः
पदातयः अवैक्षंताचलैर्नेत्रैः परिवार्य नरर्षभौ हस्त्यनीकान्यतिष्ठंत तथानीकानि वाजिनां तथैव रथवाहिन्यः प्रतिव्यूह्य व्यवस्थिताः मुक्ता
विद्रुमचित्रैश्च मणिकांचनभूषितैः ध्वजैराभरणैश्चित्रैः कवचैश्च हिरण्मयैः वैजयंतीपताकाभिः परिस्तोमांगकंबलैः विमलैर्निशितैः
शस्त्रैर्हयानां च प्रकीर्णकैः जातरूपमयीभिश्च राजतीभिश्च मूर्धसु गजानां कुंभमालाभिर्दंतवेष्टैश्च भारत सबलाकाः सखद्योताः सऐरावत एप० ८६

शतक्रतुः ॥ अदृश्यंतोत्पर्याये मेधानामिवबागुराः अपश्यन्नस्मसीयाश्चतेचैषाधिष्ठिराः । स्थिताः तद्युयुधानस्य महात्मनः विमा
नायुतान्देवाश्रासीसमपुरोगमाः सिद्धचारणसंघाश्चविद्याधरमहोरगाः गतप्रत्यागतापेक्षैश्चित्रैरस्त्रविघातिभिः विविधैर्विस्मयंजग्मुस्तयोः
पुरुषसिंहयोः हस्तलाघवमस्त्रेषुदर्शयंतौमहाबलौ अन्योन्यमभिविध्यंतौशरैस्तौद्रोणसात्यकी ततोद्रोणोमहाराज॥ शरैश्छित्वादसंयुग
पत्रिभिः सुदृढैराशुधनुश्चैवमहायुते निमेषांतरमात्रेणभारद्वाजोपरंधनुः सज्जंचकारतदपिचिच्छेदास्यचसात्यकिः ततस्त्वरन्पुनर्द्रो
णोधनुर्हस्तोव्यतिष्ठत सज्जंसज्जंधनुस्तस्यचिच्छेदनवसप्त च ततोस्यसंयुगेद्रोणोदृष्ट्वाकर्मातिमानुषं युयुधानस्यराजेंद्रमनसैतद
चिंतयत् एतदस्त्रबलंरामेकार्त्तवीर्येधनंजये भीष्मेचपुरुषव्याघ्रेयदिदंसात्वतांवरे तंचास्यमनसाद्रोणः पूजयामासविक्रमं लाघवंवासव
[redacted]
[redacted]स्यचसंप्रेक्ष्यद्विजसत्तमः तुतोषास्त्रविदांश्रेष्ठस्तथादेवाःसवासवाः नतामालोकयामासुर्लघुतांशीघ्रचारिणः देवाश्चयुयु
धानस्यगंधर्वाश्चविशांपते सिद्धचारणसंघाश्चविदुर्द्रोणस्यकर्मतत् ततोन्यद्धनुरादायद्रोणः क्षत्रिय
मर्दनः अस्त्रैरस्त्रविदांश्रेष्ठोयोधयामासभारत तस्यास्त्राण्यस्त्रमायाभिःप्रतिहत्यससात्यकिः जघाननिशितैर्बाणैस्तदद्भुतमिवाभव
त् तस्यातिमानुषंकर्मदृष्ट्वान्यैरसमंरणे युक्तंयोगेनयोगज्ञास्तावकाः समपूजयन् यदस्त्रमस्यतिद्रोणस्तदेवास्यतिसात्यकिः तमा
चार्योप्यसंभ्रांतोयोधयच्छत्रुतापनः ततःक्रुद्धोमहाराजधनुर्वेदस्यपारगः वधाययुयुधानस्यदिव्यमस्त्रमुदैरयत् तदाग्नेयंमहा
घोरंरिपुघ्नमुपलक्ष्यसः दिव्यमस्त्रंमहेष्वासोवारुणंसमुदैरयत् हाहाकारोमहानासीद्दृष्ट्वादिव्यास्त्रधारिणौ नविचेरुस्तदाकाशे

द्रो० ८२

भूतान्याकाशगान्यपि अस्त्रैस्तैर्वारुणाग्नेयैस्ताभ्यां बाणाः समाहिताः न ताः कश्चन पश्यति आवर्तंते रथभास्करः ततो युधिष्ठिरो राजा भीमसेनश्च
पांडवः नकुलः सहदेवश्च पर्यरक्षं तमासफिं धृष्टद्युम्नमुखैः सार्द्धं विराटश्च सकेकयः मत्स्याः शाल्वेयसेनाश्च द्रोणमाजग्मुरंजसा दुःशास
नपुरस्कृत्य राजपुत्राः सहस्रशः द्रोणमभ्युपपद्यंत सपत्नैः परिवारितैः ततो युद्धमभूद्राजन् तेषां तव च धन्विनां रजसा संवृते लोके शरजाला
लसमावृते सर्वमाविग्नमभवन्नप्राज्ञायत किंचन सैन्येन रजसा ध्वस्ते निर्मर्यादमवर्तत ॥ ॥ द्रोणपर्वणि जयद्रथवधे संजय उवाच
निवर्तमाने त्वादित्ये तत्रासीच्छिखरं प्रति रजसा कीर्यमाणे च मंदीभूते दिवाकरे तिष्ठतां युध्यमानानां पुनरावर्ततामपि भज्यतां जयतां चै
व जगाम तदहः शनैः तथा तेषु विसक्तेषु सैन्येषु जयदृष्टिषु अर्जुनो वासुदेवश्च सैंधवायैव जग्मतुः रथमार्गं प्रमाणं तु कौंतेयो निशितैः
शरैः चकार तत्र पंथानं ययौ येन जनार्दनः यत्र यत्र रथो याति पांडवस्य महात्मनः तत्र तत्रैव दीर्यंते सेनास्तव विशांपते रथशिक्षां
तु दाशार्हो दर्शयामास वीर्यवान् उत्तमाधममध्यानि मंडलानि विदर्शयत ते तु नामांकिताः पीताः कालज्वलनसंनिभाः स्नायुनद्धाः सु
पर्वाणः पृथवो दीर्घगामिनः वैणवाश्चायसाश्चोग्रा ग्रसंतो विविधानरीन् रुधिरं पतगैः सार्द्धं प्राणिनां पपुराहवे रथस्थितोऽग्रतः क्रो
शं यानस्यत्यर्जुनः शरान् रथे क्रोशमतिक्रांते तस्य ते घ्नंति शात्रवान् तार्क्ष्यमारुतरंहोभिर्वाजिभिः साधुवाहिभिः तथागच्छद्धृषीकेशः कृत्स्नं
विस्मापयन् जगत् न तथा गच्छति रथस्तपनस्य विशांपते नेंद्रस्य न तु रुद्रस्य नापि वैश्रवणस्य च नान्यस्य समरे राजन् गतपूर्वस्तथा रथः
यथा ययावर्जुनस्य मनोभिप्रायशीघ्रगः प्रविश्य तु रणं राजन् केशवः परवीरहा सेनामध्ये हयांस्तांश्चोदयामास भारत ततस्तस्य रथौघस्य म
ध्यं प्राप्य हयोत्तमाः कृच्छ्रेण रथमूहुस्तं क्षुत्पिपासासमन्विताः क्षताश्च बहुभिः शस्त्रैर्युद्धशौंडैरनेकशः मंडलानि विचित्राणि विचेरुस्ते मु

राम० ८२

ऽं हयानां वाजिनागानां रथानां चैव सैनिकैः सह ऽपशिष्टा इति क्रान्ताः शैलाभानां सहस्रशः एतस्मिन्नंतरे वीरा द्वावंभोध्यातौ नृप सह
सैन्येन समायातौ तां पार्थं वंचयित्वाहवे तावर्जुनं ततः षष्ट्या समसायकनादितं शरायणां वशे तस्याश्च विध्यैतां मुदान्वितौ तावर्जुनो महाराजन्
विभिन्नं तत्पृषत्कैः अजघान शरैरनेकै रुक्मपुंखैर्मर्मभेदिभिः ततस्तौ तु शरौघद्वावाम सुसहकेशवं आजाताद्भुतां सर्व्वौ सिंहनादं च
क्रतुः तयोस्तु धनुषी चिच्छेद भल्लाभ्यां श्वेतवाहनः विच्छेद समरे तूणौ ध्वजौ च कनकोज्ज्वलौ अथान्ये धनुषी राजन्प्रगृह्य समरे तदा
पार्थं ववर्षतुः शरसंक्रुद्धौ ववर्षयामासतुः शरैः तयोस्तु कोऽभूच्छरसंक्रुद्धः शराभ्यां पाण्डुनंदनः धनुषी विच्छिदे तूणौ भूयश्च धनंजयः तथान्यैर्विशिखै
स्तूणौ रुक्मपुंखैः शिलाशितैः जघानाश्वांस्ततोस्तौ पार्श्वौ च सपदानुगौ सेच्छत्रं च शिरः कायात्स्मेराननं कृतंतः सपायपातह
तः रथीनां तस्मात्कुद्रुमः विरथं निहतं दृष्ट्वा स्वानुविंदः प्रतापवान् हताश्वं रथमुत्सृज्य गदां गृह्य महाबलः अभ्यवर्त्तत संग्रामे
भ्रातुर्वधमनुस्मरन् गदया रथिनां श्रेष्ठान्सन्निवमहारथः अनुविंदस्तदा रथात्स्वात्मधुसूदने स्पृष्ट्वा नाकंपयत् कुद्धो मैनाक
मिव पर्व्वतं तस्यार्जुनेन शरैः षड्भिर्ग्रीवापादौ भुजौ शिरः निकृत्तो ऽसौ संछिन्नः पपाताद्रिर्यथा यथा ततस्तानिहतौ दृष्ट्वा तयोराज
नुपदानुगाः अभ्यद्रवंत संक्रुद्धा किरंतः शतशः शरान् तानर्जुनः शरैस्तूर्णं निहत्य समरं तर्षभ व्योच तयथावरिष्ठीकं रगच्छाहि मारुत्य
तिपः सेनामतिक्रम्य कृष्णाद्विधनंजयः विबभौ जलदं भित्त्वा दिवाकर इवोदितः तं दृष्ट्वा कुरवस्त्रस्ताः प्रहृष्टाश्चाभवन्नृपः अभ्यवर्त्त
त पार्थं च समंताद्धरतर्षभ आंतं चैव समालभ्य ज्ञात्वा देवं च संधवं सिंहनादेन महता सर्व्वतः पर्य्यवारयन् तांस्तु दृष्ट्वा सुसंरब्धानुस्म
यन्पुरुषर्षभः शनकैरिव दाशार्हमर्जुनो वाक्यमब्रवीत शराहिताश्च ग्लानाश्च हया ह्येते च संयुगे किमिहानंतरं कार्य्यं समापि च तव

रा चैते अहिकृत्तक्षय यातनं तं हि प्राप्ततमः सदा भवंत्येव चार राणश्च त्रूनविनिष्पंतीह पांडवाः ममत्वं नेनरं रूक संपद्येत आमितिबोधमे इत्यादि वि
मुच्य हि स्थितो विशल्यान्कुरु माधव एवमुक्तस्तु पार्थेन केशवः प्रत्युवाच तं ममाप्येतन्मतं पार्थ यदिदं ते प्रभाषितं अर्जुन उवाच
अहमावारयिष्यामि सर्वसैन्यानि केशव त्वमप्यत्र यथान्यायं कुरु कार्यमनंतरं संजय उवाच सोवतीर्य रथोपस्थादसंभ्रांतो ध
नंजयः गांडीवं धनुरादाय तस्थौ गिरिरिवाचलः तमभ्यधावन्क्रोशंतः क्षत्रिया जयकांक्षिणः इदं छिद्रमिति ज्ञात्वा धरणीस्थं ध
नंजयं तमेकं रथवंशेन महता पर्यवारयन् विकर्षंतश्च चापानि विसृजंतश्च सायकान् शस्त्राणि च विचित्राणि क्रुद्धास्तत्र व्यदर्श
यन् छादयंतः स्म पार्थं मेघा इव दिवाकरं अभ्यद्रवंत वेगेन क्षत्रियाः क्षत्रियर्षभं नरसिंहं यथोदाराः सिंहं मत्ता इव द्विपाः तत्र पा
र्थस्य भुजयोर्महद्बलमदृश्यत यत्क्रुद्धो बहुलाः सेनाः सर्वतः समवारयत् अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतो विभुः इषुभिर्बहु
भिस्तूर्णं सर्वानेव समावृणोत् तत्रांतरिक्षे बाणानां प्रगाढानां विशांपते संघर्षच्चार्चिभिर्वीरैः पार्थपांडुर्जयो यं सध्य एकस्थो बहुभिः
क्रुद्धैरुद्धस्वसमजायत रथोर्म्मिणं ध्वजावर्तं नागनक्रं दुरत्ययं पदातिमत्स्यकलिलं शंखदुंदुभिनिस्वनं असंख्येयमपारं च रथो
र्म्मिणामतीवच उष्णीषकमठं छत्रपताकाफेनमालिनं रथसागरमक्षोभ्यं मातंगशिलाचितं वेलाभूतस्तदा पार्थः पत्रिभिः
समवारयत् ततो जनार्दनः संख्यप्रियं युद्धसत्तमेच्य असंभ्रांतो महाबाहुरर्जुनं वाक्यमब्रवीत् उदपानमिहाश्वानां नालमस्ति रणा
र्जुन परीप्संते जलं चैते पेयं न त्ववगाहनं इदमस्तीति संभ्रांतो ब्रुवन्नस्त्रेण मेदिनीं अभिहत्यार्जुनश्चक्रे वाजिपानं सरः शुभं हं
सकारंडवाकीर्णं चक्रवाकोपशोभितं सुविस्तीर्णं प्रसन्नांभः प्रफुल्लवरपंकजं कूर्ममत्स्यगणाकीर्णमगाधमृषिसेवितं आ

गच्छन्त्यास्त्वभुविदृशोनार्थेनकृतंसरागात् शरवंशंशरस्थूणांशराछादनमद्भुतं शरवेश्माकरोत्पार्थस्त्वष्टेवाद्भुतकर्म्मकृत् ततः
प्रहस्यगोविंदः साधुसाध्विसथाब्रवीत् शरवेश्मनिपार्थेनकृतेतस्मिन्महात्मना॥ ॥ इतिद्रोणपर्व्वणिजयद्रथवधे संजयउवाच स
लिलेजनितेतस्मिन्कौंतेयेनमहात्मना निवारितेद्विषत्सैन्येकृतेचशरवेश्मनि वासुदेवोरथात्तूर्णमवतीर्यमहाद्युतिः मोचयामासतु
रगान्वितुन्नान्कंकपत्रिभिः अदृष्टपूर्वंतद्दृष्ट्वासाधुवादोमहानभूत् सिद्धचारणसंघानांसैनिकानांचसर्वशः पदातिनंतुकौंतेयंयु
ध्यमानंमहारथाः नाशक्नुवन्वारयितुंतदद्भुतमिवाभवत् आपतत्सुरथौघेषुप्रभूतगजवाजिषु नासंभ्रमंतदापार्थस्तदस्यपुरुषा
नति व्यसृजंतशरौघांस्तेपांडवंप्रतिपार्थिवाः नचाव्यथतधर्मात्मावासविः परवीरहा शतानिशरजालानिगदाः प्रासांश्चवी
र्यवान् आगतानग्रसत्पार्थः सरितः सागरोयथा अस्त्रवेगेनमहतापार्थोबाहुबलेनच सर्वेषांपार्थिवेंद्राणामग्रसत्तान्शरोत्तमा
न् सपार्थः पार्थिवान्सर्वान्भूमिष्ठोपिरथस्थितान् एकोनिवारयामासलोभः सर्वगुणानिव ततःपार्थस्यविक्रांतंवासुदेवस्यचोभ
योः अपूजयन्महाराजकौरवामहदद्भुतं किमद्भुततरंलोकेभविताप्यथवाप्यभूत् यदश्वान्पार्थगोविंदौमोचयामासतूरणे भयं
विपुलमस्मासुतावधत्तांनरोत्तमौ तेजोविदधतुश्चोग्रंविस्रब्धौरणमूर्द्धनि अथस्मयन्हृषीकेशः स्त्रीमध्यइवभारत अर्जु
नेनकृतेसंख्येशरगर्भगृहेतदा उपावर्त्तयदव्यग्रस्तानश्वान्पुष्करेक्षणः मिषतांसर्वसैन्यानांत्वदीयानांविशांपते तेषांश्रमं
चग्लानिंचवेपथुंवमथुंव्रणान् सर्वंव्यपानुदत्कृष्णः कुशलोह्यश्वकर्म्मणि शल्यानुद्धृत्यपाणिभ्यांपरिमृज्यचतान्हयान् उपावृ
त्ययथान्यायंपाययामासवारिसः सतांल्लब्धोदकान्स्नातान्जग्धान्नान्विगतक्लमान् योजयामाससंहृष्टः पुनरेवरथोत्तमे सतं

द्रो० ८८ रथवरं शौरिः सर्वशस्त्रभृतां वरः समास्थाय महातेजाः सात्यकिः प्रययौ द्रुतं विगाह्याधिगातः पार्थः क्वस्मश्चैसञ्जुकृष्णश्च सर्वक्षत्रस्यमि
षतो रथेनैकेन दंशितौ बालः कौरव्य केनैव एकरथौ कुरुसेनावलं क्षोशयांयतमाना नाना मसंसक्तौ परंतपौ दर्शयित्वात्मनो वीर्यं प्रयातौ सर्व
राजसु तौ प्रयातौ पुनर्दृष्ट्वा तत्रामेसैनिकाब्रुवन् त्वरध्वं कुरवः सर्वे वधे कृष्णकिरीटिनोः रथयुक्तौ हि दाशार्हौ मिषतां सर्वधन्विनां जयद्र
थं प्रयातौ स एकरथौ कुरुसेनारणे तत्र केचिन्मिथो राजन्समभाषन्त भूमिपाः अदृष्टपूर्वं संग्रामे तद्दृष्ट्वा महदद्भुतं सर्वसैन्यानि राजा च धृतराष्ट्र
मयं गतः दुर्योधनापराधेन क्षत्रं कृत्स्ना च मेदिनी विलयं समनुप्राप्ता तत्र राजान बुध्यते इत्येवं क्षत्रियास्तत्र ब्रुवन्त्यन्ये च भारत सिंधुराजस्य
त्क्रसंगतस्य यमसादनं तत्करोतु कृथा दृष्टिर्धार्त्तराष्ट्रो व्यपायवित् ततः शीघ्रतरं प्रायात्पाण्डवः सैन्धवं प्रति विवर्त्तमाने तिग्मांशौ हृष्टैः
पीतोरकैर्हयैः तं प्रयान्तं महाबाहुं सर्वशस्त्रभृतां वरं नाशक्नुवन्वारयितुं योधाः क्रुद्धमिवान्तकं विद्राव्य तु ततः सैन्यं पाण्डवः शत्रुतापनः
यथा मृगगणान्सिंहः सैन्धवार्थे व्यलोडयन् गाहमानस्तु दाशार्हः पांचजन्यं व्यनादयत् कौन्तेयेनाग्रतः सृष्टाः न्यपतन्पृष्ठतः शरा
तूर्णात्तूर्णतरं ह्यश्वाः प्रावहन्वातरंहसः ततो न्यपतयः क्रुद्धाः परिवव्रुर्धनंजयं क्षत्रिया बहवश्चान्ये जयद्रथवधैषिणः सैन्येषु
विप्रयातेषु धिष्ठितेषु नरर्षभ दुर्योधनोऽन्वगात्पार्थं त्वरमाणो महाहवे वातोद्धूतपताकं तं रथं जलदनिस्वनं घोरं कपिध्वजं दृष्ट्वा विष
ण्णा रथिनोभवन् दिवाकरेथ रजसा सर्वतः संवृते भृशं शरार्ताश्च रणे योधाः शक्ताः कृष्णौ न वीक्षितुं द्रोणपर्वणि जयद्रथवधे संजय
उवाच अंशं तस्य च मज्जान स्तावका नाभयान्नृप तौ दृष्ट्वा समतिक्रान्तौ वासुदेवधनंजयौ सर्वे तु प्रतिसंरब्धा ह्रीमन्तः सत्वचोदिताः
स्थिरीभूता महात्मानः प्रत्यगच्छन्धनंजयं ये गताः पाण्डवं युद्धे रोषामर्षसमन्विताः तेद्यापि न निवर्तन्ते सिन्धवः सागरादिव असन्तस्तु द्रो० ८८

सर्वंतेतेर्वेदमश्शुनास्तिकाः नरकंमज्जमानानास्तेभस्मपद्यतकिल्बिषं तावतीसरथानीकंवर्तेतेपुरुषर्षभौ दृश्यतेयथाराहोरास्यान्मु
क्तोप्रभाकरो मत्स्यात्क्रिव्महाजालंविदार्यविगतक्लमो तथाकृष्णावदृश्येतांसेनाजालंविदार्यतत विमुक्तौशस्त्रसंबाधात् द्रोणानीका
त्सुदुर्भिदात् अदृश्येतांमहात्मानौकालसूर्याविवोदितौ अस्त्रसंबाधनिर्मुक्तौविमुक्तौशस्त्रसंकटात् अदृश्येतांमहात्मानौशत्रु
संबाधकारिणौ विमुक्तौज्वलनस्पर्शान्मकरास्यात्झषाविव अक्षोभयेतांसेनांतौसमुद्रंमकराविव तावकास्तवपुत्राश्चद्रोणा
नीकस्थयोस्तयोः नैतौतरिष्यतोद्रोणमितिचक्रुस्तदामतिं तौतुदृष्ट्वाव्यतिक्रांतौद्रोणानीकंमहाद्युती नाशशंसुर्महाराजसिं
धुराजस्यजीवितं आशाबलवतीराजन्सिंधुराजस्यजीविते द्रोणहार्दिक्ययोः कृष्णौनमोक्ष्येतेइतिप्रभो तामाशांविफलीकृत्य
संतीर्णौतौपरंतपौ द्रोणानीकंमहाराजभोजानीकंचदुस्तरं अथदृष्ट्वाव्यतिक्रांतौज्वलिताविवपावकौ निराशाः सिंधुराजस्यजी
वितंनाशशंसिरे मिथश्चसमभाषेतामभीतौभयवर्द्धनौ जयद्रथवधेवाचस्तास्ताः कृष्णधनंजयौ असौमध्येकृतः षड्भिः धार्त्तराष्ट्रै
र्महारथैः चक्षुर्विषयसंप्राप्तोनमेमोक्ष्यतिसैंधवः यद्यस्यसमरेगोप्ताशक्रोदेवगणैःसह तथाप्येनंनिहंस्यावइतिकृष्णावभाषतां
इतिकृष्णौमहाबाहूमिथः कथयतांतदा सिंधुराजमवेक्षंतौतत्सत्वावहुंकुरुः अतीत्यसमरूधेचाभयानौ तर्षितौगजौ पीत्वावारिस
मास्वस्तौतथैवास्तामरिंदमौ व्याघ्रसिंहगजाकीर्णानतिक्रम्यचपर्वतान् वणिजाविवदृश्येतांहीनमृत्यूजरातिगौ तथाहिमुखवर्णोय कह
मनयोरितिमेनिरे तावकावीक्ष्यमुक्तौतौविक्रोशंतः [redacted]
[redacted] स्मसर्वतः द्रोणाशीविषाकाराज्ज्वलितादिवपावकात् अन्येभ्यः पार्थिवेभ्यश्चभास्वंतौ

ऋषाः सहशोरसो उद्भिन्नरुधिरौ कृष्णौ समारद्धाजस्य दृश्यपश्यके. सिनौ छिन्नौ व्यरोचेतां कर्णिकारैरिवाचलौ द्रोणग्राहह्रदा २४

द्रो० १०० तगा३ विवमास्करे विमुक्तोसागरस्सोद्रोणानीकाद्दुरिंदमो अदृश्येतांमुदायुक्तौसमुत्तीर्योर्णवंयथा अस्त्रौघान्महतोमुक्तौद्रोणा
द्धार्दिक्यरक्षितात गच्छमानावदृश्येतांदृष्ट्वामुक्तौशस्त्राशीविषसंकटात अयः शिरायमकरात क्षत्रियप्रवरांमसः सोक्षोषतलनिक्षे
रौ रश्मिस्तिग्मशर्षियुतः द्रोणास्त्रमेघान्निमुक्तौसूर्यहृतिमिराद्दिव वाहुभ्यामिवसंत्तीर्णौ सिंधुषष्ठाः समुद्रगाः तपांतेसरितः पूर्णामहा
ग्राहसमाकुलाः इतिकृष्णौमहेष्वासौयशसालोकविश्रुतौ सर्वभूतान्यमन्यंतद्रोणास्त्रबलविस्मयात् जयद्रथसमीपस्थमेव
रुक्तौजिघांसया रुरुंनिपातेलिप्संतौव्याघ्रव[illegible]न्नावतिष्ठतौ यथाहिमुखवर्णोयमनयोरितिमेनिरेतवयोधामहाराजहतमेवजय
द्रथं लोहिताक्षोमहाबाहुस्संयुक्तौकृष्णपांडवौ सिंधुराजमभिप्रेक्ष्यहृष्टोव्यनदन्मुहुः शौरेरश्मीषुहस्तस्यपार्थस्यचधनुष्मतः तयो
रासीत्प्रभाराजन्सूर्यपावकयोरिव हर्षप्रवृत्तयोरासीद्द्रोणानीकप्रमुक्तयोः समीपेसैंधवंदृष्ट्वाश्येनयोरामिषंयथा तौतुसैंधवमा
लोक्यक्रममानमिवांतिके सहसापेततुः क्रुद्धौक्षिप्रंश्येनाविवामिषे तौदृष्ट्वाव्यतिक्रांतौहृषीकेशधनंजयौ सिंधुराजस्यरक्षार्थं
पराक्रांतः सुतस्तव द्रोणेनाबद्धकवचोराजादुर्योधनस्ततः ययावेकरथेनाजौहयसंस्कारवित्प्रभो कृष्णपार्थौमहेष्वासौव्यतिक्र
म्याथतेसुतः अग्रतः पुंडरीकाक्षंप्रतीयायनराधिपः ततः सर्वेषुसैन्येषुवादित्राणिप्रहृष्टवत् प्रावाद्यंतव्यतिक्रांतेतवपुत्रेधनंजयं
सिंहनादरवाश्चासन्शंखशब्दविमिश्रिताः दृष्ट्वादुर्योधनंतत्रकृष्णयोः प्रमुखेस्थितं येचतेसिंधुराजस्यगोप्तारः पावकोपमाः तेप्रहृ
ष्यंतसमरेदृष्ट्वापुत्रंतवप्रभो दृष्ट्वादुर्योधनंकृष्णोव्यतिक्रांतंसहानुगं अब्रवीदर्जुनंराजन्प्राप्तकालमिदंवचः ॥ ॥ इतिद्रो
णपर्वणिजयद्रथवधे वासुदेवउवाच दुर्योधनमतिक्रांतं[illegible]मेनंपश्यधनंजय आश्चर्यमिमंमन्येनास्त्यस्यसदृशोरथः दूरे द्रो० १००

पार्तो महेष्वासः कृतास्त्रो युद्धदुर्मदः दृष्टास्त्रश्चित्रयोधी च धत्ते राष्ट्री महाबलः अतंतसुवसंदृष्टो मेनितश्च महारथः क्लीनीवसमत
तेपार्थनिसंदृष्टे शिवबांधवान् तेनयुद्धमहंसम्प्राप्तकालं तवानघ अनेनाश्रुतमापातं विसर्जयेतरायव अत्र क्रोधविषं पार्थ विमुंचवि
रसंस्मृतं त्वमर्जुनमनाथानां पांडवानां महारथः सोयंप्राप्तमलवाक्षेपेपरुषप्राप्तफसमात्मनः कथंहि राज्ञा राज्यार्थोतिमागच्छेतेहयुद्धां
दिष्ट्यासि राज्ञी संग्रामस्तव पार्थ स्थयांतिके जयेनैतं महाबाहो यथा शक्रं पुरंदरः एषस्त्वनर्थः सूततं पराक्रांतस्तवानघ निष्क्र
साधर्मराजं च धृष्टे तेवं वितवानयं बहूनि सहदृशं स्मानि कृत्वानि तेन मानद सुप्तासुप्तप्रमतिना अन्यपापेषु वनिसरा तमनार्येसरासु
दुपुरूपकामस्तुपिरां आर्यो युद्धप्रतिक्षेत्वां जहि पार्थ विचारयन् निकृत्य राज्यहरणं वनवासं च यं चरेत् परिक्लेशं च कृष्णायाः
त्वदिकृत्वा पराक्रमं दिष्ट्या प्रतवशराणां गांवैर परिविध्ते प्रविविष्या तायकार्यसिद्धिः दिष्ट्या वर्तते तथा ततः दिष्ट्या जानाति संग्रामे योद्धुं
शंहित्यायामह दिष्ट्या च समफलाः पार्थ सर्वे कामास्य कामिताः तस्मात् जहि रणे पार्थ यान्ते रथं कुलाधमं यथैन्द्रा ह तः पूर्वं जंभो
रम ५ देवासुरे अस्मिन्हते त्वया सैन्यमनार्थाभियतामिदं वैरस्यास्त्वव भयोमूलं छिंधि दुरात्मना संजय उवाच ततस्तथैसमुद्रीसाथः
कृतसनृपमिरंमम सर्वमन्दना हंसगच्छपन्ने सुप्रयाथवनः येनैनत्तीर्थकालं नाभुक्तं पराममंकरेव अप्यस्य युधिविक्रमं छिंधि यामृ
ह्यानमाहवे अपितस्मात्वम्नरोयाः परिक्लेशसमाधव कृष्णायाः शक्रुपांतुपरक्लेशम्प्रधर्षितो इत्येवं चारिनो कृष्णो हृष्टे
स्थितानहृष्यानमान् प्रेषयामास तु संलोमे सैनातु नराधिपं तपोः समीपसंप्राप्य अवलोम ग रतषेभ नचकारभयं प्राप्तं भयेमह
तिमारिषतरस्य सवित्रियास्त्रं सर्वेश्वाप्रयुजयन यदर्जुनहृषीकेशौ प्रसुधौतो न्यवारयत ततः सर्वसैन्यसमस्तावकस्यावि

स्या ५

३।

न१ ष१

द्रो० १०१ शांपते महानासीत्सभूतेहृष्ट्वा राजानमाहवे तस्मिन्नजन्मसमुत्तारेसमेत्तेभस्मसवति कुद्धयोःकृसेतेपुत्र प्रसमिजवासयत आवारितस्तु कौ
तेयस्तवपुत्रेणाधन्विना संरंभमगमत्कृष्णः सचतस्मिन्परंतप ताहृष्ट्वाप्रतिसंरब्धौ दुर्योधनधनंजयौ आर्प्रेवेक्षंतराजानो भीमरूपाः समंततः
दृष्ट्वातुपार्थंसंरब्धंवासुदेवंचमारिष प्रहसन्नेवपुत्रस्तेयोद्धुकामःसमाह्वयत्ततोग्रहृष्टोदाशार्हः पांडवश्चधनंजयः प्राक्रोशतांमहा
नादंदध्मतुश्चांबुजोत्तमौ तौतुहृष्टप्रौसंप्रेक्ष्यकौरवेयास्तुसर्वशः निराशाःसमपद्यंतपुत्रस्यतवजीविते शोकमीयुःपरेचैवकुरवःस
र्वएवते अमन्यंतचपुत्रंतेवैश्वानरमुखेहुतं तथातुहृष्ट्वायोधास्तेप्रहृष्टौकृष्णपांडवौ हतोराजाहतोराजेतिचुक्रुशुर्भयार्दिताः जन
स्यसंनिनादंतुदृष्ट्वादुर्योधनोब्रवीत् व्येतुवोभीरहंकृष्णौप्रेषयिष्यामिमृत्यवे इत्युक्त्वासैनिकान्सर्वान्जयापेक्षीनराधिपः पार्थ
माभाष्यसंरंभादिदंवचनमब्रवीत् पार्थयच्छिक्षितंतेस्त्रंदिव्यंपार्थिवमेवच तद्दर्शयमयिक्षिप्रंयदिजातोसिपांडुना यद्बलंतवकृष्ण
वकेशवस्यतथैवच तत्कुरुष्वमयिक्षिप्रंपश्यामस्तवपौरुषं असमक्षंकर्माणिकृतानिप्रवदंतिते स्वामिसत्कारयुक्तानियानिता
नीहदर्शय॥ ॥ इतिद्रोणपर्वणिजयद्रथवधे संजयउवाच एवमुक्त्वार्जुनंराजात्रिभिर्मर्मातिगैः शरैः अभ्यविध्यन्महावेगैश्च
तुर्भिश्चतुरोहयान् वासुदेवंचदशभिःप्रत्यविध्यत्स्तनांतरे प्रतोदंचास्यभल्लेनछित्वाभूमावपातयत् तंचतुर्दशभिःपार्थश्चित्रपुं
खैःशिलाशितैः अविध्यत्तूर्णमव्यग्रस्तेचाभ्रश्यंतवर्मणः तेषांनैःफल्यमालोक्यपुनर्नवचपंचच प्राहिणोन्निशितान्बाणांस्तेचा
भ्रश्यंतवर्मणः अष्टाविंशत्तुतान्बाणानस्तान्विप्रेक्ष्यनिःफलान् अब्रवीत्परवीरघ्नःकृष्णोर्जुनमिदंवचः अदृष्टपूर्वंपश्यामिशिलाना
मिवसर्पणं त्वयासंप्रेषिताःपार्थनार्थंकुर्वंतिपत्रिणः कच्चिद्गांडीवंप्राणास्तथैवभरतर्षभ मुष्टिश्चतेयथापूर्वंभुजयोश्चबलंतव एम०

१०१

शत्रोभ्रातस्समायस्तत्रपञ्चभूतः विस्मयो मे महान् पार्थ तव दृष्ट्वा भवतिमान् अर्थात्विपतितान् दृष्ट्वा दुर्योधनस्यप्रति वदना १ ग्रं:

ववाकश्चिरयंकालः प्रातः स्मारयपश्चिमः तवैवबाणाशनिस्समाघोराः परकायावभेदिनः शराः कुर्वन्तितेनायंपार्थकार्यविदेव
ना अर्जुनउवाच द्रोणानेयमतिः कृष्णधार्त्तराष्ट्रैर्निवेशिता अभेद्याहिमयाल्याणामेषाकवचधारणा अस्मिन्नन्तर्हितंकृष्णत्रैलो
क्यमपिकर्म्मणाएकेद्रोणाहिवेदतत्तरहंतस्माच्चसत्तमात नशक्यमेतत्कवचंबाणैर्भेत्तुंकथंचन अपिवज्रेणगोविन्दस्वयंमघव
तायुधिजानंस्त्वमपिवैकृष्णमांविमोहयसेकथं यद्वृत्तंत्रिषुलोकेषुयच्चकेशववर्त्ततेतथाभविष्यंयच्चैवतत्सर्वंविदितंतव नत्विदंवे
दकश्चिद्यथात्वंमधुसूदन सैषदुर्योधनः कृष्णद्रोणेनविहितामिमां तिष्ठत्यभीतवत्संख्येबिभ्रत्कवचधारणां यत्त्वत्रविहितंकार्यंनैनत्त
द्वेत्तिमाधव स्त्रीवदेषबिभर्त्त्येतांयुक्तांकवचधारणां पश्यबाह्वोश्चमेवीर्यंधनुषश्चजनार्दन पराजयिष्येकौरव्यंकवचेनापिरक्षितं इद
मंगिरसेप्रादाद्देवेशोवर्म्मभास्वरं तस्माद्बृहस्पतिः प्रायततः प्रापपुरंदरः पुनर्ददौसुरपतिर्मह्यंवर्म्मससंग्रहं दैवंयद्यस्यवर्म्मैतत्ब्रह्मणा
वासयंकृतं नैतद्गोप्स्यतिदुर्बुद्धिमद्यबाणहतंमया संजयउवाच एवमुक्त्वार्जुनोबाणानभिमंत्र्यव्यकर्षयत विकृष्यमाणांस्तेनैवंधनु
र्मध्यगतांश्छरान् तानस्यास्त्रेणचिच्छेददद्रौणिः सर्वास्त्रघातिना तान्निकृत्तानिषून्दृष्ट्वादूरतोब्रह्मवादिना न्यवेदयत्केशवायविस्मि
तः श्वेतवाहनः नैतदस्त्रंमयाशक्यंद्विःप्रयोक्तुंजनार्दन अस्त्रंमामेवहन्याद्धिहन्यात्पिबलंमम ततोदुर्योधनः कृष्णौनवभिर्नतपर्वभिः
शरैः अविध्यत्तरणाराजनशरैराशीविषोपमैः भूयएवाभ्यवर्षच्चसमरेकृष्णपाण्डवौ शरवर्षेणमहताततोहृष्यंततावकाः चक्रुर्वा
दित्रनिनदान्सिंहनादरवांस्तथा ततः क्रुद्धोरणेपार्थः सृक्किणीपरिसंलिहन् नापश्यत्ततोगात्रंयन्नस्याद्वर्मरक्षितं ततोऽस्यनि
शितैर्बाणैः सुमुक्तैरन्तकोपमैः हयांश्चकारनिर्देहानुभौचपार्ष्णिसारथी धनुरस्याच्छिनच्चित्रंहस्तावापंचखोल्पवान् रथंचशकली

द्रो० कौंतेयमभ्यमाद्द्रौणिःप्रचक्रमे दुर्योधनं च बाणाग्नांती कृष्णाभ्यां विरथोकृतं अविध्यदस्ततलेपार्थः भूपी रज्जेनलदा तेकृष्णामापरं प्राप्तं द्र
१०२ ष्ठाणरमधर्विनः तमापेतुः पंगासंतोधनंजय शरादितं तेरथैर्बहुसाहस्रैः कल्पितैः कुंजरैर्हयैः पदातिसंघैश्च मरब्धैः परिवव्रुर्धनंजयं अथ
नाक्तैर्नगैर्विविशेनरथोवाप्यदृश्यत अस्त्रवर्षेण महता जनौघैश्चापि संवृतौ ततोर्जुनोस्त्रवीर्येण निजघ्नेतां वरूथिनी तत्रयं गोकृताः
पेतुः शतशोथरथद्विपाः तेहतास्समाजाग्नमगरद्हं स्तरथोत्तमं सरथस्तंभितस्तस्थौ कोशमात्रे समंततः ततोर्जुनं वृष्णिवीरस्त
रितोवाक्यमब्रवीत् धनुर्विस्फारयात्यर्थमहंध्मास्यामि चांबुजं ततो विस्फार्यबलवद्गांडीवं जघ्निवानरिपून् महता शरवर्षेण तल
शब्देनचार्जुनः पांचजन्यं च बलवान्दध्मौ तारेण केशव रजसा ध्वस्तपक्ष्मांतः प्रस्विन्नवदनो भृशं तस्य शंखस्वनादेन धनुषो निस्व
नेन च निःसत्त्वाश्च ससत्त्वाश्च क्षितौ पेतुस्तदाजनाः तैर्विमुक्तोरथोरेजे वायुरिताद्दवांबुदः जयद्रथस्य गोप्तारस्ततः सुक्षुब्धाः सहानुगाः तेदृ
ष्ट्वा सहसा पार्थं गोप्तारः सैंधवस्य तु चक्रुर्नादान्महेष्वासाः कंपयंतो वसुंधरां बाणशब्दरवांश्चोग्रान्विमिश्रान्शंखनिस्वनैः प्रादुश्चक्रु
र्महात्मानः सिंहनादरवानपि तच्छ्रुत्वानिनदंघोरं तावकानां समुच्छ्रितं प्रदध्मतुः शंखवरौ वासुदेवधनंजयौ तेन शब्देन महता पूरि
तेयं वसुंधरा सशैला सार्णवद्वीपा सपाताला विशांपते सशब्दोभरतश्रेष्ठव्याप्य सर्वा दिशो दश प्रतिसस्वान तत्रैव कुरुपांडवयोर्बले
तावकारथिनस्तत्र दृष्ट्वा कृष्णधनंजयौ संभ्रमं परमं प्राप्तास्त्वरमाणामहारथाः अथ कृष्णौ महाभागौ तावकादृश्य दंशितौ अ
भ्यद्रवत संक्रुद्धास्तदद्भुतमिवाभवत् ॥ ॥ द्रोणपर्वणिजयद्रथवधे संजय उवाच तावकाहि समीक्ष्यैव वृष्ण्यंधककुरूत्तमौ द्रो०
१०२

(सु२

गागत्त्वरन्तिघांमंतस्तथैवविजयः परान् सुवर्णचित्रैर्वैयाघ्रैः स्वनवद्भिर्महारथैः दीपयंतोदिशः सर्वाः नवद्भिरिवपावकैः हकन
पृष्ठैः मनैः कार्मुकैः पृथिवीपते कुंजरैरिवतुलान्सान्प्रकोपितैस्तुरंगैरिव भूरिश्रवाः शल्यः कर्णोवृषसेनोजयद्रथः कृपश्च
मद्रराजश्च द्रोणश्च रथिनांवरः ते पिबंतस्तदाकाशमश्वैरेष्टैर्महारथाः व्यराजयन्नरश्रेष्ठा वैयाघ्रैर्हेमचंद्रकैः तेरशिताः सुसंरब्धाः
रथमेघौघनिस्वनैः समावृण्वन्नरश्रेष्ठाः दिशः पार्थस्यनिशितैः शरैः कुलीनाश्चहयाश्चित्रावहंतस्तान्महारथान् अशोभंततदा
शीघ्रादीपयंतोदिशोदश आजानेयमहावेगैर्नानादेशसमुत्थितैः पार्वतीयैर्नदीजैश्च सैंधवैश्चहयोत्तमैः कुरुयोधवराराजंस्त
वपुत्रंपरीप्सवः धनंजयरथंशीघ्रंसर्वतः समुपाद्रवन् तेप्रगृह्यमहाशंखान्दध्मुः पुरुषसत्तमाः पूरयंतोदिवंराजन्पृथिवींच
ससागरां तथैवदध्मतुः शंखौवासुदेवधनंजयौ प्रवरौसर्वदेवानांसर्वशंखवरौभुवि देवदत्तंचकौंतेयः पांचजन्यंचकेशवः
शब्दस्तुदेवदत्तस्यधनंजयसमीरितः पृथिवींचांतरिक्षंचदिशश्चैवसमाहृणोत् तथैवपांचजन्योपिवासुदेवसमीरितः सर्वश
ब्दानतिक्रम्यपूरयामासरोदसी तस्मिंस्तथावर्तमानेदारुणेनादसंकुले भीरूणांत्रासजनने शूराणांहर्षवर्धने प्रवादितासुभे
रीषुझर्झरेष्वानकेषुच मृदंगेषुचराजेंद्र वाद्यमानेष्वनेकशः महारथाः समाहूताः दुर्योधनहितैषिणः अमृष्यमाणास्तंशब्दंक्रुद्धाः
परमधन्विनः नानादेश्यामहीपालाः स्वसैन्यपरिरक्षिणः अमर्षितामहा [redacted] शंखान्दध्मुर्वीरामहारथाः कृतेप्रतिक
रिष्यंतः केशवस्यार्जुनस्यच बभूवतत्सैन्यंशंखशब्दसमीरितं उद्विग्नरथनागाश्वमस्वस्थमिववाविभो तत्सविहगमिवाका
शंशब्दैः शंखविनादितं बभूवभृशमुद्विग्नंनिर्घातैरिवनादितं [redacted] मश्रवः सुमहाबाणनदिशः सर्वास

वत२ क२

द्रो० नाद्दयन् व्यामयामास तं सैन्यं पुंगां तरवसंम्लकः ततो दुर्योधनो द्रोण राजा न स्तोमहारथाः जयद्रथस्य रक्षार्थं पांडवं पर्य्यवारयन् त
तो द्रौणिस्त्रिभिर्बाणैर्वासुदेवमताडयत् अर्जुनं चाष्टभिर्भल्लैः ध्वजं मध्या च पंचभिः तमर्जुनः पृषत्कानां शतेन षष्टिरताडयत्तस्य षष्टिभि
१०४ वक्रुद्धः प्रतिविद्धेऽजनार्दन कर्णां मद्रेशाभिर्विद्धा षट्सेनांत्रिभिस्तथा शल्यस्य मद्राराजं चापमुष्टौ व्यच्छेदवीर्यवान गृहीत्वा धनुरन्यत्त
शल्यो विव्याध पांडवं भूरिश्रवा त्रिभिर्बाणैर्हेमपुंखैः शिलाशितैः कर्णो द्वात्रिंशता चैव वृषसेनस्त्रिभिः जयद्रथस्त्रिसप्तत्या
कृपश्च दशभिः शरैः मद्रराजश्च दशभिर्विव्याध फाल्गुनं रणे ततः शरमयीं वृष्टिं द्रौणिः पार्थमवाकिरत वासुदेवं च विंशत्या
पुनः पार्थं च पंचभिः प्रहसंस्तु नरव्याघ्रः श्वेताश्वः कृष्णसारथिः प्रत्यविध्यत्ततान्सर्वान् दर्शयन् पाणिलाघवं कर्णं द्वादश
भिर्विद्धा वृषसेनं त्रिभिः शरैः शल्यस्य सशरं चापं मुष्टिदेशेऽच्छिनत्तत सोमदत्तिं त्रिभिर्विद्धा शल्यं च दशभिः शरैः शरैस्तीक्ष्णैः शि
त्वा कौरवं द्रौणिं विव्याध चाष्टभिः गौतमं पंचविंशत्या सैन्धवं च शतेन ह पुनर्द्रौणिं च सप्तत्या शराणां सोऽभ्यताडयत भूरिश्रवास्त
संक्रुद्धः प्रतोदं चिच्छिदे हरेः अर्जुनं च त्रिसप्तत्या बाणानामाजघान ह ततः शरशतैस्तीक्ष्णैस्तानरीन्श्वेतवाहनः प्रत्यषेधन्द्रु
तं क्रुद्धो महावातो घनानिव ॥ ॥ इति द्रोणपर्वणि जयद्रथवधे ॥ धृतराष्ट्र उवाच ध्वजान्बहुविधाकारान् भ्राजमानानतिश्रिया
पार्थानां मामकानां च तन्ममाचक्ष्व संजय संजय उवाच ध्वजान्बहुविधाकारान्शृणु तेषां महात्मनां रूपतो वर्णतश्चैव नाम
तश्च निबोध मे तेषां तु रथमुख्यानां रथेषु विविधा ध्वजाः प्रत्यदृश्यंत राजेंद्र ज्वलिता इव पावकाः कांचनाः कांचनापीडाः
कांचनस्रगलंकृताः कांचनानां च शृंगाणि कांचनस्य महागिरेः अनेकवर्णा विविधा ध्वजाः परमशोभनाः ते ध्वजाः सं एम० १०३

वृतास्तेषां पताकाभिः समंततः नानावर्णाविरागाभिर्विबभुः सर्वतो वृताः पताकाश्च ततस्तास्तु श्वसनेन समीरिताः नृत्यमाना
व्यदृश्यंत रंगमध्ये विलासिकाः इंद्रायुधसवर्णाभाः पताका भरतर्षभ दोधूयमाना रथिनां शोभयंति महारथान् सिंहलांगूलमुग्रा
स्यं ध्वजं वानरलक्षणं धनंजयस्य संग्रामे प्रत्यदृश्यत भैरवं स वानरवरो राजन् पताकाभिरलंकृतः त्रासयामास तत्सैन्यं ध्वजो गांडीवध
न्वनः तथैव सिंहलांगूलं द्रोणपुत्रस्य भारत ध्वजाग्रं समपश्याम बालसूर्यसमप्रभं कांचनं पवनोद्धूतं शक्रध्वजसमप्रभं नंदनं कौ
रवेंद्राणां द्रौणेर्लक्ष्म समुछ्रितं हस्तिकक्ष्या पुनर्हैमी बभूवाधिरथेर्ध्वजे आहवे खं महाराज ददृशे पूरयन्निव पताका कांच
नी स्रग्वी ध्वजे कर्णस्य संयुगे नृत्यतीव रथोपस्थे श्वसनेन समीरिता आचार्यस्य तु पांडूनां ब्राह्मणस्य तपस्विनः गोवृषो गोतम
स्यासीत्कृपस्य सुपरिष्कृतः स तेन भ्राजते राजन् गोवृषेण महात्मवान् त्रिपुरघ्नरथो यद्वद्गोवृषेण विराजता मयूरो वृषसेन
स्य कांचनो मणिरत्नवान् व्याहरिष्यन्निवातिष्ठत्सेनाग्रमुपशोभयन् तेन तस्य रथो भाति मयूरेण महात्मनः यथा स्कंदस्य राजेंद्र मयू त५
रेण विराजता मद्रराजस्य शल्यस्य ध्वजाग्रेऽग्निशिखामिव सौवर्णीं प्रतिपश्याम सीतामप्रतिमां शुभां सा सीता भ्राजते तस्य रथमास्थाय मारिष
सर्वबीजविरूढेव यथा सीता श्रिया वृता वराहः सिंधुराजस्य राजतो वै विराजते ध्वजाग्रे लोहितार्काभो हेमजालपरिष्कृतः शुशुभे केतुना तेन राज
ते जयद्रथः यथा देवासुरे युद्धे पुरा पूषा स्म शोभते सोमदत्तेः पुनर्यूपो यज्ञशीलस्य धीमतः ध्वजः सूर्य इव भाति सोमश्चात्र प्रदृश्यते स
यूपः कांचनो राजन् सोमदत्तेर्विराजते राजसूये मखश्रेष्ठे यथा यूपः समुछ्रितः शल्यस्य तु महाराज राजतो द्विरदो महान् केतुः कांचनचि
त्रांगैर्मयूरैरुपशोभितः स केतुः शोभयामास सैन्यं ते भरतर्षभ यथा श्वेतो महानागो देवराजचमूं तथा नागो मणिमयो राज्ञो

एञ२

नरे ५

द्रो० ध्वजः कनकसंछन्नः किंकिणीशतमंडितः सौधाज्जंश्चित्ररथोत्तमे अथ जलनसंकाशं गजनेपुअश्वत्थविशांपते ध्वजेनमहतासंख्येकुरू
१०४ णामृषभस्तदा नैवेतेतत्ववाहिन्यामुछ्रिताः परमध्वजाः अदीपयंस्तेश्वतनायुगांतादित्यसंनिभाः दृशमस्यार्जुनस्यासीदेक एव महा
कपिः अदीप्यतार्जुनोयेनहिमवानिववह्निना ततश्चित्राणिशुभ्राणि सुमहांतिमहारथाः कार्मुकाण्यादिदुस्त्राणामर्जुनार्थपरंत
पाः तथैवधनुरायछत्सार्थः शत्रुविनाशनः गांडीवंदिव्यकर्माततेराजनहूंमंत्रितेनवत्तवापराधाद्राजानोनिहताबहुशांयुधि नाना
दिग्भ्यःसमाहृताः महयाः मत्रय (?) द्विपाः तेषामासीघ्यतिक्षेपागर्जतांपितरं दुर्योधनमुखानांचपार्थानामृषभस्यच तत्राद्भुतंपरं
चक्रेकौंतेयः कृष्णसारथिः यदेकोबहुभिः सार्द्धंसमागच्छदभीतवत अशोभतमहाबाहुर्गांडीवंविक्षिपनधनुः जिगीषुस्तान्न
रव्याघ्रोजिघांसुश्चजयद्रथंतत्रार्जुनोनरव्याघ्रः शरैर्मुक्तैः सहस्रशः अदृश्यांस्तावकान्योधानभ्यचक्रेशत्रुतापनः ततस्तेपिन
रव्याघ्राः पार्थंसर्वेमहारथाः अदृश्यंसमरेचक्रुःसायकौघैःसमंततः संवृतेनरसिंहैस्तैःकुरूणामृषभेर्जुने महानासीत्समुद्र
स्तस्यसेनस्यनिस्वनः ॥ ॥ द्रोणपर्वणिजयद्रथवधे धृतराष्ट्रउवाच अर्जुनेसैंधवंप्राप्तेभारद्वाजेनसंवृताः पांचालाःकुरुभिःसार्द्धं
किमकुर्वतसंजय संजयउवाच अपराह्णेमहाराजसंग्रामेलोमहर्षणे पांचालानांकुरूणांचद्रोणद्यूतमवर्तत पंचालाहिजिघांस
तोद्रोणंसंहृष्टचेतसः अभ्यमुंचंतगर्जंतः शरवर्षाणिमारिष ततस्तुतुमुलस्तेषांसंग्रामोवर्ततादद्भुतः पंचालानांकुरूणांचघोरो
देवासुरोपमः सर्वेद्रोणरथंप्राप्यपांचालाः पांडवैःसहतदनीकंबिभित्संतोमहास्त्राणिव्यदर्शयन द्रोणस्यरथपर्यंतंरथिनोरथमा
स्थिताः कंपयंतोभ्यवर्त्तंतवेगमास्थायमध्यमं तमभ्ययाद्बृहत्क्षत्रः केकयानांमहारथः प्रवपन्निशितान्बाणान्महेंद्राशनिसन्निभा द्रो०
१०४

न तं तु मसृष्येद्योशीघ्रं क्षेमधूर्तिर्महायशाः विमुंचन्निशितान्बाणान्शतशोथ सहस्रशः धृष्टकेतुश्च चेदीनां ऋषभोतिबलो दि-
तः त्वरितोभ्यद्रवद्द्रोणं मैरेहरवर्शबरं तमापतंतं सहसा व्याघ्रं ताम्रमिवांतकं वीरधन्वा महेष्वासस्त्वरमाणः समभ्ययात् धृष्टके-
तुं महाभागं द्रोणोध्युपालिपराक्रमी युधिष्ठिरं महाभागं जिगीषुं समवस्थितं सहानीकं ततो द्रोणान्निवारयत वीर्यवान् नकुलं कुशलं यु-
द्धे पराक्रांतं पराक्रमी अभ्यगच्छत्समायांतं विकर्णस्ते सुतः प्रभो सहदेवं तथायांतं दुर्मुखः शत्रुकर्षणः शूरैरनेकसाहस्रैः सम-
वाकिरदाशुगैः सात्यकिं तु नरव्याघ्रं व्याघ्रदत्तस्त्ववारयत् शरैः सुनिशितैस्तीक्ष्णैः कंपयन्वै मुहुर्मुहुः द्रौपदेयान्नरव्याघ्रान्मुंचतः सा-
यकीन्नृमान संरब्धान्त्वयिनः श्रेष्ठान्सोमदत्तिरवारयत् भीमसेनं तदा क्रुद्धं भीमरूपो भयानकः प्रत्यवारयदायांतमार्ष्यशृंगिर्महा-
रथः तयोः समभवद्युद्धं नरराक्षसयोर्मृधे यादृग्घि पुरा वृत्तं रामरावणयोर्नृप ततो युधिष्ठिरो द्रोणं नवत्या नतपर्वणां आजघ्ने भरत-
श्रेष्ठ सर्वमर्मसु भारत तं द्रोणः पंचविंशत्या निजघान स्तनांतरे रोषितो भरतश्रेष्ठ कौंतेयेन यशस्विना भूय एव तु विंशत्या सायकानां
समाश्विनोत साश्वसूतध्वजं द्रोणः पश्यतां सर्ववर्जिनां तान्शरान्द्रोणमुक्तांस्तु शरवर्षेण पांडवः अवारयत धर्मात्मा दर्शय-
न्पाणिलाघवं ततो द्रोणो भृशं क्रुद्धो धर्मराजस्य संयुगे चिच्छेद समरे धन्वा धर्मपुत्रस्य महात्मनः अथैनं छिन्नधन्वानं त्वरमाणो
महारथः शरैरनेकसाहस्रैः पूरयामास सर्वतः अदृश्यं वीक्ष्य राजानं भारद्वाजस्य सायकैः सर्वभूतान्यमन्यंत हतमेव युधिष्ठि-
रं केचिच्चैनममन्यंत तथैव विमुखीकृतं हतो राजेति राजेंद्र ब्राह्मणेन महात्मना स कृच्छ्रं परमं प्राप्तो धर्मराजो युधिष्ठिरः स त्यक्त्वा
तत्कार्मुकं छिन्नं भारद्वाजेन संयुगे आददे महद्दिव्यं भास्वरं वेगवत्तरं ततस्तान्सायकांस्तत्र द्रोणमुक्तान्सहस्रशः चिच्छेद समरे

द्रो० वीरस्त्रस्तमिवाभवत् छित्वा तु तान् शरान् राजन् क्रोधसंरक्तलोचनः शक्तिं जग्राह समरे गिरीणा...मपिदारणीं स्व
र्णदंडां महाघोरां अष्टघंटां भयावहां समुत्क्षिप्य च तां हृष्टो ननाद बलवद्बली नादेन सर्वभूतानि त्रासयन्निव भारत शक्तिं समुद्यतां दृष्ट्वा
१०५ धर्मराजेन संयुगे स्वस्ति द्रोणाय सहसा सर्वभूतान्यथाब्रुवन् सा राजभुजनिर्मुक्ता निर्मुक्तोरगसंनिभा प्रज्वालयंती गगनं दिशः सप्रदि
शस्तथा द्रोणांतिकमनुप्राप्ता दीप्तास्या पन्नगो यथा तामापतंतीं सहसा दृष्ट्वा द्रोणो विशांपते प्रादुश्चक्रे ततो ब्राह्ममस्त्रमस्त्रविदां वरः
तदस्त्रं भस्मसात्कृत्वा तां शक्तिं घोरदर्शनां जगाम स्यंदनं तूर्णं पांडवस्य यशस्विनः ततो युधिष्ठिरो राजा द्रोणास्त्रं तत्समुद्यतं अ
शामयन्महाप्राज्ञो ब्रह्मास्त्रेणैव मारिष विद्ध्वा तं च रणे द्रोणं पंचभिर्नतपर्वभिः क्षुरप्रेण सुतीक्ष्णेन चिच्छेदास्य महद्धनुः तदपा
स्य धनुश्छिन्नं द्रोणः क्षत्रियमर्दनः गदां चिक्षेप सहसा धर्मपुत्राय मारिष तामापतंतीं सहसा गदां दृष्ट्वा युधिष्ठिरः गदामेवाग्र
हीत्क्रुद्धश्चिक्षेप च परंतपः ते गदे सहसा मुक्ते समासाद्य परस्परं संघर्षात्पावकं मुक्त्वा समेयातां महीतले ततो द्रोणो भृशं क्रुद्धो धर्म
राजस्य मारिष चतुर्भिर्निशितैस्तीक्ष्णैर्हयान् जघ्ने शरोत्तमैः चिच्छेदैकेन भल्लेन धनुश्चेंद्रध्वजोपमं केतुमेकेन चिच्छेद पांडवं चार्दय
त्त्रिभिः हताश्वात्तु रथात्तूर्णमवप्लुत्य युधिष्ठिरः तस्थावूर्ध्वभुजो राजा व्यायुधो भरतर्षभ विरथं तं समालोक्य व्यायुधं च विशेषतः द्रो
णोव्यमोहयच्छत्रून् सर्वसैन्यानि वा विभो मुंचन्निषुगणांस्तीक्ष्णान् लघुहस्तो दृढव्रतः अभिदुद्राव राजानं सिंहो मृगमिवोल्बणः
तमभिद्रुतमालोक्य द्रोणेनामित्रघातिना हाहेति सहसा शब्दः पांडूनां समजायत हतो राजा हतो राजा भारद्वाजेन मारिष इत्या
सीत्सुमहाञ्छब्दः पांडुसैन्यस्य भारत ततस्त्वरितमारुह्य सहदेवरथं नृपः अपायाज्जवनैरश्वैः कुंतीपुत्रो युधिष्ठिरः॥ द्रोणप राम० १०५

वृणि जयद्रथवधे संजय उवाच बृहत्क्षत्रमथायांतं कैकेयं दृढविक्रमं क्षेमधूर्ति महाराज विव्याधोरसि मा
र्गणैः बृहत्क्षत्रस्तु तं राजा नवत्या नतपर्वणां आजघ्ने त्वरितो राजन् द्रोणानीकबिभित्सया क्षेमधूर्तिस्तु संक्रुद्धः केकयस्य महा
त्मनः धनुश्चिच्छेद भल्लेन पीतेन निशितेन च अथैनं छिन्नधन्वानं शरेणानतपर्वणा विव्याध समरे तूर्णं प्रवरं सर्वधन्विनां अथा
न्यद्धनुरादाय बृहत्क्षत्रो हसन्निव व्यश्वसूतरथं चक्रे क्षेमधूर्तिं महारथं ततोऽपरेण भल्लेन पीतेन निशितेन च जहार नृपतेः कायाच्छि
रो ज्वलितकुंडलं छिन्नं च सहसा तस्य शिरः कुंचितमूर्धजं सकिरीटं महीं प्राप्य बभौ ज्योतिरिवांबरात् तं निहत्य रणे हृष्टो बृहत्क्षत्रो
महारथः सहसाभ्यपतत्सैन्यं तावकं पार्थकारणात् धृष्टकेतुं तथायांतं द्रोणहेतोः पराक्रमी वीरधन्वा महेष्वासो वारयामास भा
रत तौ परस्परमासाद्य शरदंष्ट्रौ तरस्विनौ शरैरनेकसाहस्रैरन्योन्यमभिजघ्नतुः तावुभौ नरशार्दूलौ युयुधाते परस्परं महावने ती
व्रमदौ वारणौ यूथपौ यथा गिरिगह्वरमासाद्य शार्दूलाविव रोषितौ युयुधाते महावीर्यौ परस्परजिघांसया तद्युद्धमासीत्तुमुलं प्रे
क्षणीयं विशांपते सिद्धचारणसंघानां विस्मयाद्भुतदर्शनं वीरधन्वा ततः क्रुद्धो धृष्टकेतोः शरासनं द्विधा चिच्छेद भल्लेन प्र
हसन्निव भारत तदुत्सृज्य धनुश्छिन्नं चेदिराजो महारथः शक्तिं जग्राह विपुलां हेमदंडामयस्मयीं तां तु शक्तिं महावीर्यां दोर्भ्या
मायम्य भारत चिक्षेप सहसा यत्तो वीरधन्वरथं प्रति तया तु वीरघातिन्या शक्त्या त्वभिहतो भृशं निर्भिन्नहृदयस्तूर्णं निपपात र
थान्महीं तस्मिन्विनिहते वीरे त्रिगर्तानां महारथे बलं तेऽभज्यत विभो पांडवेयैः समंततः सहदेवस्ततः षष्टिं सायकान्दुर्मुखे
क्षिपत् ननाद च महानादं तर्जयन्पांडवो रणे माद्रेयस्तु ततः क्रुद्धो दुर्मुखं च शितैः शरैः भ्राता भ्रातरमायांतं विव्याध प्रह

द्रो० १०६

सञ्जिव तं रणे रौद्रं दृष्ट्वा सहदेवं महाबलं दुर्मुखेनानुभिर्वारीस्तारयामास भारत दुर्मुखस्य तु भल्लेन छित्वा केतुं महाबलः जघान च
तुरगांश्चतुर्भिर्निशितैः शरैः अथापरेण भल्लेन पीतेन निशितेन ह चिच्छेद सारथेः कायाच्छिरो ज्वलितकुण्डलं क्षुरप्रेणाथ वनी सौ
न कौरव्यस्य महद्धनुः सहदेवो रणे छित्वा तं च विव्याध पंचभिः हताश्वं तु रथं सत्यक्त्वा दुर्मुखो विमनास्तदा आरुरोह रथं राजन् निरमित्र
स्य भारत सहदेवस्ततः क्रुद्धो निरमित्रं महाहवे जघान पृतनामध्ये भल्लेन परवीरहा स पपात रथोपस्थान्निरमित्रो जनेश्वरः त्रिगर्त
राजस्य सुतो व्यथयं स्तव वाहिनीं तं तु हत्वा महाबाहुः सहदेवो व्यरोचत यथा दाशरथी रामः खरं हत्वा महाबलं हाहाकारो म
हानासीत् त्रिगर्तानां जनेश्वर राजपुत्रं हतं दृष्ट्वा निरमित्रं महारथं नकुलस्ते सुतं राजन् विकर्णं पृथुलोचनं मुहूर्त्ताज्जितवांस्तो
केतदद्भुतमिवाभवत् सात्यकिं व्याघ्रदत्तस्तु शरैः सन्नतपर्वभिः चक्रेऽदृश्यं साश्वसूतं सध्वजं पृतनान्तरे तान्निवार्य शरान् शूरः शै
नेयः कृतहस्तवत् साश्वसूतध्वजं बाणैर्व्याघ्रदत्तमपातयत् कुमारे निहते तस्मिन् मागधस्य सुते प्रभो मागधाः सर्वतो यत्ता युयुधा
नमुपाद्रवन् विसृजंतः शरांश्चैव तोमरांश्च सहस्रशः भिंडिपालांस्तथा प्रासान् मुद्गरान्मुशलानपि अयोधयन् रणे शूराः सा
त्वतं युद्धदुर्मदं तांस्तु सर्वान् स बलवान् सात्यकिर्युद्धदुर्मदः नातिकृच्छ्राद्धसन्नेव विजिग्ये पुरुषर्षभ मागधान् द्रवतो दृष्ट्वा हतशे
षान् समंततः बलं ते भज्यत विभो युयुधानशरार्दितं नाशयित्वा रणे सैन्यं त्वदीयं माधवोत्तमः विधुन्वानो धनुः श्रेष्ठं व्यभ्राजत
महायशाः भज्यमानं बलं राजन् समात्तेन महात्मना नाभ्यवर्तत युद्धाय त्रासितं दीर्घबाहुना ततो द्रोणो भृशं क्रुद्धः सहसो
द्वृत्य चक्षुषी सात्यकिं सत्यकर्माणं स्वयमेवाभिदुद्रुवे इति द्रोणपर्वणि जयद्रथवधे संजय उवाच द्रौपदेयान्महेष्वासान्सौमद राम० १०६

ष्णिर्महायशाः एकैकं पंचभिर्विध्वा पुनर्विव्याध सप्तभिः तेपीडितामृशंतेनरौद्रेणमहताविभो प्रमूढेनचविविदुर्मध्येकसंस्थाकि
चन नाकुलिश्चशतानीकः सोमदत्तिंनरर्षभं द्वाभ्यांविध्वाननदहृष्टः शराभ्यांशत्रुकर्शनः तथेतरेरणेयत्तास्त्रिभिस्त्रिभिरजिह्म
गैः विव्यधुः समरेतूर्णंसोमदत्तिममर्षणं सतान्प्रतिमहाराजचिक्षेपपंचसायकान एकैकंतस्विनाधैकैकेनमहायशाः ततस्तेभ्रातरः
पंचशरैर्विध्वामहात्मना परिवार्यरणोवीरंविव्यधुः सायकैर्भृशं आर्जुनिस्तुहयांस्तस्यचतुर्भिर्निशितैः शरैः प्रेषयामाससंक्रुद्धोयमस्य
सदनंप्रति भैमसेनिर्द्धनुश्छित्वासोमदत्तेर्महात्मनः ननादबलवन्नादंविव्याधचशितैः शरैः यौधिष्ठिरिर्ध्वजंतस्यछित्वाभूमावपात
यत् नाकुलिश्चाप्यथतारंरथनीडादपातयत् माद्रेयाभिहतंतालाध्वजंबिभिर्विमुखीकृतं क्षुरप्रेणशिरोराजन्निचकर्तमहात्मनः त
च्छिरःन्यपतद्भूमौतपनीयविभूषितं भ्राजयत्तद्रणोद्देशंबालसूर्यसमप्रभं सोमदत्तेःशिरोदृष्ट्वानिकृत्तंतन्महात्मनः वित्रस्तास्तावकाराज
न्प्रदुद्रुवुरनेकधा अलंबुषस्तुसमरेभीमसेनंमहाबलं योधयामाससंक्रुद्धोलक्ष्मणंरावणिर्यथा संप्रयुद्धौरणेदृष्ट्वातावुभौनरराक्ष
सौ विस्मयः सर्वभूतानांप्रहर्षः समजायत आर्ष्यशृंगिंततोभीमोनवभिर्निशितैः शरैः विव्याधप्रहसन्राजन्राक्षसेंद्रममर्षणं तद्रक्षः
समरेविद्धंकृत्वानादंभयावहं अभ्यद्रवत्ततोभीमंयेचतस्यपदानुगाः सभीमंपंचभिर्विध्वाशरैः सन्नतपर्वभिः भैमान्सर्थिजघानाशुरथा
न्त्रिंशतमाहवे पुनश्चतुःशतान्हत्वाभीमंविव्याधपत्रिणा सोतिविद्धस्तथाभीमोराक्षसेनमहाबलः निषसादरथोपस्थेमूर्छयाभिप
रिप्लुतः प्रतिलभ्यततः संज्ञांमारुतिः क्रोधमूर्छितः विकृष्यकार्मुकंघोरंभारसाधनमुत्तमं अलंबुषंशरैस्तीक्ष्णैरर्दयामाससर्वतः स
विद्धोबहुभिर्बाणैर्नीलांजनचयोपमः शुशुभेसर्वतोराजन्प्रफुल्लइवकिंशुकः सवध्यमानः समरेभीमचापच्युतैः शरैः स्मरन्भ्रातृवधंचैवपां